॥अथनारायणभट्टकृतेप्रयोगरत्नेप्रारंभः॥

पत्र१९६

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY

श्रीगणेशायनमः॥श्रीरामंसपरीवारंगणेशंचसरस्वतीं॥आश्वलायनतच्छिष्यान्न
णम्यपितरंगुरुं॥भट्टरामेश्वरसुतोभट्टनारायणःसुधीः॥प्रयोगरत्नंकुरुतेकाश्यांत्रिष्टे
ष्टतुष्टये॥२॥ग्रंथेऽस्मिन्गुणगणवत्त्वमुच्यतेचेत्तद्ग्रंथंगुणगणवंतमाहकोन॥तत्संत
स्त्रिरसिकृतांजलिस्तुयाच्चेत्तोध्यंतत्तदसदिहोच्यतेमयायत्न॥३॥अथसंस्काराः॥तेचा
ष्टचत्वारिंशत्॥तथाचगौतमः॥गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्न
प्राशनचौलोपनयनंचत्वारिवेदव्रतानिस्नानंसहधर्मचारिणीसंयोगःपंचानांयज्ञानामनु
ष्ठानमष्टकापार्वणश्राद्धंश्रावण्याग्रहायणीचैत्र्याश्वयुजीतिसप्तपाकसंस्थाअग्न्याधे
यमग्निहोत्रंदर्शपूर्णमासौचातुर्मास्याग्रयणेष्टिर्निरूढपशुबंधःसौत्रामणीतिसप्तहविर्य
ज्ञसंस्थाअग्निष्टोमोत्यग्निष्टोमउक्थ्यषोडशी वाजपेयोतिरात्रोप्तोर्यामइतिसप्तसोमय ॥१॥

ज्ञसंस्थाइत्येतेचत्वारिंशत्संस्काराअष्टावात्मगुणाःदयासर्वभूतेषुक्षांतिरनसूयाशौ
चमनायासोमंगल्यमकार्पण्यमस्पृहेतियस्येतेचत्वारिंशत्संस्काराअष्टावात्मगुणाश्च
ब्रह्मणासायुज्यमाप्नोतीति॥पार्वणः॥पार्वणस्थालीपाकः॥श्राद्धममावास्यादि॥श्रावणी
तत्रकर्त्तव्यंश्रवणाकर्म॥आग्रहायणीतत्रकर्त्तव्यंप्रत्यवरोहणं॥चैत्रीतत्रकर्त्तव्यःशूलग
वः॥आश्वयुजीतत्रकर्त्तव्यमाश्वयुजीकर्मनिहरदत्तोव्याचख्यौ॥अंगिरसातुपंचविंशति
संस्काराउक्ताः॥पंचविंशतिसंस्कारैःसंस्कृतायेद्विजातयः॥तेपवित्राश्चयोग्यास्युःश्रौ
तादिषुसुयंत्रिताः॥आदिशब्दाद्याजनादौ॥गर्भाधानंपुंसवनंसीमंतोन्नलिरेवच॥ब
लिर्विष्णुबलिः॥जातकृत्यंनामकर्मनिष्क्रमोन्नाशनंपरं॥चौलकर्मोपनयनंतद्व्रतानांच
तुष्टयं॥तच्छब्देनप्रसिद्ध्यर्थंद्वेदग्रहणेतद्व्रतानांवेदव्रतानामित्यर्थः॥स्नानोद्वाहौचाग्र

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

यणमष्टकाश्चयथानथं॥श्रावण्यामाश्वयुज्यांचमार्गशीर्ष्यांचपार्वणं॥उत्सर्गश्चाप्युपाकर्मम
हायज्ञाश्चनित्यत्रयः॥संस्कारानियताह्येते ब्राह्मणस्यविशेषतइति॥श्रावण्यांश्रवणाकर्मा
त्यादिपूर्ववद्व्याख्येयं॥नियतानित्याः॥एतेषांपंचविंशतीनांनैमित्तिकवार्षिकमासिकनित्यभे
दनचानुविध्यमाहाश्वलायनः॥नैमित्तिकाःषोडशोक्ताःसमुद्वाहावसानकाः॥सप्तैवायणा
द्याश्चसंस्कारावार्षिकामताः॥मासिकंपार्वणंप्रोक्तमन्वाहार्यानुवार्षिकं॥महायज्ञास्तुनित्याःस्यु
संध्यावच्चाग्निहोत्रवदिति॥अत्रगर्भाधानाद्याउपनयनांताएवसर्वेषांनियताःनतुस्नानाद्या॥
तिनब्रह्मचर्यादेवप्रव्रज्येत्यादिनविरुध्यते॥एतेचद्विजानामेवसमंत्रकाः॥यदाहयाज्ञवल्क्यः॥
ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः॥निषेकाद्याश्मशानांतास्तेषांवैमंत्रतःक्रियाइति॥
संस्कारा नधिकृत्यमः॥शूद्रेष्वेवंविधःकार्योविनामंत्रेणसंस्कृतः इति॥ इतिसंस्काराः॥ २

अथस्वस्तिवाचनं॥ ॥तद्यत्रकर्त्तव्यंतदुच्यते॥ व्यासः॥संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवा
चयेत्॥धर्मकर्मणिमांगल्येसंग्रामेऽद्भुतदर्शने॥गृह्यपरिशिष्टे॥अथस्वस्तिवाचनमृद्धिपूर्त्तेषुऋ
द्धिर्विवाहांताअपत्यसंस्काराःप्रतिष्ठोद्यापनेपूर्त्ततत्कर्मणश्चाद्यंतयोःकुर्यादिति॥आश्वला
यनस्मृतिः॥वैदिकेतांत्रिकेचादौतनःपुण्याहदृश्यते॥शौनकः॥पुण्याहवाचनविधिंवक्ष्यामोथ
यथाविधि॥प्रयोक्तुःकर्मणामादावंतेचोदयसिद्धयेइति॥नच्चप्रयोगांतर्गतमिकिंचित्॥बहवस्तु नि
प्रयोगबहिर्भूतमिति॥आद्यपक्षेकर्मप्रयोगसंकल्पंकृत्वाकार्यद्वितीयेतुतत्कृत्वाकर्मसंकल्प्य॥
अथप्रयोगः॥ ॥प्रयोगपारिजातानुसारेणोच्यते॥यजमानःकृताभ्यंगादिःस्वलंकृतोदर्भपाणिः
शुचिर्भूत्वामंगलसंभारंसंभृत्यस्वलंकृतेगृहेगोमयोपलिप्तभूमौसोत्तरच्छदेभद्रासनेउदङ्मुख
उपविश्यस्वदक्षिणपार्श्वेसंस्कार्यमुदङ्मुखमुपवेश्यरंगवल्लिकायुक्तेभूतलेप्रस्थपरिमितस्य
रात्क्यान्यूनस्यवाधान्यस्योपरिदक्षिणोत्तरयोःसुवर्णरजतताम्रमृन्मयान्यतमकलशद्वय

मत्रणंमनोहरमलंकृतंशुद्धपुण्यजलपूरितंसपल्लवंनिधायसूत्रवेष्टितोनरकलशेषु
चरत्नानिनिक्षिपेत्।तदुपरिसिततंडुलापूरितंसफलंपात्रंनिधायतत्पश्चिमदेशेश्व
रास्तान्प्रतिवचनसमर्थांस्तद्दिवसेभ्राद्धादिषभुक्तवतोनिषिद्धप्रतिग्रहनिवृत्तान्शुचौ
सोत्तरीयान्प्रभविवित्रपाणीन्युग्मान्ब्राह्मणान्प्राङ्मुखानासनेषूपवेश्यगंधपुष्पादिभि
रभ्यर्च्ययथाचारं॥सुमुखश्चेत्यादिभिर्गणपतिंस्मृत्वाषोडशोपचारैरभ्यर्च्य चतुत्त
रकलशेदेवताआवाहयेत्॥तद्यथा॥कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः
मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्थिताः॥कुक्षौतुसागराःसर्वेससप्तद्वीपावसुं
धरा॥ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रि
ताः॥पुष्टिःत्रीणिश्चगायत्रीसावित्रीचसरस्वती॥आयांतुयजमानस्यदुरितक्षयका २

रिकाः॥एवमेताःसमावाह्यकलशेदेवतास्ततः॥एतन्मंत्रस्थितान्देवान्संपूज्यप्रार्थये
त्क्रमात्॥ततः॥सर्वेषुकालेषुसमस्तदेशेषुयत्रयोगीश्वरःकृष्णः॥अनन्याश्चिंतयंतोमां
मत्तेसकलंकल्याणंसर्वेषारंभकार्येषुसर्वमंगलमांगल्येतदेवलग्नमित्यादियथा
चारंपठित्वालक्ष्मीनारायणंनत्वाॐदुर्गायैनमइतिप्रणवादिचतुर्थ्यंतनमोंतनामभि
र्दुर्गांक्षेत्रपालंवास्तुपुरुषंमातृःपितॄनाचार्यानिष्टदेवताकुलदेवताःग्रामदेवताःसर्वादि
वताःसर्वब्राह्मणानितिसर्वान्त्रत्येकंनत्वाप्राणानायम्यदेशकालौसंकीर्त्यामुकंकर्म
कर्तुमादौश्रुद्विवृद्युदयसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंब्राह्मणैःसहस्तिपुण्याहवाच ध्य
नंकरिष्येइतिसंकल्प येत्॥ततःसर्वेब्राह्मणाःप्राङ्मुखास्तिष्ठेयुः॥तद्दक्षिणतःकर्त्तो
त्तरकलशंबिभ्रद् ङ्मुखस्तिष्ठेत्॥कर्तुर्दक्षिणपार्श्वेसंस्कार्यउदङ्मुखस्ति

ष्टेतू॥अथकर्त्ताआपइत्युक्त्वाशिवाआपःसंत्विति विश्रान्वाचयित्वागंधाइत्युक्त्वासु
गंधाःपांत्विति वाचयित्वासुमनसइत्युक्त्वासोमनस्यमस्त्विति वाचयित्वाअक्षतमि
त्युक्त्वाअक्षतंचारिष्टंचास्त्विति वाचयित्वादक्षिणाइत्युक्त्वास्वस्तिदक्षिणाःपांतुव
ऊर्देयंचास्त्विति वाचयित्वातंकलशंपूर्ववन्निधायदक्षिणंजानुभूमौनिपात्योदञ्मुखः
श्रद्धेत्यादिसूक्तंजपित्वापुनस्तंकलशमादायोत्थायोदञ्मुखोमनःसमाधीयतामि
त्युक्त्वासमाहितमनसःस्मइतितेरुक्तेप्रसीदंतुभवंतइत्युक्त्वाप्रसन्नाःस्मइतितेरुक्ते
सर्वैःसहशंनोरस्तुपुष्टिरस्तुतुष्टिरस्तुवृद्धिरस्तुअविघ्नमस्तुश्रायुष्यमस्तुआरो
ग्यमस्तुस्वस्तिशिवंकर्मास्तुकर्मसिद्धिरस्तुधर्मसमृद्धिरस्तुपुत्रसमृद्धिरस्तुवेदस
मृद्धिरस्तुशास्त्रसमृद्धिरस्तुधनधान्यसमृद्धिरस्तुइष्टसंपदस्त्विति पंचदशावाक्या ४

स्तुक्त्वास्वयंकर्मदेवतात्मकोभगवान्प्रजापतिःप्रीयतामित्युक्त्वाप्रीयतांभगवान्कर्मदेवता
त्मकःप्रजापतिरितितेवाचयिष्येहंपुण्याहंवाचयिष्येहमित्युक्त्वावाच्यतामितितेरुक्तेउक्ताने
वशाकुनेसामगायसीतिऋचंसर्वैःसहपठित्वाॐपुण्याहंभवंतोब्रुवंत्वितिस्वयंमंद्रस्व
रेणोक्त्वाब्राह्मणैरपिपुण्याहमितितथोक्तेपुनरेवंमध्यमस्वरेणोक्तातथैवतैरुक्तेपुनरेव
मुच्चस्वरेणोक्तेतथैवतेरुक्तेस्वस्तिनइंद्रोवृद्धश्रवाइत्यृचंसर्वैःसहपठित्वाॐस्वस्तिभवंतो
ब्रुवंतुइतिपूर्ववदुक्त्वाॐस्वस्तीतितथैवतैःप्रत्युक्तेस्वस्त्यमुककर्मभवंतोब्रुवंत्वितिकरिष्य
माणकर्मनामपूर्ववदुक्त्वाअमुककर्मणेस्वस्तीतितैःपूर्ववदुक्तेऋध्यामस्तोममित्यृचंसर्वैः
सहपठित्वाऋद्धिंभवंतोब्रुवंत्वितिपूर्ववदुक्तेॐऋध्यतामितितैस्तथैवप्रत्युक्तेसामात्यः
प्राङ्मुखउपविशेत्॥ततोविप्राःप्राङ्मुखाउपविश्यतद्दक्षिकलशोदकंविशालेनाम्रा

लो१

लो

५ दिपात्रेनिनीययजमानंसामात्यंमंत्रैरभिषिंचेयुः॥तेचमंत्राः॥तत्सवितुर्वरेण्यमित्रि
मंत्रस्यविश्वामित्रःसवितागायत्री॥आपोहिष्ठेतिनवर्चस्यसूक्तस्यअंबरीषःसिंधु द्वी
पआपोगायत्री॥पंचमीवर्द्धमानासप्तमीप्रतिष्ठाअंत्येद्वेअनुष्टुभौ॥आनोभद्राइतिद्व
यर्चस्यसूक्तस्यराजुरणपुत्रोगौतमोविश्वेदेवास्त्रिपंचाद्याःसप्तमीचजगत्यःषष्ठीवि
राट्स्थानास्त्रिष्टुभः॥अपनःशोशुचदघमित्यष्टर्चस्यकुत्सोग्निर्गायत्री॥एतोन्वि
ंद्रमितिऋचस्यअंगिरसस्तिर श्चीरिंद्रो नुष्टुप्॥स्वादिष्ठयेतिदशर्चस्यमधुछंदाःप
वमानसोमोगायत्री॥तरत्समंदीतिऋक्चतुष्टयस्यअवत्सारःपवमानसोमोगाय
त्री॥शुचीवोहव्येतिमंत्रस्यवसिष्ठोमरुतस्त्रिष्टुप्॥यदंतियच्चेति वर्गद्वयस्यत्र्याद्या
वसिष्ठऋषिःस्त्रिष्टानामेकादशानांपवित्रवसिष्ठाऋषी॥पवमानसोमोगायत्री॥यत्ते ५

पवित्रमर्चिषीतिद्वेअग्निदेवत्ये॥उभाभ्यांदेवसवितरितिसवितृदेवत्यात्रिभिष्टुभि
तिअग्निसवितृदेवत्या॥पुनंतुमामितिवैश्वदेवीआप्यायस्वेतिपुरउष्णिक्॥पुनंतु
मामितियःपावमानीरितियःपावमानीर्योअध्येतीतिचानुष्टुभः॥अग्निःशुचिव्रतमइति न
विरूपोग्निर्गायत्री॥सुमृडीकेष्वाइतिऋक्चतुष्टयस्यवसिष्ठआपस्त्रिष्टुप्॥त्रायंता
मितिनृचस्यसप्तर्षयोविश्वेदेवाअनुष्टुप्॥इमाआपःशिवतमाइत्येतेननृचेनदेव
स्यत्वेतिचयजुषाभूर्भुवःस्वरित्येताभिश्चव्याहृतिभिः॥कुशाग्रैःसपल्लवैरभिषिंचेयुः॥
ननःसुवासिनीभिर्नराजनंकार्यंयथाचारं॥ततोब्राह्मणानांवैदिकमंत्राशिषोग्रा
ह्याः॥कर्मान्तेपिपुनरेवंकार्यं॥इतिजयंतादिसंमतःप्रयोगपारिजातकारप्रोक्तःपु
ण्याहवाचनविधिः॥ ॥अथहेमाद्रौदानखंडेबह्वृचगृह्यपरिशिष्टोक्तत्वेनोक्तः

सकलसाधारणश्रिष्टाचारप्राप्तश्चपुण्याहवाचनप्रयोगः॥ कृतमंगलस्नानः सकलं कृ
तः कृताचमनः प्राङ्मुखोयजमानोवस्त्राछादितेपीठेउपविश्यपत्नीस्वदक्षिणतः प्राङ्मु
खीमुपवेश्यसंस्कार्यंचतथैवोपवेश्य ॐ सुमुखश्चेकदंतश्चेत्यादिशुक्लांबरधरं० अ
भीप्सितार्थ० सर्वमंगलमांगल्ये० सर्वदा सर्वकार्येषु० इतिश्लोकान्पठित्वाॐ लक्ष्मीना
रायणाभ्यांनमः॥ उमामहेश्वराभ्यां० वाचीपुरंदराभ्यां० मातापितृभ्यां० इष्टदेवताभ्यो०
कुलदेवताभ्यो० सर्वेभ्योब्राह्मणेभ्यो०॥ आचमनप्राणायामोकृत्वादेशकालौसंकी
र्त्यामुकफलसिध्यर्थंश्वोद्यवामुककर्मकरिष्ये॥ तदंगतयादौपुण्याहवाचनादि
करिष्ये॥ इतिसंकल्पयेत्॥ ॥यदानुग्रहयोगाद्वादिभूतंपुण्याहवाचनाद्यंगंतदामु
कफलसिध्यर्थममुककर्मकर्तुमंगभूतमादौपुण्याहवाचनादिकरिष्य इतिप्रत्ये ६

कंसंकल्पः॥ प्रधानसंकल्पस्तुसर्वंकृत्वातद्दिनएवश्वोवाकार्यः॥ ततः कर्त्तास्वपुरतःम
ह्यौः पृथिवीचनइतिमंत्रंवदन्दक्षिणोत्तरतोभूमिंस्पृष्ट्वाओषधयःसमितितथैवतं
डुलपुंजोकृत्वाआकलशेधिष्ठितिपुंजोपरिद्वौसलक्षणौधानुमयोमृन्मयोवाकलशोनिधा
यइमंमेगंगेइतितीर्थजलेनप्रत्येकंपूरयित्वागंधद्वारामितिगंधंकलशेप्रक्षिप्यचंदना
दिनातानुलिप्यपुष्पमालाभूषितौतौकृत्वापूर्णादर्वीतिसतंडुलाभ्यांपात्राभ्यांकलश
योराननेपिदध्यात्॥ सर्वत्रप्रतिकलशंमंत्रावृत्तिरुत्तरसंस्थताच॥ ततस्तत्रायामिभु
नःशेषोवरुणस्त्रिषुपूर्णकलशेवरुणावाहनेविनियोगः॥ ॐ तत्त्वायामिब्रह्मणोतिउत्त
रकलशेवरुणमावाहयेच्चंदनादिनापूजयेच्च॥ ततउत्तरकलशेदेवताआवाहयेदेवं॥
कलशास्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः॥ मूलेतस्यस्थितोब्रह्मामध्येमातृगणाः

स्मृताः॥कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥
अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः॥अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा॥
आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥आ
यांतुममशांत्यर्थंदुरितक्षयकारकाइति॥ततस्तत्कलशोअक्षतांक्षिपेत्॥मातृदेवोभ
वापितृदेवोभवाआचार्यदेवोभवाअतिथिदेवोभवइति।ततःअवनिकृतजानुमंडलः
कमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशंधार
यित्वाआशिषःप्रार्थयंतेप्रार्थनामाहएताःसत्याऽआशिषःसंतुदीर्घनागनद्योगिर
रयस्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेनपुण्याहंदीर्घमायुस्तु॥स्त्रियाऽआपःसंतु।
सौमनस्यमस्तु।अक्षतंचारिष्टंचास्तु।गंधाःपांतुसमंगल्यंचास्तु।अक्षताःपांतुआयु

ष्यमस्तु।पुष्पाणिपांतुसौश्रियमस्तु।तांबूलानिपांत्वैश्वर्यमस्तु।दक्षिणाःपांतुबहुदे
यंचास्तु।दीर्घमायुःशांतिःपुष्टिस्तुष्टिश्चास्तु।श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायु
ष्यंचास्तु।अत्रसर्वत्रब्राह्मणैरस्तिइतिप्रत्युत्तरंदेयं।यंकृत्वासर्ववेदयज्ञक्रियाकरणक
र्मारंभाः शुभाःशोभनाःप्रवर्तंतेतमहमोंकारमादिंकृत्वाऋग्यजुःसामाथर्ववचनंब
ह्वृषिमतंसंविज्ञानंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्येविप्राःवाच्यतामितिवदे
युः॥एवमुत्तरत्रापियथायोगंप्रत्युत्तरं॥ततोयजमानः॥भद्रंकर्णेभिः।ऋक्१द्रविणो
दाद्रविणसः।ऋक्१सुवितापृथ्यानान्।ऋ१नवोनवोभवति।ऋ१जायमानः।ऋ१आपो
उंदंतुजीवसेदीर्घायुत्वायवर्चसे।यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीमि।
जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्यां॥यस्मैत्वंसुकृतेजातवेदउ

८ लोकमंग्नेकृणवःस्योनं॥अश्विनंसपुत्रिणंवीरवंतुंगोमंतंरयिंनशतेस्वस्ति॥संत्वासिं
चाग्नियजुषापुजामायुर्धनंच॥व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानांब्राह्म
णानांमनःसमाधीयतां॥विप्राःसमाहितमनसस्मः।यजमानः।प्रसीदंतुभवंतः।विप्राः
र प्रसन्नास्मः।यज०ग्रांतिरस्तुपुष्टिरस्तुतुष्टिरस्तुवृद्धिरस्तुअविघ्नमस्तुआयुष्यमस्तु
आरोग्यमस्तुशिवंकर्मास्तुकर्मसमृद्धिरस्तुवेदसमृद्धिरस्तुशास्त्रसमृद्धिरस्तुपुत्र
समृद्धिरस्तुधनधान्यसमृद्धिरस्तुइष्टसंपदस्तुअरिष्टनिरसनमस्तुयत्पा
पंतत्प्रतिहतमस्तुयच्छ्रेयस्तदस्तुउत्तरेकर्मण्य विघ्नमस्तुउत्तरोत्तरमहरहरभि
वृद्धिरस्तुउत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यंतां।तिथिकरणमुहूर्त्तनक्षत्रसं
पदस्तुतिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंतां।तिथिकरणेमुहूर्त्त ८

नक्षत्रेसग्रहेसदेवतेप्रीयेतां।अग्निपुरोगाविश्वेदेवाःप्रीयंतां।इंद्रपुरोगामरुद्गणाः
प्रीयंतां।ब्रह्मपुरोगासर्वेवेदाःप्रीयंतां।विष्णुपुरोगाःसर्वेदेवाःप्रीयंतां।माहेश्वरीपुरोगा
उमामातरःप्रीयंतां।वसिष्ठपुरोगाऋषिगणाःप्रीयंतां।अरुंधतीपुरोगाएकपत्न्यःप्री
यंतां।ऋषयश्छंदांस्याचार्यावेदायज्ञाश्चप्रीयंतां।ब्रह्मचब्राह्मणाश्चप्रीयंतां।श्रीसर
स्वत्योप्रीयेतां।श्रद्धामेधेप्रीयेतां।भगवतीकात्यायनीप्रीयतां।भगवतीमाहेश्वरीप्रीय
तां।भगवतीपुष्टिकरीप्रीयतां।भगवतीतुष्टिकरीप्रीयतां।भगवतीवृद्धिकरीप्री०
भगवतीवृद्धिकरीप्री०भगवंतौविघ्नविनायकौप्रीयेतां।भगवान्स्वा
मीमहासेनःसपत्नीकःससुतःसपार्षदःसर्वस्थानगतःप्रीयतां।हरिहरहिरण्यग
र्भाःप्रीयंतां।सर्वग्रामदेवताःप्रीयंतां।सर्वाःकुलदेवताःप्रीयंतां।हताब्रह्मद्विषःह

९ ना: परिपंथिन:। हतास्यकर्मणोविघ्नकर्त्तार:। शत्रव: पराभवंयांतु। शाम्यंतुघोराणि।
पा२ शाम्यंतुपापानि। शाम्यंत्वीतय:। शुभानिवदंतां। शिवाआप:संतु। शिवाऋतव:संतु। शिवा
अग्नय:संतु। शिवाआहुतय:संतु। शिवाओषधय:संतु। शिवावनस्पतय:संतु। शिवाअ
तिथय:संतु। अहोरात्रेशिवेस्यातां। निकामेनिकामेन:पर्जन्योवर्षतुफलवत्योनओषधय:
पच्यंतां। योगक्षेमोन:कल्पतां। शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता
आदित्यपुरोगा:सर्वेग्रहा:शीयंतां। भगवान्नारायण:शीयतां। भगवान्पर्जन्य:शीयतां
भगवान्त्वामीमहासेन:। पुण्याहकालान्वाचयिष्येवाच्यंतां॥ उन्नतेवृशकुनेसामंगय
सिब्रह्मपुत्रइवसवनेषुसंससि॥ वृषेववाजीशिशुमतीरपीत्यासुवेनोन:शकुनेभद्रमा
वदविश्वतोन:शकुनेपुण्यमावद॥ याज्ययायजेतिप्रतिवाक्यायाज्यापुण्येवलक्ष्मी:पुण्या ९

मेवनलक्ष्मीसंभावयतिपुण्यालक्ष्मीसंस्कुरुते॥ यत्पुण्येनक्षत्रेनहूयतेतत्पुष्यं।
यदावैसूर्योदेति। अथनक्षत्रंनैति। यावतितत्रसूर्योगच्छेत्तायत्रजघन्येपश्येत्। तावतिकु
र्वीतयत्कारीस्यात्। पुण्याहएवंकुरुते। नानिवाएतानि। यमनक्षत्राणि। यान्येवदैवनक्षत्रा
णि। तेषुकुर्वीतयत्कारीस्यात्। पुण्याहएवंकुरुते। मह्यंसहकुटुंबिनेमहाजनान्नमस्कुर्वाणा
यआशीर्वचनमपेक्षमाणायामुकशर्मणेपुण्याहं भवंतोब्रुवंतु॥ ॥इतित्रिर्वदेत्॥ ॥
ॐपुण्याहमितित्रिर्विप्राः॥ ॐस्वस्तयेवायुमुपब्रवामहेसोमंस्वस्तिभुवनस्ययस्पतिः॥ बृ
हस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः॥ आदित्यउदयनीयःपथ्यायेवेतःस्व
स्त्ययनंतिपथ्यांस्वस्तिमभ्युदयंतिस्वस्त्येवेतःप्रयंतिस्वस्त्युदयंति स्वस्त्युदयंति॥ स्वस्तिनइं
द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्प

१०

तिर्दधातु॥अुष्टोदेवावसवःसोम्यासः॥चतस्रोदेवीरजराश्रविष्ठाः॥तेयुज्ञंपांतुरसःपुरस्ता
न्नःसंवत्सरीणमृतंस्वस्ति॥मह्यमित्यादिकर्मणाइत्यंतंपूर्ववत्स्वस्तिभवंतोब्रुवंतुइतिविप्रः।
ॐआयुष्मतेस्वस्तीतिप्रतिवचनंविप्रः॥ॐरुध्यामुस्तोमंसनुयामुवाजमानोमंत्रंसुरथेहो
पयातं॥यज्ञोनपक्वंमधुगोघृतरास्तांद्यौअश्विनोःकाममप्राः॥सर्वामृद्धिमृध्नुयामितं
तंवैतेजसेवपुरस्तात्सूर्यभवच्छंदोभिर्मध्यतोक्षत्रेरूपरिष्टाद्गायत्र्यासर्वतोह्यादृशादंप
रिभूयसर्वामृद्धिमाप्नोतिसर्वामृद्धिमाप्नोतियएवंवेद॥रुध्यास्मैहव्येनमसोपसद्य॥मित्रं
देवंमित्रधेयंनोअस्तु॥अनूराधान्हविषावृधेयंतः॥ज्ञातंजीवेमशरदःसवीराः॥त्रीणित्री
णिवेदेवानांमूर्द्धानि॥त्रीणिछंदांसि।त्रीणिसवनानि।त्रयइमेलोकाः।रुध्यामेवतद्धीय
एषुलोकेषुप्रतितिष्ठति॥मह्यमित्यादिअस्यकर्मणाःऋद्धिभवंतोब्रुवंतितिविप्रः।ॐरुध्यता

मितिवचनंविप्रः॥ॐश्रियेजातःश्रियआनिरियायश्रियंवयोजरितृभ्योदधाति॥श्रियंवसा
नाअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ॥श्रियएवैनंतच्छ्रियामादधातिसंततमृचाव
षट्कृत्यसंतत्यैसंधायतेप्रजयापशुभिर्यएवंवेद॥यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत्॥अमुंचलो
कमिदमूचुसर्वेतन्नोनक्षत्रमभिजिद्विजित्यै॥श्रियंदधात्वहृणीयमानेअदेवुभ्रियुमंत्रमेगो
पायायमृषयस्त्रयीविदाविदुः॥ऋचःसामानियजूंषिसाहिश्रारमतासतां॥एतैर्मंत्रैर्नराज
नंकारयंति॥मह्यमित्यादिपूर्ववत्॥अमुककर्मणःश्रीरस्तितिभवंतोब्रुवंतितिविप्रोब्रूयात्॥
ॐअस्तुश्रीरितिविप्रास्तिःवर्षशतंपूर्णमस्तु॥त्विंकर्मास्तुगोत्रमिवृद्धिरस्तुप्रजापतिः
श्रीयतां॥भुक्तेभिरंगैरजआततन्वान्क्रतुंपुनानःकविभिःपवित्रैः॥श्रोचिर्वसानःपर्यायुरपां
श्रियोमिमीनोबृहतीरनूनाः॥तदप्येषश्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे॥

आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासदइति॥ततः उत्तरकलशंदक्षिणाहस्तेदक्षिणाक
लशंवामहस्तेगृहीत्वाताभ्यांधारादृषंसततंपात्रेनिषिंचेदेभिर्मंत्रैः॥ॐवास्तोष्पतेप्रति
जा नीहि॰ यस्त्वेमहे॰ वास्तोष्पतेघृतरेणः॰अजरासस्ते॰वास्तोष्पतेशग्मया॰ पाहिक्षेमउ॰
अमीवहा॰सखासुशेव॰शिवंशिवंनतः॰कर्त्तुर्वामनः॰पत्नीसुवश्यपात्रपातितजलेनपल्लव
दूर्वादिभिरुदङ्मुखोविप्राअभिषिंचेयुस्तिष्ठंतः॥तत्रमंत्राः॥ॐसमुद्रज्येष्ठाः॰इंद्रोया॰या
आपो॰समुद्रार्थायाः॰यासांराजा॰मधुश्चुतः॰यासुराजा॰वैश्वानरे॰आयंतामिह॰आयंतां॰
आपृइत्॰आपुःसर्वस्य॰हस्ताभ्यां॰अनाधृष्टाभ्यां॰इमाआपः॰इमाराष्ट्रस्य॰याभिरिंद्र
मभ्यषिंचत्॰ताभिरद्भिरभिषिंचामि॰महांतंत्वामहीनांसम्राजंचर्षणीनां देवीजनित्र्यजी
जनद्भद्राजनित्र्यजीजनत्॥देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्ते ११

जसासूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिंचामि॥बलायश्रियैयशसेंनाद्याय॥ॐभूर्भुवःस्वः।
इंद्रियंवाएतदस्मिन्लोकेइत्यादिब्राह्मणं॥सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः॥वासुदे
वोजगंनाथस्तथासंकर्षणोविभुः॥१॥प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते॥आखंडलो
ग्निर्भगवान्यमोवैनिर्ऋतिस्तथा॥२॥वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥ब्रह्मणास
हिताःसर्वेदिक्पालाःपांतुतेसदा॥३॥कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥बुद्धिर्ल
ज्जावपुःशांतिःकांतिस्तुष्टिश्चमातरः॥४॥एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः॥आदि
त्यश्चंद्रमाभौमोबुधजीवसितार्कजाः॥५॥ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चतर्पिताः॥देवदा
नवगंधर्वायक्षराक्षसपन्नगाः॥६॥ऋषयोमनवोगावोदेवमातरएवच॥देवपत्न्योद्रुमा
नागादैत्याश्चाप्सरसांगणाः॥७॥अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच॥ओषधानि

चरत्नानिकालस्यावयवाश्चयेसरितःसागराःह्रदालास्तीर्थानिजलदानदाः॥एतेत्वामभि
षिंचंतुसर्वकामार्थसिद्धये॥९॥तळंयोरितिमंत्रांतेअमृताभिषेकोस्त्विति वदेयुः॥ततः आ
चारशंवस्त्रादिदानंतत्परिधानंच॥एवंबह्वृचपरिशिष्टोक्तंत्रिष्टाचारप्रासंचेकीकृत्य
पुण्याहवाचनमुक्तं॥ ॥इतिश्रीमद्विद्वन्मुकुटमाणिक्यश्रीरामेश्वरभट्टसुतश्रीनाराय
णभट्टविरचितेप्रयोगरत्नेसकलकर्मोपयोगिपुण्याहवाचनप्रयोगः॥ ॥अथलोकानुसा
रेणानुकल्प्यपक्षमाश्रित्यांकुरार्पणकर्मप्रयोगः॥ ॥गर्भाधानादि
नामकर्मांतकर्माणिहित्वाअन्नप्राशनादिविवाहांतापत्यसंस्कारेषुअन्येषु
चनवागारप्रवेशादिशुभकर्मसुसद्योंकुरार्पणंकुर्यात्॥तत्रैवं॥देशंकालौस्मृत्वाअमु
ककर्मसाफल्यनिरंतरशुभत्वसिद्धद्वाराश्रीपरमेश्वरप्रीत्यर्थंअंकुरार्पणंकरिष्ये॥ १२

इतिसंकल्प्यशुद्धभूमिंगोमयेनोपलिप्यरंगवल्यादिभिरलंकृत्यतत्रसिताक्षतान्यवी
र्यकिंचिद्भारंनववेणुपात्रंसूत्रेणावेष्यतदेवपालिकात्वेनसंस्थाप्यवल्मीकमृदंद्रव
पंकंशुष्कगोमयचूर्णंचतत्रप्रक्षिप्यपालिकामूलेभ्येततंडुलैःपूरयित्वादूर्वांकुराभ्वत्थ
न्यग्रोधबिल्वपत्राणामुपरिशुभमुहूर्तेनद्वेणुपात्रंनिक्षिप्यतत्रसितरक्तहरिद्वर्णानि
पुष्पाण्यवकीर्यमध्यादिपंचस्थानेषुचदेवान्पूजयेत्॥तत्रब्रह्मजज्ञानंकुभोब्रह्मात्रिषु
पूअनेनपालिकामध्येब्रह्माणमावाहयेत्॥यतइंद्रभयामहेप्रगाथोगर्गइंद्रोबृहती॥
अनेनपूर्वभागेइंद्रमावाहयेत्॥नाकेसुपर्णमितिगर्गोवेणोयमस्त्रिष्टुपूअनेनदक्षिणेयमं॥
तत्त्वायामिब्रह्मणाअजीगर्तिःशुनःशेपोवरुणस्त्रिष्टुप्॥अनेनपश्चिमेवरुणं॥सोमो
धेनुंसोमोअर्वंतमाशुंसोमोवीरंकर्मण्यंददाति॥सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददा
शदस्मै॥सोमोगोतमःसोमस्त्रिष्टुप्॥अनेनोत्तरेसोममावाहयेत्॥ततब्रह्मणोनमस्का

सनमित्यादिक्रमेण षोडशोपचारैः पंचदेवताः सम्यगभ्यर्च्य पालिकापश्चिमतः प्राङ्मुख
स्तिष्ठन्नुपनिषेत्॥दिव्यांपतीन्नमस्यामि सर्वकामफलप्रदान्॥कुर्वंतुसफलंकर्मकुर्वंतुसत
तंशुभमिति॥ततःश्वेततंडुलांस्तोयेनप्रक्षाल्यप्राच्यादिचतुर्दिक्षुबीजप्रतिनिधित्वेनसमं
त्रंन्यसेत्॥ततस्त्रयतइंद्रेत्या दयश्चत्वारोमंत्राःप्रयुक्ताः॥ ॥ इतिश्रीनारायणभट्टकृते
प्रयोगरत्नेसद्योऽकुरार्पणप्रयोगः॥ ॥अथाभ्युदयिकश्राद्धविधिः॥ ॥तद्वर्भाधानादि
षुगर्भसंस्कारेषुजातकर्मादिषपत्यसंस्कारेषुअग्न्याधानादिषुश्रौतकर्मसुश्रवणाकर्मा
दिषुवापीकूपतडागारामप्रतिष्ठापनादिषुदेवव्रतिष्ठायांवानप्रस्थाश्रमसंन्यासस्वीकारे
तुलापुरुषादिमहादानादौनवगृहप्रवेशेमहानाम्न्यादिवेदव्रतेषुराजाभिषेकेशांतिक
पौष्टिकेषुसर्वेषुउपाकर्मोत्सर्जनयोरप्येकेनवीनयोर्वानयोरप्येवंविधेकार्ये॥इदमा १३

भ्युदयिकंश्राद्धंवक्ष्यमाणंचमातृपूजनमेकस्मिन्नेकसंस्कारेषेककर्तृकेषुयुगपदुपस्थि
तेषुसर्वादौसकृदेवतंत्रेणकार्यंनतुप्रतिसंस्कारमावृत्त्या॥यथादेवादकृतजातकर्मादिक
स्योपनयनकालेजातकर्माद्यनुष्ठाने देशांतरगतस्यमृतबुध्या कृतोर्ध्वदेहिकस्या
गतस्यपुनर्जातकर्मादिसंस्काराणांविहितानांयुगपदनुष्ठानेकर्मनाशाजलस्पृष्टादीनां
प्रायश्चित्ततयापुनःसंस्काराणांयुगपदनुष्ठानेवा॥तदुक्तंब्रह्मपुराणे॥गणशःक्रियमाणा
नांमातृभ्यःपूजनंसकृत्॥सकृदेवभवेच्छ्राद्धमादौनपृथगादिषु॥तत्राभ्युदयिकश्राद्धेकर्त
व्येमानुष्योदैव्यश्चद्विविधामातरआदौपूज्याः॥तत्रमानुष्योमातरोष्टौमातृपितामहीप्रपिता
महयःमातामहीमातुःपितामहीमातुःप्रपितामहीतिषट्पितृष्वसामातृष्वसाचेति॥ब्राह्म्यलक्ष्म्या
द्यास्तथासप्तदुर्गाक्षेत्रगणाधिपानू॥ब्राह्म्याद्याः॥ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवी

तथा॥ वाराह्यैचतथेंद्राणीचामुंडासप्तमातरः॥ दुर्गाक्षेत्राधिपतिंगणाधिपतिंचपूजयेत्॥
तथाकात्यायनः॥ कुर्य्यात्रयावसोर्धाराः पंचधाराघृतेनतु। कारयेत्सप्तधाराभानिनीचान
चोच्छ्रिताः॥ गौरीपद्माशचीमेधासावित्रीविजयाजया॥ देवसेनास्वधास्वाहामातरोलोकमा
तरः॥ धृतिःपुष्टिस्तथातुष्टिरात्मदेवतयासह॥ आत्मदेवतात्मकुलदेवता॥ आयुष्यापिच दे
शांत्यर्थंजपेदत्रसमाहितः॥ आयुष्याणिआनोभद्राइत्यादीनि॥ ततःवृद्धिश्राद्धेनवदेवत्यंपा
र्वणत्रयात्मकं॥ तत्रक्रममाहाश्वलायनाचार्यः॥ मातापितामहीचैवसंपूज्याप्रपितामही॥
य पित्रादयस्त्रयश्चैवमातुःपित्रादयस्त्रयः॥ एतेनवार्चनीयाःस्युःपितरोभ्युदयेद्विजैरिति॥ यत्तु
वृद्धवसिष्ठः॥ नांदीमुखेविवाहेचप्रपितामहपूर्वकं॥ नामसंकीर्त्तयेद्विद्वानन्यत्रपितृपूर्वक
मिति॥ स्मृत्यर्थसारश्च॥ वृद्धमुख्यास्तुपितरोवृद्धिश्राद्धेषुभुंजतेइतिनछायांतरविषयकं॥ १४

आश्वलायनानांतुआनुलोम्येनमात्रादिक्रमेणैव॥ आश्वलायनाचार्यवचनात्॥ यत्तुब्रह्मपु यना
राणे॥ पितापितामहश्चैवतथैवप्रपितामहः॥ त्रयोह्यभ्युदयेतेपितरःसंप्रकीर्तिताः॥
तेभ्यःपूर्वंत्रयोयेतुतेनांदीमुखाःस्मृताइतितन्महालयप्रकरणपठितश्लोकपदयोर्मासी
निमित्तकश्राद्धविषयंतत्प्रकरणपाठादित्येवंहेमाद्र्यादयऊचिरे॥ वृद्धनांदीमुखसंज्ञ
कान्मात्रादीनुद्दिश्येतु॥ विष्णुपुराणेकन्याविवाहादीनतुक्रम्यनांदीमुखान्पि तृनादौन
र्पयेत्त्रयतोगृह्यसूक्तैः॥ ब्रह्मपुराणेचजन्माद्यनुक्रम्यपितॄन्नांदीमुखान्नामतर्पयेद्विधिपू
र्वकमित्युक्तेः॥ वृद्धपराशरेणतुदेवानामपिनांदीमुखविशेषणमुक्तमत्र॥ नांदीमुखेभ्योदे
वेभ्यःप्रदक्षिणंकृत्वासनमिति॥ वृद्धिश्राद्धेचकालः॥ कर्मादावत्पूर्वेद्युर्मात्पार्वणं। कर्मादेपि
त्पार्वणं। कर्मोत्तरेहमातामहपार्वणमिति॥ अस्यासंभवेपूर्वेद्युरेवपूर्वाह्णेमात्कर्मध्या

क्रियेतृकमपराह्णे मातामहानां। अस्याप्यसंभवे आहवृद्धमनुः॥अलाभेश्राद्धकालानां
नांदीश्राद्धत्रयंबुधः॥पूर्वेद्युरेवकुर्वीतपूर्वाह्णेमातृपूर्वकमिति॥इदंचमदुत्सुकर्मसुअत्ये
षुतुकर्माहएवश्राद्धं॥पुत्रजन्मनितुदिनेवारात्रौवाभुक्तवतोपवासिनावापुत्रजन्मानंतरमे
वकार्यं॥अत्रसंकल्पादौविशेषः॥संग्रहे॥शुभायग्रथमांतेनवृद्धौसंकल्पमाचरेत्॥न
षष्ठ्यांदिवाकुर्यान्महान्दोषोभिजायते॥अनग्निदग्धशब्दानामरूपाणामगोत्रिणां॥
अनाम्नांचातिलाद्येश्चनांदीश्राद्धंचसव्यवत्॥कारिकाच॥संबंधनामरूपाणिवर्जयेद
त्रकर्मणि॥अत्रसत्यवसूविश्वेदेवौतत्स्थानेद्वौविप्रौमात्रादीनांचप्रत्येकंद्वौद्वौएवंवि
प्रानिर्ब्राह्मणाः॥यद्वामात्रादीनांत्रयाणांद्वौद्वौएवमष्टौ॥अत्रनापसव्यंतत्स्थानेय
वाएवस्वधास्थानेस्वाहा शब्दःसव्यजानुनिपातनाभावःनाघ्रान्नदानंघ्राघ्रुवएवकु १५

र्यात्रदक्षिणमुपचारोऽजुदर्भैःक्रियेत्यादयोविशेषाग्रंथांतरतोज्ञेयाः॥पिंडदानेकुलदेशा
चारतोव्यवस्थाभविष्यपुराणे॥पिंडानि र्वपणंकुर्यान्नवाकुर्यान्नराधिप॥वृद्धिश्राद्धेमहाबाहो
कुलधर्मानवेक्ष्यतु॥ पिंडदानपक्षेविशेषोवसिष्ठेनोक्तः॥दधि
कर्कंधुसंमिश्रान्पिंडान्दद्याद्यथाक्रमं॥कर्कंधुर्बदरीफलं॥तथाएकैकस्मैपिंडद्वयंदेयं॥एकं
नाम्नापरंतूष्णींदद्यात्पिंडद्वयंबुधइतिचतुर्विंशतिमतात्॥अन्येचबहवोविशेषाग्रंथांतरज्ञेयाः॥ तो
दाक्षिणात्यानांविस्तृतवृद्धिश्राद्धाचाराभावान्नेहोच्यंते॥अथाभ्युदयिककर्तृनिर्णयः॥ ॥स
यपत्नीके॥नांदीश्राद्धंपिताकुर्याद्यद्येपाणिग्रहेपुनः॥अतऊर्ध्वंपत्नीकुर्वीतस्वयमेवतुनांदिकं॥
द्वितीयपाणिग्रहादेवरएवकुर्यादित्यर्थः॥कात्यायनः॥स्वपितृभ्यःपितादद्यात्सुतसंस्कारक
र्मसु॥पिंडानोद्वाहनात्तेषांतत्स्थभावेतुतत्क्रमात्॥तेषांसुतानामोद्वाहं नात्स्वथमविवाहपर्यंतं

पितास्वपितृभ्यःपिंडान्तुपलक्षितंवृद्धिश्राद्धंकुर्यात्॥तस्यपितुरभावेतुतस्यसंस्कार्यस्यपितृव्यांयःक्रमस्तेनक्रमेणपितव्याचार्यमातुलादिःश्राद्धंदद्यात्स्वपितृभ्यइतिहेमाद्रिणाव्याख्यातं॥जीवत्पितृकस्तुपितुर्मात्रादिभ्योवृद्धिश्राद्धंकुर्यात्॥वृद्धोतीर्थेचसन्यस्तेनातेचपतितेसति॥येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः॥एतत्सामिकविषयमित्येके॥विष्णुः॥पितरिजीवतियःश्राद्धंकुर्यात्तस्येषांपिताकुर्यात्तेषांकुर्यात्पितरिपितामहे चयेषांप्रपितामहःपितामहःपितरिपितामहेचनेवदद्यादिति॥आश्वलायनगृह्यपरिशिष्टेतु॥जीवत्पितासुतसंस्कारेषुमातृमातामहयोःकुर्यात्तुतस्यांजीवंत्यांमातामहस्यैवकुर्यादिति॥अथास्यत्रिशिष्टप्रचुराचारपरिगृहीतःसंकल्पविधिनाप्रयोगः॥उपनयनादिमहत्सुकर्मसुपूर्वंयुर्जातकर्मण्यत्यकर्मसुतदहरेवनांदीश्राद्धंकुर्यात्॥तत्रादौकर्त्ताकृतमांगलिकस्नानोधौतवासाःकृतस्वस्त्य १६

यनोनांदीश्राद्धपूर्वांगंमातृकापूजनंकुर्यात्॥तच्चेत्थं॥गोमयोपलिप्तेरंगमालादिभिरलंकृतेश्राद्धस्थलेप्रतिमास्वक्षतपुंजेषुद्विजानिधायथालाभंसंकल्पपूर्वंकंमातृपितामहीप्रपितामहीमातामहीमातृपितामहीमातृप्रपितामहीपितृष्वसा मातृष्वस्राख्याअष्टौमानुषमातॄदुर्गांक्षेत्रपालंगणाधिपंचप्रत्येकंकांड्यानुसमयेनपदार्थानुसमयेनवाघृतपायसादिनमोनमोनामभिरावाहनादिभिरर्चयेत्॥यद्वा॥ॐगौर्यादिषोडशमातृभ्योनमःब्राह्म्यादिसप्तमातृभ्योनमइति॥संक्षेपेणसमुदितरूपेणार्चयेत्॥ततआनोभद्रइत्यादिनातंजीवइत्यादिचसूक्तंपठित्वानांदीश्राद्धसंकल्पंकुर्यात्॥तत्रोपवीतीप्राङ्मुखस्तिष्ठन्नादिसंकीर्त्यसत्यवसुसंज्ञकाविश्वेदेवाःनांदीमुखामातृपितामह्यःअमुकगोत्राःनांदीमुख्यःपितृपितामहप्रपितामहाअमुकगोत्राःनांदीमुखामातामहमातुःपितामहमातुःप्रपितामहाअमुकगोत्राःसपत्नीकाःएतानुद्दिश्यसंक

महीप्रपिता२ नांदीमुखाः

त्यविधानेननांदीश्राद्धंकरिष्येइतिसंकल्प्यलक्षणलक्षितान्विंशतिसंख्याकान्एकसंख्याकान्वाब्राह्मणान्पूर्ववद्युग्मसंख्यानुपवेश्य
बुध्योक्तानेषांपादान्प्रक्षाल्यप्राङ्मुखानुपवेश्यषष्ठीविभक्त्योक्तान्ऋजुदर्भयुग्मान्यासनंप्रदा
यापःप्रदायक्षणंदत्वाद्वितीययामंत्रंकमावाह्यगंधशुक्लमाल्यधूपदीपाछादनाभरणानि
प्रथमयाद्विर्द्विर्दत्वामधुरद्रव्यसहितेनन्नमन्नंपरिविष्यपृथिवीतेपात्रमित्यनुक्त्वाचतुर्थ्यो
क्त्वास्वाहाहव्यंनममेतिसर्वत्रत्यक्त्वातत्तेषूपास्मैगायतेतिपंचानांकाश्यपोसितःसोमोगाय
त्रीजपेविनियोगःएताःपंचर्चःश्रावयित्वातेरुत्तरापोन्नादीकृत्तेहस्तशुध्यादिकंकृत्वाद्रा
क्षामलकेनन्निष्क्रयंवादक्षिणांदत्वाॐमातापितामहीचैवतथैवप्रपितामही।।पितापि
तामहश्चैवतथैवप्रपितामहः।।मातामहस्तत्पिताचप्रमातामहादयः।।एतेभवंतुमेप्रीताः १७

प्रयच्छंतुचमंगलमित्युक्त्वाकृतांजलिःसंप्रार्थ्यप्रणिपत्यब्राह्मणान्विसृज्याचम्यगोर्यादीर्विस
र्जयेत्।।अथैतोपिसंक्षिप्तःत्रिभिःक्रियमाणोवृद्धिश्राद्धप्रयोगः।। ।।पूर्ववद्गोर्यादीनांब्राह्म्या
दीनांचपूजांकृत्वासदूर्वाकुशानक्षताञ्जलेंश्चादायसत्यवसुसंज्ञकाविश्वेदेवाभूर्भुवःस्वःइदंवः
पाद्यंमातृपितामहीप्रपितामह्यःनांदीमुख्यःभूर्भुवःस्वःइदंवःपाद्यं।पितृपितामहप्रपितामह
ाःनांदीमुखाःभूर्भुवःस्वःइदंवःपाद्यंमातामहमातुःपितामहमातुःप्रपितामहाःनांदीमु
खाःसपत्नीकाःभूर्भुवःस्वःइदंवःपाद्यंइत्युक्त्वासर्वत्रपात्रेसदूर्वाक्षतंजलंक्षिपेत्।।एवमेव
पुनःसत्यादीन्विश्वेदेवान्मात्रादीःपित्रादीन्मातामहादीश्चस्त्रीःसंबुध्योक्त्वापूर्ववद्याद्यादि
भिरिदमासनगंधाद्युपचारकल्पनंस्वाहानममेतिदूर्वाक्षतगंधपुष्पजलानिप्रत्येकंपात्रे
क्षिपेत्।।ततोविनायकाद्याःगोर्यादिषोडशमातरश्चभूर्भुवःस्वःइदंवोयुग्मान्

१८ ह्मणभोजनपर्याप्तमन्नंयथाशक्तिसोपस्करमनुरूपेणस्वाहान ममेतिदूर्वादीनिक्षिपेत्॥एवंविश्वेभ्योदेवेभ्योमात्रादिभ्यःपित्रादिभ्योमातामहादिभ्यःसपत्नीकेभ्यःसंबुध्या दद्यात्॥अन्नासंभवेअन्नपदस्थानेइदंदास्यमानंवासोपस्करमाममितिवदेत्॥नत्वेचतुर्गुणंद्विगुणंसमंवा॥हिरण्यं हिरण्यप्रतिनिधिभूतंद्रव्यंवेतिवदन्यशक्त्यासंकल्पयेत्॥एवंदत्त्वाभ्यःसंकल्पयेत्॥ततःपूर्ववदुपास्येइत्यादिपंचर्चःश्रावयित्वाकृतस्यवृद्धिश्राद्धस्यसंपूर्णतासिद्ध्येदक्षामल्लकेनत्वनिनिधित्वेनद्रव्यंवादक्षिणांसंप्रददेनम मेत्यक्षय्यंप्रजापतेनत्वदिमंत्रंजप्त्वाअनेननांदीश्राद्धेननांदीमुखदेवताः प्रीयंतांवृद्धिरस्तु॥मातापितामहीचैवेतिउक्तंश्लोकद्वयंजपेत्॥ततःआचांतःकिंचिद्द्रव्यंइक्षामभ्रुतिमंत्रंजपन्संकल्पपात्रे संघट्टनैश्राद्धंकुर्यादिति॥ततोमातृकाविसर्जयेत्॥जीवन्मातृकस्यनमातृपार्वणं॥ १८

न

जीवन्मातामहस्यनमातामहपार्वणंद्वारलोपात्॥जीवत्पितृकस्तुयेभ्यःपितादद्यात्तेभ्योदद्यादित्युक्तमेव॥ ॥इतिश्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टविरचितेत्रयोगरत्नेवृद्धिश्राद्धप्रयोगोनिर्णयसहितः॥ ॥अथकौतुकबंधप्रयोगः॥ ॥सचप्रचुराचाराभावात्संक्षेपतःसूक्तादिमात्रंगृहीत्वालिख्यते॥आचार्योदर्भमयकूर्चेउदकुंभंनिधायसाक्षतकांस्यपात्रेपंचगुणीकृतंकार्पाससूत्रंनिधायतत्समीपेप्राङ्मुखंयजमानमुपवेश्यसकुशाक्षतैःसहकुंभोदकेनतत्सूत्रंमंत्रैरभिषिंचेत्॥तेचमंत्राः॥तत्सवितुर्विश्वामित्रःसवितागायत्री॥ अ अग्निमीळेमधुछंदाअग्निर्गायत्री॥सूत्रप्रोक्षणेविनियोगः॥एवमुत्तरत्र॥इषेत्वोर्जेत्वा॥अग्न आयाहिवीतयेशंनोदेवीरभिष्टयेआपोहिष्ठेतिनवर्चस्यसूक्तस्यांबरीषःसिंधुद्वीपआपोगायत्री॥पंचमीवर्धमानासप्तमीप्रतिष्ठाअंत्येद्वेअनुष्टुभौ॥एतोन्विंद्रंमिगिरस्तिरश्चीरिं

ष्टुनुष्टुप्॥ ऋतंचेति तृचस्याघमर्षणोभाववृत्तोनुष्टुप्॥ पञ्चार्द्धर्यश्यावश्वोमरुतोजगती।
स्वस्तिनोमिमीतांस्वस्यात्रेयोविश्वेदेवास्त्रिष्टुप्॥ स्वादिष्ठयेतिदत्रार्चस्यसूक्तस्यमधुछंदाःप
वमानसोमोगायत्री॥ रक्षोहणमितिपंचविंशत्यृचस्यसूक्तस्यभारद्वाजःपायूरक्षोहाग्निस्त्रि
ष्टुप्॥ अंत्याश्चतस्रोनुष्टुभः॥ रात्रीव्यख्यदित्यष्टर्चस्यसूक्तस्यसोभरःकुत्सिकोरात्रिर्वाभारद्वा
जीरात्रिस्तवंगायत्री॥ कृणुष्वेतिपंचदत्रार्चस्यसूक्तस्यवामदेवोरक्षोहाग्निस्त्रिष्टुप्॥ नरक्षमं
दीतिचतुर्णांअवत्सारःपवमानसोमोगायत्री॥ सहस्रशीर्षेतिषोडर्चस्यसूक्तस्यनारायणःपु ऋ
रुषोनुष्टुबंत्यास्त्रिष्टुप्॥ विष्टोर्नुकमितिषडर्चस्यसूक्तस्यौचथ्योदीर्घतमाविष्णुस्त्रिष्टुप्॥
अतोदेवाइतिषडर्चस्यसूक्तस्यकाण्वोमेधातिथिर्विष्णुर्गायत्री॥ परोमात्रयेतिसप्तर्चस्यसू
क्तस्यमैत्रावरुणोवसिष्ठोविष्णुस्त्रिष्टुप्॥ हिरण्यवर्णामितिपंचदत्रार्चस्यसूक्तस्यनंदकर्द १९

मचिक्लृप्तेंदिरासुताऋषयःश्रीरग्निर्देवताआद्यास्तिस्रोनुष्टुभः॥ कांसोस्मितेतिबृहतीउत्त
रयोस्त्रिष्टुप्॥ अश्वावतीत्याद्यस्तारपंक्तिः॥ यज्ञायतइत्याद्याःशिवसंकल्पाद्याःषण्मंत्राः
परऋग्वेदायाः॥ विहिहोत्रेतिपंचर्चस्यसूक्तस्यवामदेवोगोतमोवायुरनुष्टुप्॥ मुंचामित्वेतिपंच
र्चस्यसूक्तस्यप्राजापत्योयक्ष्मनाशनइंद्रस्त्रिष्टुबंत्यानुष्टुप्॥ स्योनापृथिवीतिमेधातिथिर्भूमि
र्गायत्री॥ इदंविष्णोदाआंगिरसःकुत्सोइदंविष्णोदास्त्रिष्टुप्॥ सवितापश्चातात्पुनाकोत्पुनोविश्वेदे
वाजगती॥ नवोनवोभवतिसूर्यासावित्रीचंद्रमास्त्रिष्टुप्॥ विद्युन्नयापनंतीपुरूरवाउर्वशीत्रिष्टु
प्॥ उलूकयातुंवसिष्ठइंद्रस्त्रिष्टुप्॥ पित्र्यंगभृष्टिमंदैवोदासिःपुरुषइंद्रोगायत्री॥ एतैःसर्वैर्म
त्रैःसूक्तमभिषिच्य जातवेदसेमारीचःकश्यपोजातवेदाग्निस्त्रिष्टुप्॥ अनेनगंधेनसूक्तंविलि अ
प्य विश्वेत्तातेभार्गवोनेमइंद्रोजगती॥ अनेनपुंसोदक्षिणहस्तेबध्नीयात्॥ श्रियेजातःकण्वःपव

२०

मानसोमस्त्रिष्टुप्।अनेनस्त्रियावामहस्तेबध्नीयात्॥ततःआचार्योऽस्त्विजश्चयजमानस्य
मंत्रैरक्षांकुर्युः।तेचमंत्राः।त्रातंजीवेतिहूयोःग्राजापत्योयक्ष्मनाशनइंद्रस्त्रिष्टुबंत्यानुष्टुप्।
येयज्ञेनेत्यष्टर्चस्यसूक्तस्यमानवोनाभानेदिष्ठोविश्वेदेवाआद्याश्चतस्रोजगत्यःपंचम्यनु
ष्टुप्षष्ठीबृहतीसप्तमीसतोबृहतीअष्टम्यनुष्टुप्।त्र्यंबकंयजेसुगंधिंपुष्टिवर्धनंउर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्।एतैर्मंत्रैरक्षा
यांकृतायांयजमानकृतकर्मसाफल्यार्थमाचार्यायऋत्विग्भ्यश्चयथाशक्तिदक्षिणांदद्यात्।
अन्येभ्योपिभूयसींदद्यादिति॥ ॥इतिश्रीमद्बृहद्रामेश्वरसूरिसूनुनारायणभट्टकृतेप्रयो
गरत्नेकौतुकबंधप्रयोगः॥ ॥अथग्रहयज्ञः॥ ॥सचनित्यनैमित्तिककाम्यभेदेनत्रेधा॥अय
नविषुवोपरागादिषुनित्यः॥गर्भाधानादिकर्मप्रारंभेषुनैमित्तिकः॥विशेषसंपदादिकाम्यः।
अत्रमूलान्याकरतोज्ञेयानिग्रहरूपादिज्ञात्वाकर्मकार्यंअन्यथाविफलं॥तदाहाश्वलायनो

क

२०

दर्प कामनासु२

१×समित्कुंडोपहाराश्चपुष्परत्नाकृतीरपि॥गायत्रीमूलमंत्राश्चनाममंत्राश्चकेवलान्॥

चार्यः॥रूपवर्णायुधस्थानमंडलासनवाहनान्यधिपत्यधिदेवानांमंत्रांश्चर्ष्यादिसंयुता
न्यतन्त्रमूर्तेश्चैयाद्योध्यन्चर्चन्नैग्रहान्॥अज्ञात्वैवपुमानिष्टातत्फलंनैवविंदति॥इदंख

ज्ञानी

च

चाभोक्तिसुमहद्यत्नादिष्ट्वाप्यविपुमानिति॥गायत्रीग्रहंगायत्रीप्रयोगेवक्ष्यते॥वर्णादयश्च।
मंडपकुंडादिचकार्येयथोक्तंकार्यंनित्यनैमित्तिकयोस्तुनित्यं॥नित्यनैमित्तिकंहित्वासर्वम
न्यत्समंडपमितिमत्स्योक्तेः॥कुंडेवास्थंडिलेपिवेति॥आर्यिकेश्च।मंडपलक्षणंहेमाद्रौम

चा

त्स्यपुराणे॥गृहस्योत्तरपूर्वेणमंडपंकारयेद्बुधः॥रुद्रायतनभूमौवाचतुरस्रमुदक्प्लवंदश
हस्तानथाष्टौवाहस्तांकुर्याद्विधानतः॥तस्यद्वारापिचत्वारिकर्त्तव्यानिविचक्षणैः॥कुंडंच

न

स्कंदपुराणे॥नवग्रहमरवेकुंडंहस्तमात्रेणतत्॥चतुरस्रमधोहस्तंयोनिवक्त्रंसमेखलं॥चतु रसं
रंगुलविस्तारमेखलास्तद्दुश्चितः॥मास्ये॥वितस्तिमात्रायोनिःस्यात्षडंगुलविस्तृता॥

कूर्मपृष्ठोन्नतामध्ये पार्श्वयोश्चांगुलोछ्रिता ॥गजोष्ठसदृशीनद्वदायुताछिद्रसंयुता॥मेरव
लोपरिसर्वत्रअश्वत्थदलसंनिभा॥गजोष्ठतुल्याश्वत्थदलतुल्यौविकल्पः॥साचयोनिःपश्चिम वेति
तःकार्या॥पश्चिमेमध्यभागेतुयोनिंकुर्याद्विधानत इतिगर्गोक्तेः॥मात्रेयमान हीनाधिकंकुंड
मनेकभयदंभवेत्॥तस्यचोत्तरपूर्वेतु स्थंडिलंहस्तमात्रकं॥त्रिवप्रंचतुरस्रंचवित स्त्युछ्रायसंमि
तं॥स्थंडिलंवेदिःवप्रमेखलाःद्विरंगुलोछ्रितोवप्रःप्रथमःसमुदाहृतः॥अंगुलोछ्रायसंयुतं
वप्रद्वयमथोपरि॥ह्यंगुलस्तत्रविस्तारःसर्वेषांकथितोबुधैरिति॥अन्यत्सर्ववर्णदेशनामादि
प्रयोगेस्पष्टीभविष्यति॥ ॥अथयज्ञप्रयोगः॥ ॥यजमानःस्नात्वानित्यकर्मनिर्वर्त्यमोङ्कृति य
कोनेकालेदेशेकालौसंकार्यअयनादिनित्यकालेषुसंकल्पयेत्॥यद्वानुकूल्यसिद्धिद्वाराश्री
परमेश्वरप्रीत्यर्थंयद्वयज्ञंकरिष्यइति॥गर्भाधानादिनिमित्तेषुअमुककर्मकर्तुमादौआदिशा २१

र थं

द्धि यद्वानुकूल्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंयद्वयज्ञंकरिष्यइति॥विपद्वपगमादिकामना
यांतुअमुककामनासिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंयद्वयज्ञंकरिष्यइति॥तैःसंभारान्संभृ त
रेत्॥तत्रनित्येनैमित्तिकयोःप्रतिपदोक्तवस्तूनितदभावेनुकल्प रूपाणिवायथाशक्तिसं
पादयेत्॥काम्येतुप्रतिनिध्यभावात्प्रतिपदोक्तवस्तून्येव॥ततआचार्यादिवरणं॥तत्रवि
धिज्ञंस्नातंसावित्रंसाचारमेकंअस्मिन्यद्मरेत्वमाचार्यंकुर्वितिपाणिनापाणिमुप
स्पृश्यवृणुयात्॥अन्यानार्त्विज्यंकुर्वितिप्रत्येकंवृणुयात्॥तेचहोमानुसारेणचत्वारोष्टौ
षोडशवा॥तेचकरिष्यामीत्युक्त्वाआचामेयुः॥ततोयजमानस्तान्यथाशक्त्यर्चयेत्॥ततःआ
चार्यःकर्मसंकल्पपूर्वकंगृहादुत्तरतऐशानेवाकृतायांचतुर्दिक्षुहस्तमात्रावरायांचतु
स्त्रि द्व्यंगुलप्रमाणत्रिभूमिकायांयद्वेद्यांशुक्लव्रीहितंडुलैःसकर्णिकमष्टदलमंबुज

सुलिख्यकर्णिकायांदलेषुचवर्तुलादिग्रहपीठानितन्नद्वर्णाक्षतैर्यथोपपन्नैर्वाकुर्यात्॥
तानीत्थं॥मध्येरक्ताक्षतैर्वर्तुलं॥आग्नेयदलेशुक्लाक्षतैश्चतुरस्रं॥दक्षिणदलेरक्ताक्षतैस्त्रि
कोणं॥ईशानदलेहरिताक्षतैर्बाणाकारं॥उत्तरदलेहरिताक्षतैर्दीर्घचतुरस्रं॥पूर्वदलेशु
क्लाक्षतैःपंचकोणं॥पश्चिमदलेकृष्णाक्षतैश्चापाकारं॥नैर्ऋत्यदलेकृष्णाक्षतैःशूर्पाका
रं॥वायव्यदलेचित्राक्षतैर्ध्वजाकारमिति॥ततःउदीच्यांरंगवल्लिकारंजितपट्टोपरिधृतधा
न्यपीठेनवमन्त्रेणमकालकंठेनजसंमृन्मयंवानुलिप्तमलंकृतंशुभमभिषेककुंभंनिधायइमं
मेगंगइत्यस्यसिंधुक्षित्रेयमेधोनदीस्तुनिर्जगती। अनेनपुण्यजलेनपूरयित्वासूत्रेणवस्त्र
युग्मेनवावेष्टयहयगजवल्मीकऋद्गोष्ठराजद्वारचतुष्पथमृदः।उद्धतासिवराहेणकृष्णेनश
तबाहुना॥मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं॥इतिकुंभेनिक्षिप्य॥रुवतिभीमइत्यस्य २२

सितेजो

विश्वामित्रोरेणुःपवमान सोमो जगती॥अनेनन्यग्रोधाश्वत्थप्लक्षजंबूचूतवृक्षत्वचः॥प्रवोय
ज्ञेषित्यस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप्॥अनेननेषांपल्लवान्निक्षिप्य॥अप्यायस्वसमेतुनइत्यस्य
राहूगणोगोतमःसोमोगायत्री॥अनेनगोक्षीरंदधिकाव्याइत्यस्यगोतमोवामदेवोदधिक्रावा
नुष्टुप्॥अनेनदधिशुक्रमसिज्योतिरसीतिघृतं।गंधद्वारेत्यस्यानंदःश्रीरनुष्टुप्॥अनेनगोमयंगा
यत्र्यागाथिनोविश्वामित्रःसवितागायत्री।अनेनगोमूत्रंचनिक्षिप्य॥सहिरत्नानीत्यस्यश्यावाश्वः
सवितागायत्री।अनेननवरत्नानि।याऔषधीरित्यस्याथर्वणोभिषग्गोपथ्योनुष्टुप्।अनेनसर्वौ
षधानितदभावेतन्मूलानितदभावेसुवर्णवागंधद्वारामितिगंधंनिक्षिप्यासर्वेसमुद्राःगंगेच
यमुनेचेति।इमंमेगंगेइत्येतैर्मंत्रैः।आपोहिष्ठेतिनवर्चस्यसूक्तस्यांबरीषःसिंधुद्वीपआपोगा
यत्री।पंचमीवर्द्धमानासप्तमीप्रतिष्ठाअंत्येदेअनुष्टुभौ।अनेनसूक्तेननदितेक्षत्रमित्याद्येकविं

त्यचामाजीगर्तिःशुनःशेपोवरुणआद्यादश त्रिष्टुभः त्रिष्टागायत्र्यौस्वादिष्ठयेतिदशर्चं आप्तिः
स्यसूक्तस्यमधुच्छंदाःपवमानसोमोगायत्री।अनेनसूक्तेनचनंकुंभमभिमंत्रयेत्॥यद्वाकल
शाभिमंत्रणेऽन्यंमंत्रविदंनियुंजीत।ततःकर्मसंकल्प्यविधिवत्स्वस्तिवाचनंकृत्वाग्रहवेदिपद्म
पीठेयथास्थानंयथामुखीर्यंहप्रतिमांस्थापयित्वादक्षिणावामपार्श्वयोरधिदेवनाप्रत्यधिदेवते
तदभिमुख्योस्थापयेत्॥तदग्रेपुष्पाक्षतादिघावाहयेत्॥तत्रायंप्रकारः॥व्यस्तसमस्तव्या
हृतीनामत्रिभृगुभरद्वाज प्रजापतयऋषयः।अग्निवायुसूर्यप्रजापतयोदेवताः।गायत्र्युष्णि
गनुष्टुप्बृहत्यश्छंदांसि॥ॐभूरादित्यमावाहयामि।ॐभुवरादित्यमावाहयामि।ॐस्वरादि
त्यमावाहयामि।ॐभूर्भुवःस्वरादित्यमावाहयामि।आकृष्णेनेत्यस्यहिरण्यस्तूपःसविताऽत्रिष्टुप्।
आकृष्णेनेत्यचसुचार्यभगवन्नादित्यग्रहाधिपतेकाश्यपसगोत्रकलिंगदेशेश्वरजपापुष्पोप २३

ने

मांगधुतेद्विभुजपद्माभयहस्तसिंदूरवर्णांबरमाल्यानुलेपनज्वलन्माणिक्यरत्नचित्तसर्वा
भरणभास्वरतेजोनिधेत्रिलोकपद्मकात्मकत्रिदेवतामयमूर्तेनमस्तेसप्तहरुणध्वजपता
कोपशोभितेनसप्ताश्वरथवाहनमेरुंप्रदक्षिणीकुर्वन्नागच्छाग्निरुद्राभ्यांसहपद्मकर्णिका
यांतामग्रप्रतिमांप्राङ्मुखींवर्तुलेपीठेऽधितिष्ठपूजार्थंत्वामावाहयामिइत्यादित्यमावाहयेत्॥
तद्दक्षिणपार्श्वे॥ॐभूरादित्याधिदेवमग्निमावाहयामि।ॐभुवरा०मग्निमावा०।ॐस्वरा०
मग्निमा०।ॐभूर्भुवःस्वरा०मग्निमा०।अग्निंदूतमित्यस्यकांण्वोमेधातिथिरग्निर्गायत्री।
इमंमंत्रमुच्चार्यपिंगभ्रूश्मश्रुकेशंपिंगाक्षंत्रिनयनंअरुणवर्णंछागस्थंसाक्षसूत्रंसप्तार्चि
षंशक्तिधरंवरदहस्तंहव्यमादित्याधिदेवमग्निमावाहयामि॥तद्वामपार्श्वे॥ॐभूरादित्यप्र
त्यधिदेवंरुद्रमावाहयामि।ॐभुवरा०रुद्रमा०।ॐस्वरा०रुद्रमा०।ॐभूर्भुवःस्वरा०रुद्रमा०।

त्र्यंबकमितिमंत्रस्यवसिष्ठस्त्र्यंबकोनुष्टुप्।इमंमंत्रमुच्चार्यत्रिलोचनंपंचवक्त्रंवृषारूढंकपा
लशूलखड्गंधारिणंचंद्रमौलिंसदाशिवमादित्यप्रत्यधिदेवंरुद्रमावाहयामि॥तद्दक्षिण
पूर्वदले।ॐभूःसोममावाहयामि।ॐभुवःसोममावाहयामि।ॐस्वःसोममावाहयामि।ॐ
भूर्भुवःस्वःसोममावाहयामि।अप्यायस्वेत्यस्यगोतमःसोमोगायत्री।इमंमंत्रमुच्चार्यभगवन्सो
मद्विजाधिपतेसुधामयशरीरात्रिगोत्रयमुनादेव्रीश्वरगोक्षीरधवलांगकांतेद्विभुजगदा
वरदानांकितकरशुक्लांबरमाल्या नुलेपनसर्वांगमुक्तमौक्तिकाभरणरमणीयसमस्त
लोकाप्यायकदेवतास्वाघमूर्तेनमस्तेसन्नद्धध्वजपताकोपशोभितेनदग्राश्वेताश्वर
थवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागलाङ्गिरसमयाचसहपद्मग्नेयदलमध्येस्फटिकप्रतिमांत्र
त्यम्बुरवीचतुरस्रपीठेधितिषपूजार्थंत्वामावाहयामि।तद्दक्षिणपार्श्वे।पूर्ववद्यस्तसम २४

स्तव्याहृत्युच्चारणानंतरंअप्तमइत्यस्यसिंधुद्वीपऋषिर्गायत्रीइमंमंत्रमुच्चार्यस्त्रीरूपधारि
णीःश्वेतवर्णामकरवाहनाःपाशकलशधारिणीर्मुक्ताभरणभूषिताःसोमाधिदेवतामपआ॰
वाहयामिपार्श्वेव्यस्तसमस्तव्याहृत्युच्चारणानंतरंगौरीर्मिमायेत्यस्यदीर्घतमाउमाजगती।इमंमंत्र
मुच्चार्यक्षसूत्रकमलदर्पणकमंडलुधारिणीत्रिदशापूजितांसोमप्रत्यधिदेवतांगौरीमावाह
यामि।अथदक्षिणदले।पूर्ववत्प्रणवव्याहृत्युच्चारणानंतरंअग्निर्मूर्द्धेत्यस्यविरूपांगारको
गायत्रीइमंमंत्रमुच्चार्यभगवन्नंगारकाभ्याकृतेभारद्वाजगोत्रावंतिदेशेश्वरप्रवालपुंजोपमांग
द्युतेचतुर्भुजशक्तिशूलगदाखड्गंधारिन्रक्तांबरमाल्यानुलेपनप्रवालाभरणभूषितसर्वां
गसिंदूरालोकदीप्ते नमस्तेसन्नद्धरक्तध्वजपताकोपशोभितेनरक्तमेषरथवाहनेनमेरुंप्रद
क्षिणीकुर्वन्नागलभूमिस्कंदाभ्यांसहपद्मदक्षिणदलमध्येरक्तचंदनप्रतिमांदक्षिणामुरवी

त्रिकोणपीठेऽधितिष्ठपूजार्थंत्वामा०।दक्षिणपार्श्वेव्याहृत्युच्चारणानंतरंस्योनापृथिवीत्य
स्य मेधातिथिर्भूमिर्गायत्री।इमंमंत्रमुच्चार्यशुक्लवर्णोदिव्याभरणभूषितांचतुर्भुजांसौम्य
वपुषंचंडांशुसदृशांवरंरत्नपात्रमस्यपात्रौषधिपात्रयज्ञोपेतकरांचतुर्दिङ्नागपृष्ठगतांअं
गारकाधिदेवतांभूमिमा०।तद्वामपार्श्वेव्याहृत्युच्चारणानंतरं।कुमारश्चित्पितरमित्यस्य
गृत्समदस्कंदस्त्रिष्टुप्।इमंमंत्रमुच्चार्यषण्मुखंत्रिनेत्रंखंडकविभूषणंरक्तांबरधरंमयूरवाहनं
कुक्कुटध्वंजपताकान्वितंचतुर्भुजमंगारकप्रत्यधिदेवतांस्कंदमा०।ततःप्रागुत्तरदलेपूर्व
वद्व्याहृत्युच्चारणानंतरं।उद्बुध्यध्वमित्यस्यबुधःसौम्यस्त्रिष्टुप्।इमंमंत्रमुच्चार्यभगवन्सौम्यसौम्या
ऽतेसर्वज्ञानमयात्रिनेत्रमगधदेशेश्वरंकुंकुमवर्णंगदिनंचतुर्भुजंखड्गखेटकगदावरद
नांकितकरंपीतांबरमाल्यानुलेपनमरकताभरणोज्ज्वलसर्वांगंविबुधपतेनमस्तेसन्नद्धरू
पं

तपताकोपशोभितेनचतुःसिंहरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छविष्णुपुरुषाभ्यां
सहपद्मेशानदंमध्येसुवर्णप्रतिमामुद्गरखेटबाणाकारपीठेधितिष्ठपूजार्थंत्वामा०।ततस्त्व
मार्घ्योरधिप्रत्यधिदेवतयोरावाहनंव्याहृतीरुक्त्वा।इदंविष्णुरित्यस्यकाण्वोमेधातिथि
र्विष्णुर्गायत्री।सहस्रशीर्षेत्यस्यनारायणःपुरुषोनुष्टुप्।इमोमंत्रावुच्चार्यकौमोदकीपद्मं
खचक्रोपेतचतुर्भुजंसौम्याधिदेवतांविष्णुमा०।प्रत्यधिदेवतांपुरुषमा०।उत्तरदलेपूर्ववद्व्या
हृत्यनंतरं।बृहस्पतेअतीत्यस्यगृत्समदोबृहस्पतिस्त्रिष्टुप्।इमंमंत्रमुच्चार्यभगवन्बृहस्पते
समस्तदेवताचार्यांगिरसगोत्रसिंधुदेशेश्वरंदीप्तसुवर्णसदृशांगदीप्तेचतुर्भुजदंडकमंड
ल्वक्षसूत्रवरदानांकितपीतांबरमाल्यानुलेपनपुष्परागमयाभरणंमणीयस्त्रमस्तविद्याधि
पतेनमस्तेसन्नद्धरूपंतध्वजपताकोपशोभितेनपीताश्वरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नाग

छेंद्रब्रह्मभ्यांसहपद्मोत्तरदलमध्येसुवर्णप्रतिमामुदग्रुखींदीर्घचैरत्नपीठेअधितिष्ठपूजार्थं तु
त्वामावा०।तद्दक्षिणपार्श्वेव्याहृत्यनंतरंइंद्रश्रेष्ठानीत्यस्यगृत्समदइंद्रस्त्रिष्टुप्।इमंमंत्रमुच्चार्य
चतुर्दंतगजारूढंवज्रांकुशधरंप्राचीपतिंनानाभरणभूषितंबृहस्त्यधिदेवतामिंद्रमा०।वाम
पार्श्वेव्याहृत्यनंतरंब्रह्मणानेब्रह्मयुजेत्यस्यविश्वामित्रोब्रह्मात्रिष्टुप्।इमंमंत्रमुच्चार्यपद्मासनस्थं
जटिलं चतुर्मुखमक्षमालास्रुवपुस्तककमंडलुधारिणंरक्ताजिनवाससंपार्श्वस्थितहंसबृहस्प
तिप्रत्यधिदेवतांब्रह्माणमा०।आग्नेयेपूर्ववद्व्याहृत्यनंतरंशुक्रंतेअन्यदित्यस्यभरद्वाजःशुक्रस्त्रि
ष्टुप्।इमंमंत्रमुच्चार्यभगवन्भार्गवसमस्तदैत्यगुरोभार्गवगोत्रभोजकटदेशेश्वररत्नोज्वलांगकां
तेचतुर्भुजदंडकमंडल्वक्षसूत्रवरदानांकितशुक्लांबरमाल्यानुलेपनवज्राभरणभूषितसर्वांग
समस्तनीतिशास्त्रनिपुणनमस्तेसन्नद्धशुक्लध्वजपताकोपशोभितेनशुक्लाश्वसहितेनरथेनमे २६

रुंप्रदक्षिणीकुर्वन्नागछेंद्राणीद्राभ्यांसहपद्मपूर्वदलमध्येरजतप्रतिमांप्राङ्मुखींपंचको
णपीठेधितिष्ठपूजार्थंत्वामा०।तद्दक्षिणपार्श्वेव्याहृत्यनंतरंइंद्राणीमास्चित्यस्यवृषाकपि
रिंद्राणीपंक्तिः।इमंमंत्रमुच्चार्यसंतानमंजरीवरदानधरद्विभुजांशुक्राधिदेवतामिंद्राणीमा०।
वामपार्श्वेव्याहृत्यनंतरंइंद्रमिद्देवतातयइत्यस्यमेधातिथिरिंद्रःप्रगाथोबृहती।इमंमंत्र
मुच्चार्यचतुर्दंतगजारूढंवज्रांकुशधरंप्राचीपतिंनानाभरणभूषितंभार्गवप्रत्यधिदेव
तामिंद्रमा०।पश्चिमदलेपूर्ववद्व्याहृत्यनंतरं।ग्नामग्निरिरिंविदिःग्नानेश्वरज्ञिकृ।इमं
मंत्रमुच्चार्यभगवन्ग्नानेश्वरभास्करतनयकाश्यपगोत्रसौराष्ट्रदेशेश्वरकज्जलनीलो
गकांतेचतुर्भुजचापतूणीरकनकपाणीभ्यांकृतनीलांबरमाल्यानुलेपननीलरत्नविभू
षणालंकृतसर्वांगिसमस्तभुवनभीषणामर्षमूर्त्तेनमस्तेसन्नद्धनीलध्वजपताकोपशो

भितेननीलगृध्ररथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छप्रजापतियमाभ्यांसहपद्मपश्चि
मदलमध्येकालायसप्रतिमांप्रत्यङ्मुखंवीरासनाकारपीठेधितिष्ठपूजार्थंत्वामा०तदक्षिण
पार्श्वेव्याहृत्यनंतरंप्रजापतेनत्वदित्यस्यहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्।इमंमंत्रमुच्चा
र्ययज्ञोपवीतिनंहंसस्थमेकवक्त्रमक्षमालास्रुवपुस्तककमंडलुसहितंचतुर्भुजंब्रह्मणेश्व
राधिदेवतांप्रजापतिमा०वामपार्श्वेपूर्ववद्व्याहृत्यनंतरंयमायसोमंसुनुतेत्यस्ययमोय
मोनुष्टुप्।इमंमंत्रमुच्चार्यईषत्पीनंदंडहस्तंरक्तदृग्भांपाशाधरंकृष्णवर्णंमहिषारूढंसर्वाभ
रणभूषितंशानेश्वरप्रत्यधिदेवतांयममा०प्रत्यग्दक्षिणदलाग्रेपूर्ववद्व्याहृत्यनंतरंक
यानश्चित्रइत्यस्यवामदेवोराक्षुर्गायत्री।इमंमंत्रमुच्चार्यभगवन्भास्करविसोममर्दनसिं
हिकानंदनपैठीनसगोत्रबर्बरदेशोद्भवकालमेघद्युतेव्याघ्रवदनचतुर्भुजखड्गचर्मशूल २७

वरदानांकितकृष्णांबरमाल्यानुलेपनगोमेदकाभरणभूषितसर्वांगश्चौर्यनिधेनमस्तेस
नद्दकृष्णध्वजपताकोपशोभितेनकृष्णसिंहरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छसर्प
कालाभ्यांसहपद्मनेर्ऋतदलमध्येसीसप्रतिमांदक्षिणाभिमुखीं शूर्पाकारपीठेधितिष्ठ
पूजार्थंत्वामा०दक्षिणपार्श्वेपूर्ववद्व्याहृतीरुच्चार्याआयंगौरित्यस्यसार्पराज्ञ्यःसर्पागाय
त्री।इमंमंत्रमुच्चारक्षसूत्रधरान्कुंडलिकाकारपुच्छयुक्तानेकभोगांस्त्रिभोगान्भीषणान्
राक्षसाधिदेवताःसर्पानावाह०वामपार्श्वेपूर्ववद्व्याहृतीरुच्चारंमृत्योइत्यस्यसंकुसुको
मृत्युस्त्रिष्टुप्।इमंमंत्रमुच्चार्यकरालवदनंनीलांगंभीषणंपाशदंडधरंसर्पवृश्चिकरोमा
णंराक्षसंप्रत्यधिदेवतांकालमावाहयामि।प्रत्यगुत्तरदलेपूर्ववद्व्याहृतीरुच्चा।केतुंकृ
ण्वन्नित्यस्यमधुच्छंदाःकेतुर्गायत्री।इमंमंत्रमुच्चाभगवन्केतोकामरूपजैमिनिगोत्रमध्य

दिशेश्वरधूम्रवर्णध्वजाकृतेद्विभुजगदावरदानांकितचित्रांबरमाल्यानुलेपनवैडूर्यमया
भरणभूषितसर्वांगचित्रराक्षेनमस्तेसन्नद्धचित्रध्वजपताकोपशोभितेनचित्रकपोतरथवा
हनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छब्रह्मचित्रगुप्ताभ्यांसहवायव्यदलमध्येकांस्यप्रतिमांदक्षि
णामुखींध्वजाकारपीठेऽधितिंपूजार्थंत्वामा०।तदक्षिणपार्श्वेव्याहृत्यनंतरंब्रह्मजज्ञा
नमित्यस्यनकुलोब्रह्मात्रिष्टुप्।इमंमंत्रमुच्चार्यपद्मासनस्थंजटिलंचतुर्मुखमक्षमालास्रु
वपुस्तककमंडलुधरंरक्तांबरंरक्तांगजिनवासंपार्श्वेस्थितहंसकेत्वधिदेवंब्रह्माणमा०।वामपा
र्श्वेव्याहृतीरुच्चार्यसचित्रमित्यस्यभरद्वाजश्चित्रगुप्तस्त्रिष्टुप्।इमंमंत्रमुक्त्वाउदीच्यवेष
सौम्यदर्शनंलेखनीपत्रोपेतदिभुजंकेतुप्रत्यधिदेवं तांचित्रगुप्तमावाहयामि॥अथक
र्मसाक्षिण्यकरदेवतावाहनंशुक्लतंदुलपीठेकुर्यात्।वानेर्वामप्रदेशेव्याहृत्यनंतरंआवृ

नइंद्रेत्यस्यकण्वःसौदीविनायकोगायत्री।इमंमंत्रमुक्त्वाचतुर्भुजंत्रिनेत्रंगजाननंनागयज्ञो
पवीतिनंचंद्रधरंदंताक्षमालापरशुमोदकपात्रंविनायकमा०।तदक्षिणतोव्याहृत्यनंतरंजा
तवेदसइत्यस्यकश्यपोदुर्गात्रिष्टुप्।इमंमंत्रमुक्त्वाशक्तिबाणशूलखड्गचक्रंचंद्रबिंबखेटक
पालशुकटंकेपेटंदशभुजांसिंहारूढांदुर्गांख्यदैत्यासुहारिणींदुर्गामा०।तदक्षिणतोव्याहृत्य
नंतरंक्षेत्रस्यपतिनेत्यस्यवामदेवःक्षेत्रपतिरनुष्टुप्।इमंमंत्रमुक्त्वाश्यामवर्णंत्रिलोचनमू
र्ध्वकेशंसुदंष्ट्रंभृकुटीकुटिलाननंनूपुरालंकृतोघ्रिंसर्पमेखलयायुतसर्वांगमतिक्रुद्धंक्षुद्र
घंटावद्धंगुल्फावलंबिकरोटिकामालाधारिणमुरगकोपीनंचंद्रमौलिंदक्षिणहस्तेःशूल
वेतालखड्गडुंडुभीन्दधानंवामहस्तेःकपालघंटाचर्मचापान्दधानंभीमंदिग्वाससमसिधु
तिंक्षेत्रपालमावाहयामि।तदक्षिणतोव्याहृत्यनंतरंक्राणाग्निभुरित्यस्यत्रितोवायुरुष्णिक्।।

इमंमंत्रमुक्त्वाधावद्वरिणपृष्ठगतंध्वजवरदानधारिणंधूम्रवर्णंवायुमा०।तद्दक्षिणतो
व्याहृत्यनंतरं।आदित्यलेत्यस्यवत्सोंतरिक्षंगायत्री।इमंमंत्रमुक्त्वानीलोत्पलाभंनीलांबर
धारिणंचंद्रार्कौपेतद्विभुजंषंढमाकाशं०आ०।तद्दक्षिणतोव्याहृत्यनंतरं।अश्विनावर्त्ति
रस्मदेत्यस्यराक्षोगणोगोतमो श्विनावुलिक्त्वाइमंमंत्रमुच्चार्यप्रत्येकमोषधीपुस्तको
पेतदक्षिणहस्तावन्योन्यसंयुक्तदेहावेकस्यदक्षिणपार्श्वेपरस्यवामपार्श्वेरत्नभांडंकु
रुशुक्लांबरधारानारीयुग्मोपेतोदेवभिषजावश्विनावावाह०।उत्तरतःव्याहृत्यनंतरं।वा
स्तोष्पतेत्यस्यगृत्समदोवास्तोष्पतिस्त्रिष्टुप्।इमंमंत्रमुक्त्वावास्तोष्पतिंआवा०।अथैक
तुसंरक्षदेवतावाहनंपूर्ववन्नंदुलपीठेषुकुर्यात्।।तत्रेत्थं॥तत्रप्राग्दलाग्रेपूर्ववद्व्याहृ
तीरुक्त्वा।इंद्रंवइत्यस्यमधुच्छंदाइंद्रोगायत्री।इमंमंत्रमुच्चार्यस्वर्णवर्णसहस्राक्षंवज्रपा

णिंराचीप्रियंइंद्रमावा०।आग्नेयदलाग्रेव्याहृत्यनंतरं।अग्नेमीळइत्यस्यमधुच्छंदाअग्निर्गा अग्नि
यत्री।इमंमंत्रमुच्चार्यस्वर्णवर्णसप्तार्चिषंसप्तहस्तंरक्तस्रुक्स्रुवतोमरव्यजनघृतपा
त्रापिदधानं स्वाहाप्रियंमेषवाहनमग्निमा०।याम्यदलाग्रेव्याहृतीरुक्त्वा।यमायसोम
मित्यस्ययमोयमोनुष्टुप्।इमंमंत्रमुक्त्वारक्तवर्णंदंडधरंमहिषवाहनमिळाप्रियंयममा०।
नैर्ऋत्यदलाग्रेव्याहृत्यनंतरंमोषुणइत्यस्यघोरःकण्वोनिर्ऋतिर्गायत्री।इमंमंत्रमुक्त्वा
नीलवर्णंखड्गचर्मधरंमूर्ध्वकेशंनरवाहनंकालिकाप्रियंनिर्ऋतिमा०।पश्चिमदलाग्रेव्या
हृत्यनंतरं।उदुत्तमंमुमुग्धिनइत्यस्यशुनःशेपोवरुणोगायत्री।रक्तभूषणंनागपाशधरं इमंमंत्रमुक्त्वा
मकरवाहनंपद्मिनीप्रियंवरुणमा०।वायव्यदलाग्रेव्याहृत्यनंतरं।नवोनवोयत्यस्यआंगि
रसोव्यश्वोगायत्री।श्यामवर्णंहेमदंडधरंरुरुमृगवाहनंजगत्प्राणरूपंमोहिनीप्रिये

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH

वायुमा०।उत्तरदलाग्नेय्याहुत्यनंतरंत्वन्नःसोमविश्वतइत्यस्यगोतमःसोमोगायत्री।इं
मंमंत्रमुक्त्वास्वर्णवर्णंनिधीश्वरंकुंतपाणिमश्ववाहनंचित्रिणीप्रियंकुबेरमा०।ऐशानदला
ग्नेय्याहुत्यनंतरं।कद्रुद्रायेत्यस्यकण्वोरुद्रोगायत्री।इमंमंत्रमुक्त्वाशुद्धस्फटिकवर्णंव
रदाभयशूलाक्षसूत्रधरंवृषवाहनंगौरीप्रियमीशानमा०।एवंद्वित्रिचतुरिंद्रादेवताआवाह्य
कलशेवरुणंपूर्ववदावाह्यनमोंतैश्चतुर्थ्यंतैःस्वस्वनामभिःक्रमेणपूर्वोक्तद्रव्यैःपुष्पसम
र्पणपर्यंतंग्रहदेवतापूजांकृत्वाकर्मसाक्षिण्यदेवताःक्रतुसंरक्षकदेवतावरुणंचमलय
जगंधश्वेतपत्रपुष्पैस्तथैवपूज ये तू॥ ॥अथहोमः॥ ॥सचरुसमिच्चर्वाज्यैःप्रतिद्रव्यंग्रह
हंएकावृत्तिभिःसहस्रपरावृत्तिभिर्निमित्तवाक्यानुसारेणप्रधानदेवतांशेनपार्श्वदेव
तानांतदर्द्धेनेतरेषांस्वाहांतैर्नामभिस्तत्तन्मंत्रैर्वाघृतेनैवसरुद्रवदानेनचरुहोमः॥तत्र ३०

५रुद्रमर्कसमिच्चर्वाज्यैःप्रधानदेवं५

आचार्यःप्रत्यगग्नेरासीनःप्राणायाम्यपूर्ववत्संकल्प्याग्निमुखंवक्ष्यमाणप्रकारेणाग्नु
त्तरलक्षणेकुंडेस्थंडिलेवोपलेपाद्यग्निप्रतिष्ठापनांतंकृत्वाऋत्विगन्वारब्धःसमिद्वयमादाय
देशकालौनिर्दिश्यअमुकक्ष्यमाणग्रहहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्येअस्मिन्न
ग्नाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाप्रधानदेवतामादित्यमधिदेवतामग्निंप्रत्यधि
दैवतांसोममधिदेवतामपःप्रत्यधिदेवतांगौरीपलाशसमिच्चर्वाज्यैःप्रधानदेवतामंगारकम
धिदेवतांभूमिंप्रत्यधिदेवतांस्कंदंखदिरसमिच्चर्वाज्यैःप्रधानदेवंबुधमधिदेवंविष्णुंप्रत्यधि
दैवंपुरुषमपामार्गसमिच्चर्वाज्यैःप्रधानदेवंबृहस्पतिमधिदेवमिंद्रंप्रत्यधिदैवंब्रह्माणम
श्वत्थसमिच्चर्वाज्यैःप्रधानदेवंशुक्रमधिदेवंइंद्राणींप्रत्यधिदेवमिंद्रमोदुंबरसमिच्चर्वाज्यैःप्र धि
धानदेवंशनिमधिदेवंप्रजापतिंप्रत्यधिदेवंयमंशमीसमिच्चर्वाज्यैःप्रधानदेवंराहुमधिदेवंस

र्पप्रत्यधिदेवंकालंदूर्वासमिच्चर्वाज्यैःप्रधानदेवंकेतुमधिदेवंब्रह्माणंप्रत्यधिदेवंचित्रगुप्तंकुशासमि
च्चर्वाज्यैःविवक्षितसंख्याकैःपार्श्वदेवताःप्रधानदेवौ द्वौनक्रतुसाद्गुण्यदेवताःविनायकंदुर्गांक्षे
त्रपालंवायुमाकाशमश्विनौवास्तोष्पतिंक्रतुसंरक्षदेवताःइंद्रमग्नियमंनिर्ऋतिंवरुणंवायुंकुबे
रंईशानंप्रधानविंशतिद्वौनजग्निवायुसूर्यप्रजापतीस्तिलव्रीहिभिर्विवक्षितसंख्यया।सूर्यमाज्येन
त्रयोदशावारंअग्निंचतुस्त्रिंशद्वारंद्वात्रिंशद्वारंरुद्रंशोषेणास्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमु
क्त्वाभूर्भुवःस्वःस्वाहेत्याज्यावाधायप्रजापतयइदंनममेत्युदगग्नौत्यागंकुर्यात्॥ततोबर्हिःसन्नद्ध
नीयदर्भाग्रद्वयप्रक्षेपांतंकृत्वालौकिकमग्निंद्वान्नतिलव्रीहिभिःसहाज्यंत्रिःपर्यग्निकृत्वाज्यमुद्वा
स्यउत्पूयबर्हिषिनिधायस्रुवस्रुकसंमार्जनंकृत्वाऽन्नंपात्रांतरेपृथक्कृत्वाग्नावधिश्रित्यस्रुवेण
अभिघार्योदगुद्वास्योदक्षिणतोबर्हिष्यासाद्यप्रत्यभिघार्याभ्यलंकरणाज्यभागांतंकृत्वाक्रमेणआ

ज्या
घा

दित्यादिईशानांतेभ्यएकचत्वारिंशद्देवेभ्यःआवाहनोक्तैस्तत्तन्मंत्रैःसमिच्चर्वाज्यैःप्रागुक्तसंख्य
काकुनार्जुकुयात्॥तत्रायंप्रकारः॥समिधंमूलतोद्व्यंगुलंविहायमध्यमानामिकांगुष्ठैर्गृहीत्वाजु
ह्वयात्॥चरुंप्राससमंपाणिनैवाज्यंस्रुवेणैवतदभावेऽश्वत्थपर्णेनवा॥ततोव्यस्तसमस्तव्याहृतिभि
श्चभूततिलव्रीहीन्याणिनाकृत्वासूर्यपावकरुद्रानाज्येनजुह्वयान्मंत्रैः॥तत्रमंत्राः॥सूर्योनइतिपंच
र्चस्यसूक्तस्यसूर्यपुत्रश्चक्षुःसूर्योगायत्री।उदुत्यमितिमंत्रस्यकण्वपुत्रःप्रस्कण्वःसूर्योगायत्री।न
मोमित्रस्येतिमंत्रस्यसूर्यपुत्रोमितपाःसूर्योजगती।चित्रंदेवानामितिमंत्रस्यआंगिरसःकुत्सःसूर्य
स्त्रिष्टुप्।उद्वेतिसुभगइतिपंचर्चस्यमैत्रावरुणोवसिष्ठःसूर्यस्त्रिष्टुप्॥त्वमग्नेप्रथमइत्यष्टादश
स्यसूक्तस्यांगिरसोहिरण्यस्तूपोगिर्जगतीअंत्याष्टमीषोळश्यस्त्रिष्टुभः॥त्वमग्नेद्युभिरितिषोळश
र्चस्यसूक्तस्यऋत्समदोग्निर्जगती।कद्रुद्रायेतिषंणांघोरःकण्वोरुद्रोगायत्री।तृतीयामैत्रावरुणीइ

मारुद्रायतवसइत्येकादशर्चस्यसूक्तस्यकुत्सोरुद्रोजगत्यंत्येत्रिष्टुभौ॥आतेपितर्मरुतामितिपंचैशर्चस्यसूक्तस्यगृत्समदोरुद्रस्त्रिष्टुप्॥एतैरेकोनाशीतिमंत्रैःप्रतिमंत्रंस्वाहांतैराज्यंहुत्वाघृतादित्रयाब्दैर्वैद्यामाराधितेकचत्वारिंशद्देवताभ्योवरुणायधूपदीपनैवेद्यतांबूलादीन्समर्पयसीदंतुभवंतइतिताःसंप्रार्थ्यऋत्विगन्यारब्धश्रुतिलक्षहिरण्येषणस्विष्टकृतंहुत्वाइध्मसन्नहनमग्नेःप्रास्यप्रायश्चित्तादिहोमंशेषंसमाप्ययजमानान्यारब्धआचार्यःपूर्णाहुतिंस्थालीयाकेवक्ष्यमाणप्रकारेणहुत्वाविश्वेभ्योदेवेभ्यःसंस्रावंहुत्वापूर्णपात्रनिनयनोपस्थानपरिस्तरणविसर्जनपरिसमूहनपर्युक्षणाग्न्यर्चनपात्रोत्सर्जनादिकुर्यात्॥अथमंडपेशानेयंचरंगैःस्वस्तिकंकृत्वाचतुष्पादंदीर्घचतुरस्रंसोत्तरच्छदंतत्रपीठंनिधायतत्रोदगग्राहरितदर्भानास्तीर्यतत्रसामान्यंयजमानंप्राङ्मुखमुपवेश्याचार्यऋत्विभिःसहमंगलवाद्यैरभिषेककुंभोदकंपात्रांतरेआदाय ३२

समूलान्२



प्रत्यङ्मुखस्तिष्ठंसपलाशायोडुंबर्यार्द्रयाशाखयासहिरण्यपवित्रयासकुशाद्रूर्वापल्लवयाहस्तमंतर्द्धायोदकधृषद्भिरब्लिंगाभिर्वारुणीभिःपावमानीभिरन्याभिश्चाशीतिपवित्रलिंगाभिर्ग्रहाभिषेकमंत्रैःसुरास्त्वामित्यादिभिःइमाआपःशिवतमाइतिऋचेनदेवस्यत्वेतिचयजुषाभूर्भुवःस्वरित्येताभिश्चव्याहृतिभिरभिषिंचेत्॥तेचमंत्राः॥आपोहिष्ठेतिनवर्चस्यसूक्तस्यांबरीषःसिंधुद्वीपआपोगायत्री॥पंचमीवर्द्धमानासप्तमीप्रतिष्ठाभंत्येद्वेअनुष्टुभौ॥प्रसम्राजइत्यष्टर्चस्यसूक्तस्यात्रिर्वरुणस्त्रिष्टुप्॥स्वादिष्ठयेतिदशर्चस्यसूक्तस्यमधुच्छंदाःपवमानसोमोगायत्रीशन्नइंद्राग्नीतिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप्॥पवित्रंतेविततमितिपंचर्चस्यसूक्तस्यांगिरसःपवित्रःपवमानसोमोजगती॥ अथग्रहमंत्राः॥ग्रहाणामादिरादित्योलोकरक्षणकारकः॥विषमस्थानसंभूतांपीडांदहतुतेरविः॥रोहिणीशःसुधामूर्तिःसुधागात्रःसुधाशनः॥

विषमस्थानसंभूतांपीडांदहतुतेविधुः॥भूमिपुत्रोमहातेजाजगतांभयकृत्सदा॥दृष्टिकृद्दृ
ष्टिहर्त्ताचपीडांदहतुतेकुजः॥उत्पातरूपोजगतांचंद्रपुत्रोमहाद्युतिः॥सूर्यप्रियकरोविद्वान्पी
डांदहतुतेबुधः॥देवमंत्रीविशालाक्षःसदालोकहितेरतः॥अनेकशिष्येःसंपूर्णःपीडांदह
तुतेगुरुः॥दैत्यमंत्रीगुरुस्तेषांप्राणदश्चमहामतिः॥प्रभुस्ताराग्रहाणांचपीडांदहतुतेभृगुः॥
सूर्यपुत्रोदीर्घदेहोविशालाक्षःशिवप्रियः॥मंदचारःप्रसन्नात्मापीडांदहतुतेशनिः॥महा
शिरामहावक्त्रोदीर्घदंष्ट्रोमहाबलः॥अतनुश्चोर्ध्वकेशश्चपीडांदहतुतेतमः॥अनेकरूपवर्ण
श्चशतशोथसहस्रशः॥उत्पातरूपोजगतांपीडांदहतुतेशिखी॥ अथदेवमंत्राः॥सुरास्त्वा
मभिषिंचंत्विंद्रस्येंद्रेणमंत्रैः प्रतिमंत्रमभिषिंच्यश्रीसूक्तेनहिरण्यवर्णांहरिणीमित्यादिनाऽष्टर्चे
नायःशिवतमाइतिसक्रमेणदेवस्यत्वेतिचयजुषाभूर्भुवःस्वरित्येताभिश्चव्याहृतिभिर ३३

अभिषिंचेत्॥एवमभिषिक्तोयजमानः॥श्वेतादंत वस्त्रयुगंगंधमाल्याभरणंचबिभृ
यात्॥ततआचार्योदिक्षुविदिक्षुचबलिमुत्क्षिप्यसवासिनाभिर्नीराजनंकारयेत्॥अथय
जमानोयहदेवतास्तुत्यंतदेवतानामभिःपुष्पाणिसमर्प्याचार्यंप्रव्याहृत्योच्चारणपूर्वकं
ग्रहोह्वासनंकारयित्वाआचार्यप्रभृतिभ्योजपहोमफलंगृहीत्वातेभ्योदक्षिणांदद्यात्॥
गोःशंखोरक्तोनड्वान्हिरण्यंपीतंवासःश्वेताश्वःकृष्णाजोःकालायसंहस्तीछागोवेतिय
थाक्रमेण॥अत्रन्यूनदक्षिणाबुधदक्षिणयाहिरण्येनसमाकार्याआद्यगवावा॥एतदभावे
सर्वेभ्योयथाशक्तिहिरण्यंवादद्यात्॥आचार्यायद्विगुणं॥अन्येभ्यश्चयथाशक्तिभूक्तियसं॥
ततःकांस्यपात्रगताज्येरूपंरूपंप्रतिरूपोबभूवेतिमंत्रेणसकुटुंबस्यप्रतिरूपंप्रेक्ष्य॥आ
ज्येनेजःसमुष्टमाज्यंपापहरंस्मृतं॥आज्यंसुराणामाहारआज्येदेवाःप्रतिष्ठिताः॥इतिमंत्रेप

ढित्वातदाज्यंसदक्षिणंब्राह्मणायदद्यात्॥ततोभूरिदक्षिणांदत्वासंकल्प्यवा॥एकस्याऽ
आद्धतेरेकंशतस्यैकंसहस्रस्यवायथाशक्तिब्राह्मणान्भोजयित्वातेभ्यःशांतिःपुष्टिश्चास्त्वि
त्याशिषोगृहीत्वातान्संप्रार्थ्यप्रणिपत्ययस्यस्मृत्याचेतिश्लोकंपठित्वा॥प्रमादात्कुर्वतां
कर्मप्रच्यवेताध्वरेषुयत्॥स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिरितिउक्तान्यूनातिरि
क्तोच्छिष्टार्थंयथाशक्तिअच्युतानंतगोविंदेतिनाममंत्रजपंकृत्वाग्रहयज्ञफलंश्रीविष्णवे
समर्प्यस्वयंहृष्टमनाबंधुभिःसहभुंजीत॥अथंचाश्वलायनगृह्यपरिशिष्टोक्तोग्रहमख
स्मार्ताग्निमतामाश्वलायनानामेवबह्वृचांवास्वगृह्योक्तंयस्यकर्मप्रचोदितं॥तस्यतावति
त्रास्याऽर्थेकृते सर्वःकृतोभवेदितिवचनात्॥एवमन्येषामपियदिस्वगृह्यादावुक्तस्तदास
एव॥येषांतुगृह्यादौनोक्तस्तेर्याज्ञवल्क्यादिस्मृत्युक्तःमत्स्यपुराणाद्युक्तोवानुष्ठेयःस्मृत्य ३४

देःसाधारण्यादितिदिक्॥ ॥इतिश्रीप्रयोगरत्नेनवग्रैमखप्रयोगः॥ ॥अथविवाहोत्त ह
रकर्त्तव्योपिस्थालीपाकःप्रथममुच्यते।तत्रांगानामुक्तानामन्येषांतिदेशेनप्राप्तेः॥सचविवा
हानंतरकर्तव्यगृहप्रवेशानीयहोमोत्तरभाविन्यांपौर्णमास्यामारंभणीयः॥नत्वमौस्यायां॥ वा
चतुर्थ्यहोमात्प्राग्विपोर्णमासीचेत्तत्रारंभः॥यदिचारंभकालेमलमासगुरुशुक्रास्तबा
ल्यवार्द्धिकग्रहणपौषमासादिभवति॥तदापिप्रारंभःकार्यः॥यानितुतत्रारंभनिषेधक
नि।उपरागोधिमासश्चयदिप्रथमपर्वणि।तथामलिम्लुचेपौषेनान्वारंभणमिष्यते॥गुरुभा
र्गवयोर्मौढ्येचंद्रसूर्ययहेतथेत्यादीनिसंग्रहकारादीनिवचनानितानिआलस्यादिनास्व
कालानुपक्रांतस्थालीपाकादिप्रारंभविषयाणीतिप्रयोगपारिजातकारः॥तथाचपरार्क
स्थंगर्गवचनंदाजहार॥नामकर्मचदर्शेष्टिंयथाकालंसमाचरेत्॥अतिपातेसतितयोःप्र

रास्तेमासिपुण्यमेइति॥स्थालीपाकारंभकालः॥' ॥अथपर्वनिर्णयः॥ ॥यौर्णिमादर्शश्च
पर्व॥तत्रान्वाधानंप्रतिपदादृष्टिरित्युत्सर्गः॥तत्रपर्वचतुर्थांशः प्रतिपदश्चाद्यास्त्रयोंऽशा
दयोंशुद्धत्रयेविद्यमानायागकालः॥सूर्यास्तमानपर्यंतंयत्रपर्वाखंडंतत्रतत्संदेहः॥यदि
तुखंडंपर्वतत्रनिर्णयः॥अर्द्धोमध्येतनःपूर्ववापर्वप्रतिपदोःसंधौतदहर्यागः पूर्वेद्युरन्वा
धानंमध्याह्नात्परसंधौतदहरन्वाधानंपरेद्युर्यागइति॥संधिश्चप्रतिपदोर्द्धासह्योर
र्धपर्वणिप्रक्षिप्यज्ञेयः॥इष्टेःपूर्वाणिसमासौपुनरिष्टिकर्त्तव्यतापत्तेः॥साप्रतिपद्येवस
मापनीयानपर्वमध्येअपराह्णसंधौपरेद्युः प्रतिपच्चतुर्थांशोपियागेनदोषः॥चंद्रदर्शनादि
नेइष्टिनिषेधवचनानिनिर्णयकानिसंभवेयोज्यानि॥यातुयौर्णमासीसंगवादूर्ध्वमावर्त्त
नात्पूर्वसंधिमतीसासद्यस्कालेतितस्यामेवान्वाधानंयागश्च॥ ॥अथविकृतेनिर्णयः॥

आवर्तनेततःपूर्ववापर्वसंधौतदहरादौप्रकृतियागंकृत्वापश्चादाग्रयणादिविकृतिःकार्या॥
परंधोतुविकृतियागएवसंधिदिनेप्रकृतिस्तुतदुत्तरदिनेइति॥ ॥अथस्थंडिलकरणादिनिर्ण
यः॥ तत्रचौळादिहोमोलौकिकेग्नौ॥पार्वणस्थालीपाक श्रवणाकर्मादिहोमोगृह्याग्नौ॥तत्र
लौकिकाग्नौहोमेस्थंडिलकरणादिरग्निप्रतिष्ठापनांतोविधिर्नियतः॥गृह्याग्निहोमेपिगृह
प्रवेशावास्तुहोमशूलगवान्वष्टक्यादिषुनियतः॥धार्य्यायतनेतदसंभवात्॥यदापिसमिदाहा
वग्निसमारोपस्तदागृह्याग्निकर्त्तव्येपिस्थालीपाकादौनियतः॥एतत्सर्वमभिप्रेत्ययत्रक्वचनहो
ष्यन्त्यादिनिगद्योक्ताग्निप्रतिष्ठापनविधेर्विषयंप्रदर्शयितुमाहकारिकाकारः॥प्रतिष्ठाप्यथ
लेरवास्तहोमायालंदविर्भुजं॥एतदर्थंप्रकुर्वीतहोष्यत्संस्थापितेनलइति॥अन्यथासंस्थापितेनले
होष्यन्निनित्यर्थस्यात्॥एवंस्थंडिलकरणादिविषयंनिर्णीयस्थंडिलादिकुर्यात्॥ ॥तत्रयजमानः
कृतनित्यक्रियःशुचिःपरिहितधौतवासाःदर्भपाणिरग्नीध्रोपविष्टःशास्त्रुरवोद्गग्यतोद्विराचम्य

प्राणानायम्यदेशकालौसंकीर्त्यश्रीपरमेश्वरप्रीत्यर्थममुककर्मकरिष्ये॥तदंगहोमंकर्तुस्थं
डिलादिकरिष्ये॥इतिसंकल्प्यगोमयादिलिप्तेशुद्धेदेशेशुद्धमृदाईशान्यारंभमुदक्संस्थंचतु
रंगुलोन्नतमंगुलोन्नतंवाचतुर्दिक्षुभिलित्वाद्विःसप्तत्यंगुलपरिधिकंफलितमष्टादशांगुल
विस्तृतंहोमानुसारेणनदधिकंवाननुतनोन्यूनंमध्योन्नतंस्थंडिलंकुर्यात्॥तद्धोमयेनप्रद
क्षिणमुपलिप्यदक्षिणेष्टेउदीच्यांद्वेप्राच्यामर्धमित्यंगुलानित्यक्त्वादक्षिणोपक्रमामुद
क्संस्थांप्रादेशमात्रामेकांलेखांनस्यादक्षिणोत्तरयोःप्रागायतेपूर्वरेखयाअसंस्पृशेप्रादेश
संमितेद्वेलेखेलिखित्वातयोर्मध्येपरस्परमसंस्पृशउदक्संस्थाःप्रागायताःप्रादेशसंमित
स्तिस्रइतिषट्लेखायत्तियन्नाकलमूलेनदक्षिणहस्तेनोल्लिख्यलेखासुनक्षकलमुदगग्रं
निधायस्थंडिलमद्भिरभ्युक्ष्यन्नाकलमाग्नेय्यांनिरस्यपाणिंप्रक्षाल्यवाग्यतोभवेत्॥तत

स्तेजसेनासंभवेमन्मथेनवापात्रयुग्मेनसंपुरीकृत्यसुवासिन्याश्रोत्रियागारात्स्वगृहा
द्वासमृद्धंनिर्धूममग्निमाहृत्यस्थंडिलादाग्नेय्यांनिधाय॥जुष्टोदमूनाआत्रेयोवसुश्रुतोऽग्नि
स्त्रिष्टुप्॥अग्न्याधानेविनियोगः॥ॐजुष्टोदमूनाःअतिथिर्दुरोणइमं नोयज्ञमुपयाहिवि
द्वान्॥विश्वाअग्नेअभियुजोविहत्यशत्रूयतामाभराभोजनानि॥एह्यग्नेराङ्गिरसगणोगोतमोग्नि
स्त्रिष्टुप्॥ॐएह्यग्नइहहोतानिषीदादब्धःसुपुरएताभवानः॥अवतांत्वारोदसीविश्वमिन्वे
यजीमहेसौमनसायदेवान्॥इत्यक्षतेरावाद्याछादनंदूरीकृत्यसमस्तव्याहृतीनांपरमेष्ठी
प्रजापतिःप्रजापतिर्बृहतीअग्निप्रतिष्ठापनेविनियोगः॥ॐभूर्भुवःस्वरित्यात्माभिमुखंपा
णिभ्यांघृतमुलेखासुनक्षकर्मसुविहितनामकममुकमग्निंप्रतिष्ठापयामीतिअग्निंप्रति
ष्ठाप्य॥प्रोक्षितेंधनानिनिक्षिप्यवेणुधमन्याप्रबोध्यध्यायेदेवं॥चत्वारिशृंगादामदेवो

ग्निस्त्रिष्टुप्।अग्निध्याने विनियोगः॥ॐ चत्वारिश्रृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्ता
सोअस्यात्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याआविवेश॥स्मृतिमंत्राश्च॥सप्त
हस्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः॥त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः॥स्वा
हांतुदक्षिणेपार्श्वेदेवीवामेस्वधांतथा॥बिभ्रद्दक्षिणहस्तेसुशक्तिमन्नंस्रुचंस्रुवं॥सोम
पय रंव्यजनंवामेघृतपात्रंचधारयन्॥आत्माभिमुखमासीनएवंरूपोऽग्निरानइति॥ततोयदिस ता
मिदाधेसमारोपितोग्निस्तर्हिप्रत्यवरोहणंकार्यं॥तच्चैवं॥प्रत्यवरोहेत्यस्यमंत्रस्यहि
रण्यगर्भोग्निस्त्रिष्टुप्॥अग्निप्रत्यवरोहणेविनियोगः॥प्रत्यव रोहजातवेदःपुनस्त्वं
देवेभ्योहव्यंवहनःप्रजानन्॥प्रजांपुष्टिंरयिमस्मासुधेह्यथाभवयजमानायशंयोः॥इ
तिमंत्रेणसमारोपिताग्निसमिधंस्थापितेग्नौप्रक्षिपेदिति॥एतदंतंस्थापितेग्नौहोमे ३७

कार्यं॥नित्यधारितहोमेतुनैतावत्॥ततःपार्वणस्थालीपाकेप्रधानदिनासूर्वदिनेस
यस्कालायांपौर्णमास्यामरात्रौवाप्रधानदिनएवप्रातरौपासनंकृत्वान्वाधानंकुर्यात्॥
तच्चेत्थं॥आचम्यप्राणानायम्यसमिद्वयंत्रयंवादायदेशकालौस्मृत्वाममउपात्तदुरितक्ष
यद्वाराश्रीपरमेश्वरप्रीत्यर्थंदर्शपूर्णमासाभ्यांस्थालीपाकाभ्यांयक्ष्येइतिविशेषः॥त
त्रदेवतापरिग्रहार्थमन्वाधानंकरिष्येइतिसंकल्प्याग्निन्वाहितेग्नौजातवेदसमग्निमि
ध्येनप्रजापतिंप्रजापतिंचाघारदेवतेआज्येनअग्नीषोमौचक्षुषीआज्येनाअग्निंअग्नीषो
मौप्रधानदेवतेचरुद्रव्येणा॥दर्शेतुअग्निमिंद्राग्नीचप्रधानदेवतेचरुद्रव्येणेतिविशेषः॥
शेषेणास्विष्टकृतमग्निमिध्मसन्नहनेनरुद्रमयासमग्निंदेवान्विष्णुमग्निंवायुंसूर्यंप्रजाप
तिंचेनाःप्रायश्चित्तदेवताआज्येनज्ञाताज्ञातदोषनिबर्हणार्थंत्रिवारमग्निंमरुतश्चाज्येन

अंगदेवताःप्रधानदेवताःसर्वाःसन्निहिताःसंतुसांगेनकर्मणाश्रोष्यक्ष्ये॥सघस्कालेतुसद्यो
यक्ष्यइतिसंकल्प्यकूष्मांडसमस्तव्याहृतिभिर्वासमिद्धोमंकुर्यात्॥व्याहृतिपक्षेव्याहृतीनामि
त्यादिपूर्ववत्॥अन्वाधानसमिद्धोमेविनियोगः॥ॐभूर्भुवःस्वःस्वाहेति।प्रजापतयेइदं न
ममेतित्यागः॥तंचाग्निंधारयेत्॥संकटेतुतुभ्यंताइत्यृचाज्यंहुत्वासमारोपयेत्॥तुभ्यंताअं
गिरस्तमुविश्वाःसुक्षितयःपृथक्॥अग्नेकामायतेमिरेस्वाहा॥अग्नयइदंनममेति।तत
स्त्रिभिस्त्रिभिःकुशदलैःसव्यपाणिमधोदक्षिणंचोपरिकुर्वंपूर्वदलाग्रेरुत्तरदलेश्च
त्रिसंधिंद्विगुणंरज्जुंकृत्वापुनर्दक्षिणमधःसव्यंचोपरिकुर्वन्नथैवत्रिगुणयेत्॥अंते
प्रदक्षिणंग्रंथिंदद्यात्॥एवंषट्त्रिंशद्दर्भदलैरेकारज्जुर्भवति॥ततस्तस्यामुदगग्रायां
प्रादेशमात्रामुष्टिपरिमितांदर्भान्निधायतयाबर्हिर्द्विरावेष्यरज्ज्वग्रेणरज्जुमूलंसकृ ३८

दावेष्यंतदग्रेणपूर्ववेष्टितरज्ज्वाअधस्तान्निनीयपरिस्तरणार्थदर्भैःसहन्यायतनात
श्चाङ्गोपरिनिदध्यात्॥ततोन्ययातादृग्येवकृतयारज्ज्वाउदग्रयापालाशंखादिरमसं
भवेन्नाभिवादियज्ञियवृक्षमयमरत्निमात्रंवितस्तिमात्रंवापंचदशदारुकमिध्मंभागयं
सकृदावेष्यपूर्ववन्निदध्यात्॥अन्येभ्याबर्हिषोबंधनेकेचिन्मंत्राविछंति॥तत्रबर्हिषि।
इंद्राण्येसुन्नदंनं।पूषातेग्रंथिंग्रंथ्नातुसतेमास्थादिति।इध्मे।यत्कृष्णोरूपंकृत्वाग्नाविंद्रा
स्त्वंवनस्पतीन्॥ततस्तांपंचदशधासंभरामिसुसंभृतोइति॥कृष्णोस्याखरेष्ठोदेवपुरश्चर
सुव्यासंत्वाइति॥एकविंशतिधेत्यत्रपंचदशधेत्यूहेन॥अन्येत्वनूहमाहुः।अपरेतुमंत्रोने
छंति।ततःपत्नीअग्न्यायतनालंकरणंकुर्यात्॥ततोदंपतीगंधादिभिःस्वशरीरेअलंकृ
त्यतद्दिनेकलहक्रयविक्रयहासानृतबहुभाषणचौर्यादिव्यसनपर्यंकशयनदंतधाव

न करंभकुलित्थकोद्रवचणकमसूरवृंताकक्षारलवणकोरद्रूषकमधुमाषमांसमद्यपरा
न्नोपवासतैलमैथुनानिवर्जयंतोदधिघृतपयोमिश्रंहविष्यान्नंदिवैवसकृद्भुंजीयातां॥श्राद्धक
र्तुश्राद्धर्त्रोर्धमाषान्नंभुंजीत॥व्रतलोपेव्रात्यैःसहसंवत्सरेवाजपोष्यत्वमग्नेव्रतपाइत्यूचाज्या
हुतिंजुहुयात्॥त्वमग्नइत्यस्यवत्सोग्निर्गायत्रीव्रतलोपजनितदोषपरिहारार्थमाज्यहोमेविनियो
गः॥ॐत्वमग्नेव्रतपाअसिदेवआमर्त्येधा॥त्वंयज्ञेष्वीड्यःस्वाहा॥व्रतपायअग्नयेइदंनमम॥य
ज्ञानिर्वापादिपूर्वकं व्रतपायाग्नेपार्वणस्थालीपाकेनसमाननंत्रंचरुंप्रधानात्पूर्वंजुहुयात्॥ततः
प्रतिपदि प्रातरौपासनंहुत्वाअग्निंपरिसमुह्यपरिस्तृणीयात्॥तद्यथा॥अग्न्यायतनादक्षांगुलि
मितेदेशेऐशानींदिशमारभ्यप्रदक्षिणंसमंतात्तोदकेनपाणिनात्रिःपरिमृज्यपूर्वमुपरिनि
हितदर्भैर्दशांगुलिमितेदेशेप्राच्यादिषुपरिस्तृणीयात्॥तत्रप्राच्यांप्रतीच्यांचोदग्ग्रादर्भाःअ ३९

वाच्यामुदीच्यांचाग्रयाः॥पूर्वपश्चात्परिस्तरणमूलयोरुपरिदक्षिणापरिस्तरणं॥उत्तरपरिस्त
रणंतूदग्ग्रयोरधस्तात्॥तेचदर्भाअनियतसंख्याःएकैकस्यांदिशित्रिचतुरइत्येवंषोडशवा॥ततो
ग्नेर्दक्षिणतोब्रह्मासनार्थंउत्तरस्यांपात्रासादनार्थंकोश्चित्त्यागग्रान्दर्भान्स्तृणीयात्॥अग्नेरुत्तानंतस्त्रि
रंभसापरिषिच्यउत्तरास्तीर्णेषुदर्भेषुदक्षिणासव्यपाणिभ्यांक्रमेणचरुंस्थालीप्रोक्षिण्योदवरेस्रु
वौप्रणीताआज्यपात्रेइध्मबर्हिषीसूर्पकृष्णाजिनंउलूखलमुसलंचेतिद्वेद्वेउदग्पवर्गेपाक्सं
स्थंचसुक्संन्यासादयेत्॥आज्यमात्रहोमेतुप्रोक्षणीस्रुवौप्रणीताआज्यपात्रेइध्मबर्हिषीचेत्ये
तावतामेवासादनं॥ततःप्रोक्षणीपात्रमुत्तानंकृत्वातत्रानंतर्गर्भितसायसमस्थूलप्रादेशमात्रकु
शद्वयरूपेपवित्रेनिधायशुद्धाभिरद्भिस्तत्पात्रंपूरयित्वागंधपुष्पादिक्षिप्त्वाहस्तयोरंगुष्ठोपक
निष्ठिकाभ्यामुदग्ग्रेपृथक्पवित्रेधृत्वाअग्निरुत्पूयपात्राण्युत्तानानिकृत्वाइध्मंविस्रस्यस

र्वाणिपात्राणित्रिःप्रोक्षेत्॥उत्तानेनतुहस्तेनकर्त्तव्यंप्रोक्षणंभवेत्॥अवाचीनेनहस्तेनक
र्त्तव्यंस्यादवोक्षणं॥मुष्टिंकरोतियत्तोयमभ्युक्षणमितिस्मृतं॥ताआपःकिंचित्कमंडलोक्षि
पेदित्येके॥ततोयथोक्तलक्षणमाग्नादिगवस्थितंब्राह्मणमस्मिन्कर्मणिब्रह्माणंत्वांवृणे
इतितस्याणिंपाणिनागृहीत्वावृणुयात्॥ततोब्रह्मावृतोस्मीत्युक्त्वाप्राङ्मुखोयज्ञोपवी ती
आचम्यसमस्तपाण्यंगुष्ठोभूत्वाग्नेणाग्निंपरीत्यदक्षिणतउदङ्मुखस्थित्वाआसनार्थदर्भे
षुदक्षिणभागस्थमेकंदर्भमंगुष्ठोपकनिष्ठिकाभ्यांगृहीत्वानिरस्तःपरावसुरितिनैर्ऋत्यां
निरस्यापस्पृष्ट्वेदमहमर्वाविसोःसदनेसीदामीत्युक्त्वोदङ्मुखएववामोरूपरिदक्षिणपादं
संस्थाप्योपविश्यगंधाक्षतादिभिरर्चितःसन्बृहस्पतिर्ब्रह्माब्रह्मसदनआस्तिष्यतेबृह
स्पतेयज्ञंगोपायसयज्ञंपाहिसयज्ञपतिंपाहिसमोपोहीतिजपित्वासर्वदायज्ञमनाएव ४०

वर्त्तेत॥ततोयजमानः॥प्रणीतापात्रमग्नेःप्रत्यङ्निधायतत्रपवित्रेनिधायोत्तानाभिरङ्गि
रयित्वागंधपुष्पाक्षतान्निक्षिप्यततोब्रह्मन्नपःप्रणेष्यामिब्रह्माभूर्भुवःस्वर्बृहस्पतिप्रसूत॥
ॐप्रणयेतिश्रुत्वा॥मुखसंमुष्ट्यात्रुत्तरतोदर्भेषुनिधायपवित्रेगृहीत्वान्यैर्दर्भैराच्छादयेत्॥
ततःप्रत्यग्नेःकुत्रोषुशूर्पंनिधायतंत्रागग्नेयपवित्रेनिधायाग्नयेत्वाजुष्टंनिर्वपामीतिमंत्रावृत्या
व्रीहीणांयवानांवाचतुरोमुष्टीनिरूप्यान्नीषोमाभ्यांत्वाजुष्टंनिर्वपामीतितथैवनिरूप्यतेपवि
त्रेगृहीत्वाव्रीहीणामुपरिनिधायोत्तानाभिरङ्गिरयेत्वाजुष्टंप्रोक्षामीतिनिर्वपसंख्योत्तानाभिरङ्गिःप्रोक्षयेत्॥एवमग्नीषोमाभ्यांत्वाजुष्टंप्रोक्षामीतितथैवप्रोक्षयेत्॥इदंतुअग्नीषोमस्थाने
इंद्राग्निभ्यांत्वेत्यादिनिर्वापेप्रोक्षणेचविशेषः॥एवंनाममंत्रकहोमेनिर्वापः॥प्रेक्षणं चयथाप्रधान
देवतंदेवतानामग्रहणेनकार्यं॥समंत्रकहोमेतुश्रवणाकर्मादौतूष्णींचतुरश्चतुरोमुष्टीनिर्वपेत्प्रो

म
त्र

क्षेच्च॥ततःपात्राणामुत्तरतःप्राग्ग्रीवमास्तीर्णेऊर्ध्वलोम्निकृष्णाजिनेनिहितेउलूखलेमुसलेन
पत्न्यवहत्यत्रिः शुक्लीकुर्यात्॥तांस्त्रिःप्रक्षालितान्पृथक्पात्रेएकपात्रेवाअविदग्धमनवस्त्रा
वितमंतरूष्मपक्वंसुश्रृतंचरुंपचेत्॥ततःपवित्रेआज्यपात्रेनिधायतत्पात्रंपुरतःसंस्थाप्यतस्मिन्ना
ज्यमासिच्याग्नेरुत्तरतस्थितांगारानूभस्मनासहाग्नेरुदकपरिस्तरणात्बहिर्निरूह्यतेषुआज्यपा
त्रमधिश्रित्यज्वलतादर्भेल्मुकेनावज्वल्यांगुष्ठपर्वमात्रंप्रक्षालितंदर्भंगृहीत्वाज्येप्रक्षिप्यपुन
र्ज्वलतातेनैवदर्भेल्मुकेनचरुणासहाज्यंत्रिःपर्यग्निकृत्वातदुल्मुकमपास्याप.स्पृष्ट्वाज्यपात्रंभु
विकर्षन्निवोदगुद्वास्यांगारानग्नौप्रत्यस्यापःस्पृष्ट्वातत्रस्थमेवाज्यं॥सवितुष्ट्वाहिरण्यस्तूपःसवि
तापुरउक्थिकं॥आज्योत्पवनेविनियोगः॥ॐसुवितुष्ट्वाप्रसवउत्सुनाम्यच्छिद्रेणपवित्रेणवसोःसू
र्यस्यरश्मिभिरितिमंत्रेणैकर्क्त्योद्धारितेनैकवारंहि स्तूष्णीमुत्तानपाणिद्वयांगुष्ठोपकनिष्ठिका
भ्यामंतयोरसंस्पृष्टगृहीताभ्यामुदगग्राभ्यांपवित्राभ्यांप्राणत्सूयनेपवित्रेइ:प्रोक्ष्याग्नौप्रहरेत्सूर्यं॥ ४१

स्कंदायस्वाहेतिमंत्रेणेतिकेचित्॥अथाग्नेःपश्चात्परिस्तरणाद्बहिरात्मनोयतोभुवंप्रोक्ष्यतत्र
बर्हिःसन्नहनीरज्जुमुदगग्राप्रसार्यतस्यांबर्हिःप्राग्ग्रमुदगपवर्गमविरळमास्तीर्यतस्मिन्नाज्य
पात्रंनिधायस्रुवादिसंमार्जयेत्॥तद्यथा॥दक्षिणेनहस्तेनस्रुक्स्रुवौगृहीत्वासव्येनकांश्चिद्दर्भा
नादायसदेवाग्नौप्रताप्यस्रुचंनिधायदक्षिणेनहस्तेनस्रुवंबिलंदर्भाग्रैःप्राग्गादिप्राग्गपवर्गंत्रि
समृज्याधस्तादर्भाग्रेणैवाभ्यामंबिलपृष्ठंत्रिःसमृज्यततोदर्भाणांमूलेदंडंस्याधस्ताद्बिलपृष्ठा
दारभ्यायावदुपरिष्टाद्बिलंतावत्त्रिःसमृज्याङ्गःप्रोक्ष्यस्रुवंनिष्टप्याज्यस्थाल्याउत्तरतःस्रुगस्पृशं
निधायोदकंस्पृष्ट्वातेरेवदर्भैर्जुह्वंचैवमेवसंमृज्यस्रुवादुत्तरतोनिधायदर्भानङ्गःक्षालयित्वाऽ
ग्नावनुप्रहरेत्॥ततःश्रृतंचरुंस्रुवगृहीतेनाज्येनाभिघार्योदगुद्वास्याज्याज्ययोर्मध्ये ननीत्वाज्या
द्दक्षिणतोबर्हिषिसांतरमासाद्यपुनरप्यभिघार्यहविःपृथक्करणायपात्रांतरंचर्वाज्ययोर्मध्ये

निधायैकादशांगुलिमितेदेशेगंधाक्षतपुष्पैरग्निंसमंत्रम र्चयेत्॥तत्रमंत्रो॥विश्वा
निनइत्यनयोर्वसुश्रुत्तोग्निस्त्रिष्टुप्॥अग्न्यर्चनेविनियोगः॥ॐविश्वानिनोदुर्गहोजातवेदः
सिंधुंनानावादुरितातिपर्षि॥अग्नेअत्रिवन्नमसागृणानोस्माकंबोध्यविताततनूनां॥यस्त्वाहृ
दाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीमि॥जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअ
मृतत्वमश्यां॥ततःआत्मानंचालंकृत्यदक्षंप्रक्षाल्यइध्मबंधनरज्जुमिध्मस्थानेनिधाय
पाणिनेध्ममादायमूलमध्याग्रेषुत्रुवेणत्रिरभिघार्यमूलमध्ययोर्मध्यभागंगृहीत्वा॥अ
यंनेवामदेवोजातवेदाअग्निस्त्रिष्टुप्॥इध्महवनेविनियोगः॥ॐअयंतइध्मआत्माजो
तवेदस्तेनेध्यस्ववर्धस्वचेद्ध्वर्दीयास्माप्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधय स्वा
हेतीध्ममग्नावाधायजातवेदसेग्नयेइदंनममेतित्यजेत्॥ततःस्रुवेणाज्यमादायाग्ने ४२

रायतनवायव्यकोणमारभ्याग्नेयकोणपर्यंतंप्रजापतयइतिमनसास्मरन्स्वाहेत्यूर्ध्वा
यनैरंतर्येणाज्यधारामग्नाविध्मदारूपरिहुत्वा॥पुनराज्यमायतननैर्ऋतकोणतःईशा
नापर्यंतंनथैवहुत्वास्रुक्चस्रुचेणाज्यमादायाग्नयेस्वाहेत्यग्नेरुत्तरपार्श्वेपूर्वभागेहुत्वा
पुनराज्यंसोमायस्वाहेतिअग्नेर्दक्षिणपार्श्वेतत्समप्रदेशेहुत्वापूर्वनिहितपात्रेचरुमुद्धृत्य
पृथक्कृत्यइदमग्नयेइदमग्नीषोमाभ्यामितिदर्शेत्विदमिंद्राग्निभ्यामितिचरुभागद्वयमुत्त
रसंस्थमभिमृश्यावदानधर्मेणजुहुयात्॥एवंनाममंत्रकहोमेयथादेवतंविभक्तस्यचरोर
भिमर्शः॥समंत्रकहोमेतुनविभागोनाभिमर्शश्च॥ अथावदानधर्मः॥स्रुवेणस्रुच्याज्य
मुपस्तीर्यप्रथमप्रधानदेवताचरुभागमध्यादंगुष्ठपर्वमात्रंनिरश्नीताभिरंगुष्ठमध्यमानो
मिकाभिरुदगग्राभिर्नखसंस्पर्शमकुर्वन्नवदायद्व्यमोप्यतश्चरुपूर्वभागंप्रागग्राभि न

स्तामिस्तथैवावदायदर्व्यामोप्यपात्रस्थंहविरभिघार्य दर्वःस्थमवनंचाभिघार्यवि
धूमाग्निज्वालाग्नेोअनवेस्वाहेत्याज्यभागयोर्मध्यदेशेनत्रस्त्यदेशेवाआछादयन्निवदर्व्यापार्श्व
नङ्कृत्वाग्नयेइदंनममेतित्यक्त्वापुनःपूर्ववदुत्तरहविर्भागादवदाय॥ॐअग्नीषोमाभ्यांस्वाहेतिपू
र्वाकृतेःप्राग्भागेकृत्वाऽग्नीषोमाभ्यांइदंनममेतित्यजेत्॥पंचावत्तीतुदर्व्यामुपस्तीर्यमध्यात्पूर्व
र्धात्यश्चाद्वाऋत्रिर्हविषोवदायाभिघार्यजुहुयात्॥पंचावत्तिनस्तु॥जामदग्न्यावत्सविदावार्षि
षेणास्तथैवच॥भार्गवित्र्यावनाओर्वाःपंचावत्तिनईरिताः॥दर्शेतुअग्नीषोमपदस्थानेइंद्राग्निभ्यां
स्वाहाइंद्राग्निभ्यामिदंनममेतिविशेषः॥पुनर्दर्व्यामुपस्तीर्यप्रथमहविर्भागस्योत्तराईतःपूर्वा
वदानतोभूयोन्वीनाभिरेवांगुलीभिरवदायदर्व्यामोप्यद्वितीयहविर्भागस्यतथैवावदायपंच
वत्तीतुहविर्भागद्वयेपिउत्तरार्द्धात्पूर्वार्द्धाच्चद्विर्द्विरवदायपात्रस्थमनभिघार्यावत्तंतुद्विरभिघा ४३

र्य॥यदस्येतिहिरण्यगर्भोग्निरतिधृतिः॥स्विष्टकृद्धोमेविनियोगः॥ॐयदस्यकर्मणोत्यरीरि
चंयद्वान्यूनमिहाकरं॥अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वंस्विष्टंसुहुतंकरोतुमे॥अग्नयेस्विष्टकृते
सुहुतहुतेसर्वप्रायश्चित्तहुतीनांकामानांसमर्द्धयित्रेसर्वान्नःकामान्त्समर्द्धयस्वाहेत्येकश्रु
त्योच्चार्यामावीत्यानदेशेजुहुयात्॥स्विष्टकृतेत्रयइदंनममेतित्यागः॥ततोग्नेरुत्तरतःस्थिताग्नि
ध्मबंधनरज्जुंविस्रस्यरुद्रायस्वाहेहिहुत्वापःस्पृष्ट्वास्रुवेणप्रायश्चित्ताहुतीःसप्तजुहुयात्॥त
त्रमंत्राः॥अयाश्चेतिविमदोअयाळग्निर्पंक्तिः॥प्रायश्चित्ताज्यहोमेविनियोगः॥ॐअयाश्चा
ग्नेस्यनभिरस्तीश्वसत्यमित्वमयाअसि॥अयासानयसाकृतोयास्मन्हव्यंहविषेयानोधेहिभे
षजंस्वाहेत्येकश्रुत्याजुहुयात्॥अग्नयेअयसेइदंनमम॥अतोदेवासेधातिथिर्देवागायत्रीविष्णु
योगःसर्वत्रप्राग्वत्॥अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे॥पृथिव्याःसप्तधामभिःस्वाहा॥
देवेभ्यइदं॥२॥इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥समू

ह्मस्यपांसुरेस्वाहा॥विष्णवइदं नमम॥३॥व्यस्तसमस्तव्याहृतीनांविश्वामित्रजमदग्निभरद्वा
जप्रजापतयोऽग्निवायुसूर्यप्रजापतयोगायत्र्युष्णिगनुष्टुप्बृहत्यः॥ॐभूःस्वाहाअग्नयइदं०॥४॥
ॐभुवःस्वाहावायवइदं०॥५॥ॐस्वःस्वाहासूर्यायेदं०॥६॥ॐभूर्भुवःस्वःस्वाहा॥प्रजापतयइदं०॥७॥
ततोब्रह्माकर्त्तारंपरीत्याग्नेर्वायव्यदेशेतिष्ठन्नेताएवसमाहुतीर्जुहुयात्॥त्यागंयजमानोत्रकुर्या
त्॥ततस्तत्रस्थोब्रह्मैवमंत्रविपर्यासादिनियतनिमित्तेसति॥यद्वोदेवाअतिपान्तयोनिर्वाचाचुप्रयु
तादेवहेळनं॥अरायोअस्मांअभिदुछुनायतेन्यत्रास्मन्मरुतस्तंनिधेतनस्वाहायजमानः॥म
रुद्भ्यइदं०॥अनाज्ञातमितिमंत्रहूयस्यहिरण्यगर्भोग्निरनुष्टुप्॥ॐअनाज्ञातंयदाशानं
यज्ञस्यक्रियतेमिथु॥अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथंस्वाहा॥यजमानः॥अग्नयेइ०। ४४

पुरुषसंमितोयज्ञो यज्ञःपुरुषसंमितः॥अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथंस्वाहा॥य
जमानःअग्नयेइदं०॥यत्पाकत्रेत्यास्यस्विष्टोग्निस्त्रिष्टुप्॥यत्पाकत्रामनसादानदक्षानयज्ञस्य
मन्वतेमर्त्यासः॥अग्निष्टेत्पाकक्रतुर्विद्वाञ्जानन्यजिष्ठोदेवाँऽऋतुशोयजातिस्वाहा॥यज॰अग्न
यइदं०॥स्कंनभिन्नाद्यनियतनिमित्तेसतिवक्ष्यमाणप्रकारेणतत्तत्प्रतिपदोक्तजपहोमाकुर्या
द्ब्रह्मा॥ब्रह्मणोऽभावेयजमानएवैतान्प्रायश्चित्तादीन्कृत्वान्यस्मैवरंदद्यात्॥ततोयजमानः
सर्वकर्मप्रपूरणीमिडइड्यदांपूर्णाहुतिंजुहुयात्॥तद्यथा॥स्रुवेणाज्यंगृहीत्वास्रुचंसमबि
लांपूरयित्वातस्यांस्रुवमूर्ध्वबिलंनिधायपुनरधोबिलंनिक्षिप्यस्रुवाग्रेकुसुमाक्षतंनिधा
यसव्यपाणिनास्रुवंमूलेधृत्वादक्षिणपाणिनास्रुकस्रुवंमुखमुद्यागृह्यातिष्ठन्समपा
दलंबुकायःस्रुवाग्रन्यस्तदृष्टिःसन्नात्मा॥समुद्राऊर्मिरित्येकादशार्चस्यसूक्तस्यवामदे

वऔंपस्त्रिष्टुप्।अंत्याजगती।पूर्णाहुतेर्विनियोगः॥समुद्रादूर्मिरित्यादिमधुमंतंतऊर्मि
स्वाहेतिपठन्यव परिमितधारांसंततांसुगंधेणत्रोषंकृत्वाऽऽइदंनममेत्युद्दिश्यत्यक्त्वा
विज्योतिषेत्यस्यजानोग्निस्त्रिष्टुप्।ॐविज्योतिषाबृहतेत्यनेनचतथेवावघ्रायंकृत्वाग्नये
इदंनममेतित्यक्त्वाॐविश्वेभ्योदेवेभ्यःस्वाहेतिसंस्रवंकृत्वाविश्वेभ्योदेवेभ्यइदं॰।ततस्त
दुलकणान्समिद्भ्रात्कलान्यङ्गिःप्रोक्ष्याग्नोप्रहरेत्॥पूर्णाहुत्याद्येतदंतंसमूलंपारिजा
तकारेणलिखितमपिइदानींस्थिष्टानकुर्वंति॥अवभृतस्थानीयंपूर्णपात्रजलेनमार्जन
कुर्यात्॥तद्यथा॥पूर्वासादितंपूर्णपात्रमास्तीर्यबर्हिषिदक्षिणयापाणिनानिधायतत्र
गंगादिपुण्यनदीःस्मरन्दक्षिणपाणिनास्पृशन्पूर्णमसिपूर्णंमेभूयाःसुपूर्णमसि
सुपूर्णंमेभूयाःसर्वमसिसर्वंमेभूयाःअक्षितिरसिमाक्षितिरिति ४५

जपित्वाकुशाग्रैःआगादिपंचदिक्षुजलंमंत्रैर्यथालिंगंसिंचेत्॥तेचमंत्राः॥प्राच्यांदिशि
देवाऋत्विजोमार्जयंतांदक्षिणस्यांदिशिमासाःपितरोमार्जयंतांप्रतीच्यांदिशिग्रहाःपुश
वोमार्जयंतांउदीच्यांदिश्योषधयोवनस्पतयोमार्जयंतांऊर्ध्वायांदिशियज्ञःसंव
त्सरःप्रजापतिर्मार्जयंतामित्येकऋचापठन्प्रतिदिशंसिंचेत्कुशाग्रैःस्वशिरसिमार्ज
येत्॥तत्रमंत्राः॥आपोअस्मान्मातरःशुंधयंतुघृतेनोघृतप्वःपुनंतु॥विश्वंहरिष्यंप्रवहंतिदेवीरुदिदाभ्यः
शुचिरापूतएमि॥इदमापःप्रवहतयत्किंचेदुरितंमयि॥यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं॥सुमित्र्यानआपओषधयःस
न्तु॥इत्येतैर्मंत्रैर्मार्जनंकृत्वादुर्मित्रियास्तस्मैसंतुयोस्मांद्वेष्टियंचवयंद्विष्मस्तंहन्मीति॥निर्ऋ

ति देशेकुशाग्रैः अयः सिंचेत्॥ ततो ब्रह्मा यजमानवामपार्श्वस्थितपत्न्यंजलौ पूर्णपात्रस्थंज
लंतु॥ माहंप्रजांपशूंसिचंयानंःसुयावरीस्थन॥समुद्रेवोनिनयामिस्वंपाथोअपोथेतिमंत्रमु
क्त्वापत्न्यावाचयन्त्स्वयंवापठन्प्रत्यङ्मुखंनिषिच्यांजलिस्थजलेःपापानंपनोदार्थमात्मान
यजमानपत्नींचप्रोक्षेत्॥ पत्नीतज्जलंबर्हिषिनिषिंचेत्॥ अथवायजमानएवस्ववामपाणिंउत्ता
नंबर्हिषिनिधायतत्रदक्षिणपाणिनापूर्णपात्रमादायमाहंप्रजांइत्यनेनतज्जलंप्रत्यङ्मुखंनि
षिच्यताआपःसमुद्रंगछंतीतिज्ञात्वापाणिस्थजलेरात्मानंपत्नींचप्रोक्षेत्॥ ततःकर्तोभेर्वा
द्येस्थितःसंस्थाजपेनोपतिष्ठेत॥ तद्यथा॥ अग्नेत्वन्नइतिचतसृणांगोपायनालोपायनावा
धुःसुबंधुःऋतबंधुर्विप्रबंधुश्चैकर्चाऋषयः॥ अग्निर्देवता॥ द्विपदाविराट्छंदः॥ अस्युप
स्थानेविनियोगः॥ ॐ अग्नेत्वंनोअंतमउतत्राताशिवोभवावरूथ्यः॥ वसुरग्निर्वसुश्रवाअ ४६

च्छानक्षिद्युमत्तमंरयिंदाः॥ सनोबोधिश्रुधीहवमुरुष्याणोअघायुतःसमस्मात्॥ तं
त्वान्नोविश्वेदीदिवःसुम्नायनूनमीमहेसखिभ्यः॥ ॐ चमेस्वरश्चमेयज्ञेपचतेनमश्च॥
यत्तेन्यूनंतस्मैतनुपयतेतिरिक्तंतस्मैतेनमः॥ स्वस्तिश्रद्धांमेधांयज्ञंप्रज्ञांविद्यं बुद्धिंश्रि
यंबलंआयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनादेहिमेहव्यवाहनोनमोनमः॥ ततोब्रह्मा
पितत्रैवस्थित्वा॥ एतैरेवोपतिष्ठेत॥ ततःकर्ताआचारात्॥ मानस्तोकेतिकुत्सोरुद्रोजगती॥
विभूतिग्रहणेविनियोगः॥ मानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः॥
वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे॥ इतिस्रुवबिल्वपत्रेनविभू
तिंगृहीत्वा॥ ॐत्र्यायुषंजमदग्नेरितिललाटे॥ कश्यपस्यत्र्यायुषमितिकंठे॥ अगस्त्यस्य
त्र्यायुषमितिहृदि॥ नाभ्यां॥ यद्देवानांत्र्यायुषमितिदक्षिणस्कंधे॥ तन्मेअस्कत्र्यायुषमिति

वामस्कंधेऽग्नायुषमितिशिरसिधारयेत्॥केचनोपस्थान्पूर्वंविभूतिधारणमाहुरि
ति॥ततःकर्त्तापरिस्तरणानिविसृज्याग्निंपरिसमुह्यपरिषिच्यविश्वानिनइत्यर्चयित्वान
त्वाचपुष्पादिभिरलंकृत्यनैवेद्यतांबूलंचनिवेद्यब्रह्मणेयथाशक्तिदक्षिणांदक्षिणाभा
वेऽकृतन्नोषंघृतादिसहिरण्यंदत्वाब्रह्माभावेन्यस्मैब्राह्मणायदत्वापात्राणि प्र
क्षाल्यपूर्वक्रमेणाहूंहूंउत्सृज्ययस्यस्मृत्येतिविष्णुंनत्वाऽग्न्युद्धृतपवित्रयग्निंविस्रस्य
शुद्धदेशेक्षिपेत्॥दर्शेतुअग्नीषोमस्थानेइंद्राग्नी॥इतरत्सर्वंसमानं॥तच्चदर्शितमेवस
द्यस्कालायांपौर्णमास्यामगत्योभयत्रवायाग दि नएवप्रातर्होमानंतरमेवान्वाधायेध्मा
वहिंषासन्नहेष्टिप्रयोगंकुर्यात्॥ ॥इतिश्रीनारायणभट्टकृतेप्रयोगरत्नेपार्वणस्थाली
पाकप्रयोगः॥ ॥अथेष्टिप्रायश्चित्तानि॥प्रमादादन्यामोचेत्स्वयंयजेतस्वाग्नावन्योवा ४७

यजेतचेत्तदाप्रायश्चित्तंपथिकृच्चरुहोमंकृत्वापुनस्तंत्रीयादितिथिषुअन्वाधानपूर्व
कमिष्टिंकुर्यात्॥अथातिपन्नेष्टिप्रयोगः॥अन्वाधानात्पूर्वंचेत्स्त्रीरजस्वलाभवतितदापं
चमादिदिवसेसद्यस्कालान्वाधान पूर्वकंनुकुर्यात्॥प्रतिपद्यप्रविष्टायांयदिदृष्टिःस
माप्यते॥पुनःप्रणीयकृत्वेष्टिःकर्त्तव्यायागविघ्नमेः॥अन्वाधानात्परंचेद्रजस्वलाचेत्तांग
हांतरेस्थापयित्वाप्रतिपद्येवनुकुर्यात्॥सूतकादिनेष्टिरतीताचेदागामिपर्वपूर्वतिथि
षुद्वितीयांचतुर्थींनवमींचतुर्दशींचविहायान्यासुतामतिपन्नेष्टिंकुर्यात्॥तास्वपति
क्रमेऽतिपन्नस्यपोदकृच्छ्रप्रायश्चित्तंकृत्वाकालप्राप्तांप्रतिपदिष्टिंसद्यस्कालान्वाधानपू
र्वंकुर्यात्॥द्वितीयपर्वातिक्रमेपूर्ववदागामिपर्वमध्येकुर्यात्॥तत्राप्यतिक्रमेतत्पर्वणिप
थिकृत्पूर्वंकार्यं॥पथिकृदिष्टिंस्वतंत्रांप्राक्पर्वेष्यासमानतंत्रांवाकुर्यात्॥तस्याप्यतिक्रमेतृ
तीयेऽनंतरपर्वणिपथिकृद्यागपूर्वकमतिपन्नयागंकृत्वातत्पर्वणोन्वाधानंकुर्यात्॥तत्राप्यतिक्रमे३

नीयप्रतिपदिअतिपन्नहूयग्रायश्चित्तंकृत्वाग्नौकरणाग्निष्टिंकुर्यात्॥तस्याप्य
तिक्रमेआगामिपर्वपर्यंतंपूर्वोक्तवत्कुर्यात्॥तत्राप्यतिक्रमेस्मात्तानग्निर्नश्यति॥तेनविधि
नापुनःसंधानंकृत्वाप्राप्तेपर्वणितदिष्टिंकुर्यात्॥अन्वाधानेष्टिमध्येचंद्रग्रहणंचेद्दिष्टिदि
नेहविरासादनांतंकृत्वा॥अन्वाधानेष्टिमध्येचंद्रग्रहणदोषप्रायश्चित्तार्थमाज्यहोमंकरि
ष्यइतिसंकल्प्यनवोनवोभवतीत्यस्यसूर्यासावित्रीचंद्रमास्त्रिष्टुप्॥ॐनवोनवोभवति॰
ॐयमादित्याअंशुमाप्याययंतियमक्षितमक्षितयःपिबंति॥तेननोराजावरुणोबृहस्प
तिराप्याययंतुभुवनस्यगोपाः॥द्वाभ्यांहस्तकृताभ्यांवाकुशाकुत्वाअभ्यलंकरणादि
तंत्रंकुर्यात्॥सूर्यग्रहणंचेद्धविरासादनांतेतिस्रआज्याहुतयः॥ताभ्यांचित्रंदेवानामि
त्यस्यांगिरसःसूर्यस्त्रिष्टुप्॥चित्रंदेवानां॰॥उद्वयंजातवेदसमित्यस्यकण्वःप्रस्कण्वःसूर्यो ४८

स्य गायत्री॥उद्वयंजातवेदसं॰॥उद्वयमित्येकाण्वःप्रस्कण्वःसूर्योनुष्टुप्॥उद्वयंतमसस्परि॥एतै
र्हुत्वाअभ्यलंकरणादितंत्रंशेषंसमापयेत्॥इदंप्रयोगपारिजातेसंग्रहोक्तंप्रायश्चित्तंग्रथां
तरेतुशौनकोक्तमुक्तं॥तद्यथा॥दृष्टिदिनेहविरासादनांतेकृतेअन्वाधानेष्टिमध्येचंद्रग्रहणज
नितवैगुण्यपरिहारार्थंशौनकाज्याकृतिमुपस्थानंचकरिष्यइतिसंकल्प्यअत्राहगोरमित्य
स्यराहूगणोगोतमोचंद्रमागायत्री॥दृष्टिमध्येचंद्रग्रहणेवैगुण्यपरिहारार्थमाज्यहोमेवि
नियोगः॥ॐअत्राहगोरमन्वतनामत्वष्टरपाच्यै॥इत्थाचंद्रमसोगृहेस्वाहा॥इंदमसेदंन॰
नवोनवोइत्यस्याःसूर्यासावित्रीचंद्रमास्त्रिष्टुप्॥चंद्रोपस्थानेविनियोगः॥ॐनवोनवोभवति
जायमानोह्नांकेतुरुषसामेत्यग्रे॥भागंदेवेभ्योविदधात्यायन्नचंद्रमास्तिरतेदीर्घमायुः॥सूर्य
ग्रहेतुसंकल्पादौचंद्रपदस्थानेसूर्यपदंप्रयोक्तव्यं॥उद्वयमित्यस्याःकाण्वःप्रस्कण्वःसूर्यो

यं
नुष्टुप्॥उद्वुत्तमं०स्वाहा॥सूर्यायेदं०॥चित्रंदेवानामित्यस्यकुत्सःसूर्यस्त्रिष्टुप्॥सूर्योपस्थानेवि
नियोगः॥ॐचित्रंदेवानां०इतीष्टिमध्येग्रहणेनिर्णय ॥अन्वाधानेष्टिमध्येऽग्न्यनुगतोअग्न
श्चेतिमंत्रेणावक्ष्यमाणवत्पुनःसंधानंकृत्वाॐभूर्भुवःस्वःस्वाहेतिमंत्रेणासंकल्पपूर्वकंप्रायश्चि
त्तंसंस्कृताज्येनहुत्वापुनरन्वाधानपूर्वकमिष्टिंकुर्यात्॥अन्वाधानेष्टिमध्येप्रयाणोपस्थितौतु
स्यंताअंगिरस्तमेतिसंकल्पपूर्वकंसंस्कृताज्यंहुत्वाअरण्यादिषुसमारोप्यहोमकालेप्रतिष्ठाप्य
प्रातर्होम पूर्वकमिष्टिंकुर्यात्॥अन्वाधायप्रतिपदिप्रभृतिदिक्करणेतृतीयादितिथिषु
प्रातरोपासनोनरंसंकल्पपूर्वकंसंस्कृताज्यंव्यस्तसमस्तव्याहृतिभिर्हुत्वापुनरन्वाधाययागं
कुर्यात्॥अथप्रसंगादत्रैव नैमित्तिकप्रायश्चित्तान्युच्यंते॥ग्राम्यापरिमितदे शादर्वाग्बहिरा
यतनादाहृतश्चेदग्निःसचप्रायश्चित्तसमाप्तिपर्यंतंस्थितियोग्यस्तदा॥इदंतएकंपरुऊतए ४९

कंतृतीयेनज्योतिषासंविशस्वसंवेशनेतन्वेश्चारुरधिपत्नियोदेवानांपरमेजनित्रे॥इ
तिमंत्रेणायतनेप्रक्षिप्यव्याहृतिभिराज्याहुतीर्हुत्वा॥तत्रकारिका॥अवाक्शम्यापरासा त
नुबहिरायतनाहृतं॥प्रायश्चित्तसमाप्त्यंतंसमर्थंजीवितुंयदि॥इदंतइत्यचानस्यस्थानेग्निंप्र
क्षिपेत्सुनः॥आज्याहुतीश्चजुहुयाद्व्याहृत्याख्येश्चपूर्ववत्॥ग्राम्याषट्त्रिंशदंगुले स्थापस्त
बः॥ग्राम्यापरिमितदेशाद्बहिरायतनाहृतेग्नौपथिकृतेग्नयेचरुंनिर्वपेत्॥अन्नाकोद्वादशाग्य
हीतेनाज्येनस्रुचंपूरयित्वाअग्नयेपथिकृतेस्वाहेतिपूर्णाहुतिंजुहुयात्॥स्रुवाहुतिवा॥
तदुक्तंकारिकायां॥अतिक्रांतोयदाग्राम्यापरासमनलोभवेत्॥चरुःपथिकृतेकार्यःपूर्णा
हुतिरथापिवा॥पूर्णाहुतिलक्षणंकारिकायामुक्तं॥आज्यंद्वादशाकृत्वास्रुगृहीत्वापूरयेत्
स्रुचं॥तयाचाज्याहुतिःकार्यासापूर्णाहुतिरिष्यते॥स्रुवपूर्णाहुतिर्वास्यादित्येकेयाज्ञिका

विदुः॥यद्यग्निः स्वयं ज्वलति तदा॥उद्दीप्य स्वज्ञातवेदोघृतेनिर्ऋतिं मम॥पश्यूंश्च मह्यमा
वहजीवनं चदिशोदश॥मानोहिंसीज्ज्ञातवेदोगामश्वंपुरुषंजगत्॥अविभ्रदग्न आगहि
श्रियमापरिपातयइति मंत्राभ्यांसमिद्वयमाज्यावाद्ध्यात्॥अग्नेश्चमलमूत्राद्युपघातेपुनस्त्वा
दित्याऽऽवसंवुःसमिधतांपुनर्ब्रह्माणोवसुनीथयज्ञैः॥घृतेनत्वंतनुवोवर्द्धयस्वसत्याः संतुय
जमानस्यकामाः॥इतिसमिधमाद्ध्यात्॥लऽकारिकायां॥स्वयंज्वलेच्चेद्दीप्यस्वेतिद्वाभ्यां
समिद्वयं॥आधेयमुपघातेनुपुनस्त्वेत्यनयासमित्॥ऽऽयमानाऽऽहुतिर्यदिबर्हिःस्कंदेत्तदादेवांज
नमित्यनेनाभिमृश्यऽइध्मस्कंदेत्याज्याऽऽहुतिंजुऽहुयाद्व्याहृतिभिश्च॥ततःस्कन्नमनले
क्षिपेत्॥मंत्रोच॥देवांजनमगन्यज्ञस्तुमाशीरवनुवर्धतां॥भूतिर्घृतेनमुंचनुयुञ्जोयुज्ञपं
तिंमहंसः॥भूपतयेस्वाहा भुवनपतयेस्वाहा भूतानांपतयेस्वाहा यस्यत्वाग्नमयोन्म यामिमया ५०
ज्ञ

प्रतिमयाऽइध्मस्कंदपथमांऽअनुयन्तिमंचयोनिमनुयश्चपूर्वः॥समानंयोनिमनुसंचरंतं
संजुहोम्यनुसप्तहोत्राः॥अत्रकारिका॥आऽऽहुतिऽऽयमानानुबर्हिःस्कंदेन्नचेयदा॥देवांजन
मगन्यज्ञइत्यनेनाभिमृश्यतां॥इध्मश्चेत्याऽऽहुतिंऽऽहुत्वाप्रक्षिपेदनलेपुनः॥देवांजनेतिसर्वत्रस्क
नंत्वभिमृशेद्विधिः॥होतव्याज्याऽऽहुतिस्तत्रव्याहृत्यारब्धैःसमुच्चयात्॥यागात्प्रागन्वाधाननिर्वा
पादि युजानोदेवतायुत्क्रमोयदाज्ञानात्तदाव्याहृतिभिर्ऽऽहुत्वाविहितदेवतांयजेत्॥यागाऽऽर्ध्वंदे
वतायुत्क्रमज्ञानेतुव्याहृतिभिर्ऽऽहुत्वातंयागंनावर्त्तयेत्॥यदात्वप्रकृतांकांचिद्देवतांयजेत्तदाव्याहृति
भिर्ऽऽहुत्वाप्रकृतदेवतायैयागमावर्त्तयेत्॥अत्रकारिका॥प्राग्यागाद्युत्क्रमेज्ञातेइदंकृत्वायजे
त्तदा॥अविज्ञातविपर्यासे विहितांदेवतांस्मरन्॥इष्टवांस्तनऊर्ध्वंतुयुत्क्रमावगमेसति॥प्रा
यश्चित्तमिदंकृत्वायागंनावर्त्तयेत्तदा॥यदात्वविहितांकांचिद्देवतामिष्टवांस्तदा॥प्रायश्चि

न्नमिदंकृत्वायागंत्यावर्त्तयेत्स्रुवं॥इदंव्याहृतिहोमाख्यं॥अन्यान्यपिप्रायश्चित्तानिकारिकायां॥पवित्रंयदिनश्येच्चेत्स्यात्पवित्रवतेचरुः॥यदाहविरपक्वंस्यात्तेनैवहविषायजेत्॥चतुःप्राशवमात्रंतुपचेद्धविरोदनं॥भोजयेत्तेनचान्नेनचतुरोब्राह्मणानथ॥बह्वदग्धमदग्धंवाकिंचिदेवयदाहविः॥श्रिष्टेनेध्मेनपुनर्यागःस्यादारभ्यादितस्तदा॥कृत्स्नंदग्धंयदातस्यात्सुनःकृत्वादयेद्धविः॥सएवयागःकर्त्तव्यःपुनर्यागस्तुनेष्यते॥मध्यात्पूर्वार्द्धतोवत्संयदिदुष्टंहविर्भवेत्॥तस्यैवहविषोवद्येन्मध्यात्पूर्वार्धतःपुनः॥इध्माधानेकृतेदुष्टंप्रधानंहविरत्रचेत्॥तत्स्थानेजुहुयादाज्यमदुष्टंचजुहोत्यथ॥एवंसमाप्ययदुष्टंतदप्सुप्रक्षिपेत्पुनः॥अन्याधानादिकोयागःपुनःकर्त्तव्यएवतु॥प्राग्गिध्माधानतोदुष्टेप्रधानहविषित्वथ॥तद्धविःपुनस्त्याद्यपूर्ववत्समापयेत्॥अंगानांचेद्धविर्दुष्टंतदप्सुप्रक्षिपेत्पुनः॥स्विष्टकृद्धविषोदोषश्चा ५१

ज्येनैवसमापयेत्॥प्रच्युतेसुनरैर्वःकेशैःकीटैर्वामेध्यसंविभिः॥वसासृक्शुक्रमज्जास्थिमूत्रविट्स्वेददूषकैः॥श्लेष्माद्यैरपिबीभत्सैर्दुष्टानिस्युर्हवींषिचेत्॥भिन्नानिचैवसिक्तानिदुष्टानिस्युःक्षिपेज्जले॥स्रुक्चेद्भिद्येततर्ह्यन्यामाहृत्यजुहुयाद्धविः॥वानस्पत्यानिभिन्नानिप्राग्दंडान्यनलेक्षिपेत्॥अन्यच्चाशुचिसंबद्धंमृन्मयंभिन्नमेववा॥भूमिर्भूमीतिमंत्रेणक्षिपेदेवनज्जले॥मंत्रः॥भूमिर्भूमिमगान्माता माताऽरमपगात्॥भूयास्मंपुत्रैःपशुभिर्योनौद्वेष्टिसमिंधनाति॥संस्पृष्टोयस्यगृह्याग्निरन्यगृह्याग्निनायदि॥चरुर्विविचयेत्कार्यायद्वापूर्णाहुतिर्भवेत्॥अग्निर्गुणीभवेद्देषुविविचित्वादिकोगुणाः॥चरुःक्षामायकर्त्तव्योगृहदाहेषुवैभवेत्॥प्रावाग्निनातुसंसर्गेकुर्यात्तुशुचयेचरुं॥पचनाग्नेस्तुसंसर्गेसंवर्गायचरुर्भवेत्॥विद्युतेनतुसंसर्गेकुर्यादप्सुमनेचरुं॥प्रायश्चित्तचरुस्थानेवापूर्णाहुतिरिष्यते॥पर्वण्यार्त्त

मि

श्रुपातेनकुर्याद्व्रतभृतेचरुं॥पर्वणिव्रतलोपेतुकुर्याद्व्रातपतंचरुं॥समानतंत्रंकुर्वंतिपार्व
णेनतुकर्मणा॥अरुणाग्नयपणोप्नीयान्नयान्नंयसुवेततः॥वैश्वानरायकर्त्तव्यश्चरुःपूर्णाऽऊति
स्तुवा॥द्विषदन्नंयदाभुंक्तेनत्रापेषचरुर्भवेत्॥कपालनाश्रोप्येषःस्याध्रुवणाकर्मनामनिक
पालंतऽवेऽग्निन्नंप्रागेवश्रपणाद्यदि॥तदातन्त्रोक्तमंत्रेणकपालंसंदधात्यथ॥अभिन्नोघर्मइत्या
श्यामक्षुतस्राक्षिपेदथ॥तच्चेदश्रुचिसंबद्धमाभ्यामेवक्षिपेज्जले॥भिद्येद्यदिपुरोडाशउत्क्षिपे
दथवायदि॥किमुत्पतसिमंत्रेणबर्हिष्येनंनिधापयेत्॥अभिमंत्रयतेतंतुमाहिंसीरितिमंत्रतः॥श्रू
यतेमृतवाक्श्चेद्यजमानेतुजीवति॥अग्नयेसुरभिमतेचरुःपूर्णाऽऊतिस्तुवा॥अथयस्यवधूर्गो
र्वाजनयेच्चेद्यमौतनः॥समरुद्भ्यश्चरुंकुर्यात्पूर्णाऽऊतिमथापिवा॥समारूढसमिन्नाशेपुनरा
धेयमिष्यते॥श्रौतोक्तमविरोधेन्यन्मृग्यंतुस्मार्तमास्त्विदं॥प्रायश्चित्तविशेषस्ययत्रनोक्तोभ ५२

वेद्विधिः॥होतव्याज्याऽऽहुतित्रयंभूर्भुवःस्वरितीहतु॥निमित्तानंतरंसर्वंप्रायश्चित्तंभवेदिह॥
प्रागेवोत्पद्यतेदोषआज्यसंस्कारतोयदि॥प्रायश्चित्तंभवेदाज्यसंस्कारानंतरंतदा॥व्युत्क्रमोदेव
तानांतुसंकल्पादोभवेद्यदि॥मंत्राणांव्युत्क्रमस्तद्वद्दोषादोतुभवेद्यदि॥मध्यात्पूर्वार्द्धतश्चेतिव्यु
त्क्रमोस्यभवेद्यदि॥द्रव्याणांक्रमःस्याच्चेत्तथानिर्वपणादिषु॥यद्दोदेवाऽऽचाब्रह्माजुहुयात्तुस्रु
वाऽऽहुतिं॥यन्मुख्यंस्वगृहेद्रव्यंहोमकर्त्रेददातितत्॥यजमानस्रुजुहुयाद्ब्रह्माभावेस्रुवाऽऽहुतिं॥
कस्मैचिद्ब्राह्मणायास्मिन्पक्षेद्रव्यंददातितत्॥होतव्यैकाऽऽहुतिश्चाज्याहुत्यारेव्येःसमुच्च
यात्॥सर्वत्रैवंप्रायश्चित्तरूपंजपंहोमंवाब्रह्मैवकुर्यात्॥जुहोतिजपतीतिप्रायश्चित्तेब्रह्म
णमितिसूत्रकृदुक्तेः॥तदभावेतुयजमानःसमानन्यायत्वात्॥यत्रस्वकालेकर्माकरणनि
मित्तंप्रायश्चित्तमुक्तंतस्मिन्प्रायश्चित्तेऽऽनीतंकर्मकार्यंनवेतिमतभेदः॥तदुक्तंकारिका

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC

यांप्रायश्चित्तेकृतेपश्चादन्यतमपिकर्मवै॥कार्यमित्येकआचार्यानेत्यन्येतुविपश्चितः॥
कर्मसमाप्तिसमयेऽगलोपेज्ञातेऽज्ञातेवांगलोपेप्रजापतिःप्रायश्चित्तमाह॥त्रमादालुप्तं
तांकर्मप्रच्यवेताध्वरेषुयत्॥स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिरिति॥एवमन्या
न्यपिप्रायश्चित्तानिग्रंथांतरतोवगंतव्यानि॥ ॥इतिश्रीप्रयोगरत्नेइष्टिप्रायश्चित्तानिने
मित्तिकप्रायश्चित्तानिच॥ ॥अथसकलधर्मसाधारणपरिभाषा॥तत्रकारिका॥आज्यैक
द्रव्यकेहोमेस्याच्चेदाज्यपरिग्रहः॥स्यात्परिस्तरणंतत्रकृताकृतमितिस्थितिः॥नोच्चार
णंयत्राज्यपदंकर्मसुसूत्रकृत्॥अनादिष्टाज्यहोमेषुतत्रनित्यापरिस्तृतिः॥सर्वस्मिन्याक
यज्ञेस्तआज्यभागौकृताकृतौ॥सर्वेषुपाकयज्ञेषुभवेद्वस्तुकृताकृतः॥धन्वंतरिमरवेब्र
ह्मेत्यःशूलगवेतथा॥ उचेहोमंक्वचिन्नाम्नाक्वचिन्मंत्रेणासूत्रेकृत्॥नोभयंतत्रतत्रेष्ट ५३

हवनं नामधेयतः॥नैकेकांचनपक्षोयंचोलादावाश्रितोयदा॥तदाग्निरिंद्रइत्याद्यो
नया इतिवृत्तिकृत्॥अनेकेपाकयज्ञाःस्युरेकस्मिन्काल एवतु॥समानतंत्रकाःका
र्यानतंत्रावृत्तिरिष्यते॥पात्रासादनमिध्मातआज्याधिश्रयणादिच॥स्रुवादिमार्जनंचेध्म
ज्रुप्रहरणंतथा॥पूर्णपात्रंभवेन्नित्यमाज्यस्योत्पवनंतथा॥द्रव्यानादेशआज्यंस्यादनुक्ते
साधनेस्रुवः॥जपानुमंत्रणेमंत्रउपस्थानामिमंत्रणे॥मंत्रोयःकर्मकरणेगृह्यकर्मण्युपा
शुषट्॥इदंकार्यमनेनेतिनक्वचिद्दृश्यतेविधिः॥लिंगादेवेदमर्थत्वंयेषांतेमंत्रसंज्ञिताः॥
मंत्रांतेकर्मकर्तव्यंमंत्रस्यकरणत्वतः॥कर्मावृत्तौतुमंत्रस्याप्यावृत्तिर्गृह्यकर्मणि॥मंत्रोन
देवतानांतुतूष्णीमेवाथनिर्वपेत्॥चतुरश्चतुरोमुष्टीन्प्रोक्षणंचतथाभवेत्॥सहैवश्रप
येत्तत्रनास्तिस्रुद्धरणंतथा॥आदिष्टमंत्रहोमेषुसर्वत्रैवंप्रतीयनामिनि॥कृताकृतंवैकल्पिकं॥

ऊचेइतिगृह्यसूत्रकारः॥क्वचिन्नाम्नाहोममादृत्यथासावित्र्येब्रह्मणइति॥क्वचिन्मंत्रेणा
ह॥यथा॥अग्नेनयसुपथारायेअस्मानितिचतसृभिरिति॥यत्रतुननामतोनवामंत्रतोहो
मउच्यतेकेवलंतद्धितेनैवमंत्रवर्णेनवापुनः॥देवतायाविधिस्तत्रदुर्बलंतुपरंपरं॥तद्धिता
दिनादेवताविधानं॥यथाप्राजापत्यस्यस्थालीपाकस्यकृत्वाकाम्याश्चरवइत्यादौतत्रचतु
र्थ्यंतेनदेवतानाम्नाहोमइत्यर्थः॥अनेकइति॥अथआग्रयणाश्वयुजीकर्मणीयदाश्वयुज्यां
क्रियेतेतत्रतयोरेककालताज्ञपेति॥जपादिषुषड्सुयःतृतीयोमंत्रउक्तस्तस्यलक्षणमेत
त्॥साम्यार्थंसर्वभावानांलिंगमित्यभिधीयते॥लिंगादर्थप्रकाशनसामर्थ्यात्॥इदम
र्थत्वंतत्तत्कार्यार्थत्वं॥ननुमंत्रसामान्यलक्षणमिदंअव्याप्तिव्याप्त्यादिदोषापत्तेः॥तस्मा ५४
त्रद्विशेषस्यैवमंत्रस्यलक्षणं॥एवंचमंत्रशब्दोद्व्यर्थःसामान्यार्थोविशेषार्थश्चेति।भगवान्॥

यत्रोपदिश्यतेकर्मकर्तुरंगंनतूच्यते॥दक्षिणस्तत्रविज्ञेयःकर्मणांपारगःकृ॥य
त्रदिङ्नियमोनोक्तोजपहोमादिकर्मसु॥तिस्रस्तत्रदिशःशस्ताऐंद्रीसौम्यापराजिता॥
अपराजिताऐशानी॥आसीनऊर्ध्वःप्रक्षोवानियमोयत्रनोच्यते॥तदासीनेनकर्त्तव्यंन
प्रक्षेननतिष्ठता॥तथा॥अनादेशेस्वयंकर्त्तासर्वेऋत्विक्पुरोहिताः॥प्राकूलतासाधनानां
प्राक्संस्थत्वंचकर्मणां॥तथा॥अविज्ञातस्वरामंत्राःप्रयोक्तव्याःप्रयोक्तृभिः॥एकश्चैवं
वहोमेषुविज्ञाताश्चविकल्पनः॥यस्मिन्मंत्रेनपठितःस्वाहाकारोभवेद्यदि॥स्वाहांतेनत्र
योक्तव्योहोमेषुप्रथमादिकः॥यत्रस्यात्सत्यंशब्दस्तत्रैवंहोमइष्यते॥सगंतेनत्रहोतव्यं
स्वाहाकारंपठेन्नतः॥जानीयात्सत्यंमंत्रंतदन्यानुपदेशतः॥ॐभूर्भुवःस्वःश्चेतिति
स्रोव्याहृतयोजपे॥आभिश्चहोमेतिसृभिश्चतुर्थस्यात्समासतः॥अथप्रयोगमंत्राणां

षड्विधंलक्षणंस्मृतं॥जपानुमंत्रणाप्यायनाभिमंत्रास्तथैवच॥उपस्थाकर्मकरणंषडुपा
युप्रयोगतः॥जपमुच्चारणंविद्यात्क्रत्वर्थमधितऊवेत्॥अर्थतःकार्यलाभश्चेदर्थएवक्रतौ
भवेत्॥मंत्रमुच्चारयन्नेवमंत्रार्थत्वेनसंस्मरेत्॥श्रोत्रिणंतन्मनाभूत्वास्यादेतदनुमंत्रणं॥
ततएवाभिमंत्रस्यलक्षणंचेक्षणाधिकं॥अङ्गिःसंस्पर्शनाधिक्यात्तदेवाप्यायनंस्मृतं॥
उपस्थानंतदेवस्यात्प्रणतिस्थानसंयुतं॥बाह्यंकर्मयदेतेषुकर्मकालेक्रियेततत्॥कर्मणः
करणंतस्यविहितार्थप्रकाशनं॥मंत्रेणकृत्वामंत्रोनेक्रियतेकर्मयेषुतु॥तथा॥प्रजाप
त्यमुपांशुस्यान्मध्यंसावित्रमेवच॥कृताकृतंब्रह्मवरणंब्रह्माचाज्यस्यसंस्कृतिः॥समागः
स्रुवद्रव्यैश्चआज्यभागौपरिस्थितिः॥व्रीहीणामवघातश्चतंडुलेषुकृताकृतः॥देवीभू
तघृतस्यापिविलापनविधिस्तथेति॥अत्रविहितंकर्मपवित्रपाणिःकुर्वीत॥यदाहदे

रीतः॥जपहोमहराद्येनेअसुरादिव्यरूपिणः॥पवित्रंकृतहस्तस्यविद्वंतिदिशोदश॥
अत्रिः॥उभाभ्यामपिपाणिभ्यांविप्रैर्दर्भपवित्रके॥धारणीयेप्रयत्नेनब्रह्मग्रंथिसमन्वि
ते॥ब्रह्मग्रंथिलक्षणंगरुडपुराणे॥अस्योर्ध्वोवेष्टवोमार्गोब्रह्मग्रंथिविनिर्मितः॥सकृत्व
दक्षिणीकृत्यपवित्रमभिधीयते॥तद्ब्रह्मग्रंथिमत्योक्तंपवित्रंवेदवेदिभिः॥पवित्रकर्तुरभि
मुखप्रदेशोब्रह्मभागः॥पवित्रदर्भसंख्याचनत्रैव॥सप्तभिःकुशापिंजूलैःकुर्याद्ब्रह्मपवि
त्रकं॥पंचभिःक्षत्रियस्यैवचतुर्भिस्तुतथाविशः॥द्वाभ्यांशूद्रस्यविहितमेतेषांतथैवच॥
मार्कंडेयस्तु॥चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं॥एकैकन्यूनमुद्दिष्टंवर्णेवर्णेयथा
क्रमं॥सर्वेषांवाभवेद्द्वाभ्यांपवित्रंग्रंथितंनवा॥त्रिभिस्तुशांतिकंकार्यंपौष्टिकंपंचभि
स्तथा॥चतुर्भिरभिचाराख्यंकुर्वन्कुर्यात्पवित्रकं॥हे मपवित्रंविशिष्यप्रशस्तमुक्तं॥हेमा

५६ भेदनां

द्रौ॥अन्यानिचपवित्राणिकुत्राद्यर्वात्मकानिच॥हेमात्मकपवित्रस्यद्वेकांनार्हंतिषोडशमिति॥द्रव्यभेदेनाकृतिप्रमाणमुक्तंसिद्धांतरत्नेश्वरे॥कर्षप्रमाणमाज्यंस्यान्मधुक्षीरंचतत्समं॥तंडुलांशुक्तिमात्रंपायसंप्रसृतेःसमं॥कर्षमात्राणिभक्ष्याणिलाजामुष्टिमितामताः॥अन्नंग्रासससंग्राह्यंशाकंग्रासार्द्धमात्रकं॥मूलानांतुत्रिभागःस्यात्कंदानामष्टमोंशकः॥इक्षुपर्वप्रमाणंस्यादंगुलिद्वितयंलता॥प्रादेशमात्यःसमिधोब्रीह्यणमंजरीसमाः॥तिलसक्तुकणादीनांमृगीमुद्राप्रमाणतः॥पत्रपुष्पफलानांतुस्वमानाकृतिरिष्यते॥चंद्रश्रीखंडकस्तूरीकुंकुमागरुकर्दमाः॥हरिमंथसमाःप्रोक्तागुग्गुलुर्वदरीसमः॥आकृतानामिदंमानंकथितंवेदवेदिभिरिति॥हरिमंथश्चकणाः॥मृगीमुद्रालक्षणमुक्तंतत्रैव॥स्याच्त्रिमुद्रामृगीमुद्राहोमेसर्वफलप्रदेति॥अरणीजन्यादेरग्नेः

५६

सूकरीकरसंकोचीहंसीमुक्तकनिष्ठिका॥मार्गिकनिष्ठातर्जन्योमुद्रात्रयमुदाहृतं॥होमेमुद्रात्रयंप्रोक्तंमृगीहंसीचसूकरी॥मुद्राहीनंचयत्प्रोक्तंतत्सर्वंनिष्फलंभवेत्॥कामनायांविशेषउक्तःकण्वेन॥यज्ञशांतिककल्पाभेमृगीहंसीप्रकीर्तिताअभिचारान्यहोमेषुसूकरीकथितबुधैः॥१

तमादिकत्वमुक्तंतत्रैव॥उत्तमोरणिजन्योग्निर्मध्यमःसूर्यकांतजः॥उत्तमःश्रोत्रियागारान्मध्यमःस्वगृहादिजः॥एतमग्नितामसौवर्णराजतादिपात्राभ्यांप्रणयेत्॥तथाचात्रिःपात्रांतरेणापिहितेताम्रपात्रादिकेशुभे॥अग्निप्रणयनंकुर्याच्छरावेतादृशेपिवा॥आपस्तंबः॥नाप्रोक्षितमिंधनमग्नावादध्यात्॥बर्हिरर्थंकुशाभावेप्रतिनिधयःस्मृत्यर्थसोरबर्हिःकाशमयंग्राह्यंनलभ्यतेकुशायदि॥शरो शीरमु चथाश्च बालमुजार्जु नेक्षवः॥तीक्ष्णधारतृणाविशेषःगंधितेजनादारू दूर्वाक्षीरकुसुमाअपि॥यद्वासर्वतृणेभ्योपिग्राह्यंबर्हिर्यथोक्षितं॥शुष्कमूलकुशमूलदुर्गंधितृणवर्जितं॥शाखातपः॥समित्कुशफलादीनिब्राह्मणःस्वयमाहरेत्॥शूद्रानीतैःक्रियाकर्मकुर्वन्व्रजत्यधः॥विष्णुः॥दर्भैश्चावपामासस्यसमंत्रोत्पाटिताःकुशाः॥अयातया

५७

मास्तेज्ञेयाःनियोज्याःसर्वकर्मसु॥वर्षमितिनिरोधः॥कुशोत्पाटनमंत्रमाह॥कश्यपः॥शु
चौदेशेशुचिर्भूत्वास्थित्वापूर्वोत्तरामुखः॥ॐकारेणैवमंत्रेणकुशान्स्पृष्ट्वाद्विजोत्तमः॥ब्र
ह्मणासहोत्पन्न परमेष्ठिनिसर्गज॥नुदपापानिसर्वाणिदर्भस्वस्तिकरोभव॥इमंम
त्रंसमुच्चार्यततःपूर्वोत्तरामुखः॥ॐफट्कारेणदर्भांस्तुसमूलच्छित्वासमुद्धरेत्॥हारीतः॥
अछिन्नाग्र्यविशिष्टांश्चसमूलान्कोमलान्शुभान्॥पितृदेवद्विजार्थंहिसमादद्यात्कुशा
द्विजः॥मासेनभस्यमावास्यात्स्यादर्भाश्चयोमतः॥अथातथामास्यदर्भानियोज्यास्युःपु
नःपुनः॥गोभिलः॥कुशामूलेस्थितोब्रह्माकुशामध्येजनार्दनः॥कुशाग्रेशंकरंविद्या
त्रयोदेवाःकुशेस्थिताः॥हारीतः॥चितोदर्भःपथिदर्भायेदर्भायज्ञभूमिषु॥स्तरणा
सनपिंडेषुषट्कुशान्परिवर्जयेत्॥ब्रह्मयज्ञेषुयेदर्भायेदर्भाःपितृतर्पणे॥हतामूत्रपु ५७

रीषाभ्यांतेषांत्यागोविधीयते॥मार्कंडेयः॥कुशापाणिःसदानिंद्यःस्नाणोदंभवर्जितः॥
सनित्यंहंतिपापानितूलराशिमिवानलः॥इध्मवृक्षानाहमरीचिः॥पालाशःखादिरोश्वत्थः
शमीवटउदुंबरः॥अपामार्गोदूर्वाश्चकुशाश्चेत्यपरेविदुः॥दशाद्वादशाचांगुल्यःसमाः
पंचैशस्मृताः॥नत्वंगुष्ठाःसत्वचश्चसाग्रेइध्मइहोत्तमः॥ब्रह्मपुराणेपि॥शमीपलाशा
न्यग्रोधप्लक्षवैकंकतोद्भवः॥अश्वत्थोदुंबरोविल्ववंदनःसरलस्तथा॥सालश्चदेवदारुश्च
खदिरश्चैवयज्ञियाः॥दक्षिणायांविशेषउक्तोमहारीते॥वेदोपनिषदेचैवसर्वकर्मसुद भा
क्षिणा॥सर्वत्रैवतुचोद्दिष्टाभूमिर्गोथकांचनं॥वैजवापः॥शिवनेत्रोद्भवंयस्मात्तस्मा
त्तत्प्रियवल्लभं॥अमंगलंनयत्नेनदेवकार्येषुवर्जितं॥अन्यच्च॥यज्ञोपवीतेद्वेधार्येश्रौते
स्मार्त्तेचकर्मणि॥तृतीयमुत्तरीयार्थेवस्त्राभावेतदिष्यते॥सदोपवीतिनाभाव्यंसदाबद्ध

क्षिरवेनच॥ विक्षिरवोयुपवीतश्चयत्करोतिननत्कृन्तमिति॥ अत्रपूर्वाद्दिनसदाक्षि
वक्षात्पुरुषार्थना॥ उत्तराद्दिनविपर्ययनिंदाद्वारेणसक्षिरवसोप वीतिभ्यांकर्त्तव्यंकर्मे
ति कीर्त्तनात्कर्मार्थना॥ एवंचकर्मकालेक्षिरवाबंधोपवीताभावेकर्मांग लोपनिमित्तं
लोप पुरुषार्थनिमित्तंचेतिप्रायश्चित्तद्वयंभवति॥ दर्शपूर्णमासयोरिवान्नवदने॥ कर्मणो
बहिस्तुपुरुषार्थलोपनिमित्तमेकमेवेतिविवेकः॥ संग्रहे॥ प्रभुःप्रथमकल्पस्ययोनुकल्पे
नुवर्त्तने॥ स नाप्नोतिफलंतस्यपरत्रेतिश्रुतिस्मृतिः॥ बह्वल्पंवास्वगृह्योक्तंयस्ययत्कर्म
चोदितं॥ तस्यतावतिनाशस्यार्थलुप्तेसर्वःलुप्तोभवेत्॥ कविर्नोषेऽग्निनामानि॥ पावको भ
लौकिकोह्यग्निःप्रथमःसंप्रकीर्तितः॥ अग्निसुमारुतोनामगर्भाधानेविधीयते॥ त
तःपुंसवनेज्ञेयःपवमानस्तथैवच॥ सीमंतेमंगलोनामप्रबलोजातकर्मणि॥ नाग्नि ५८

वैपार्थिवोह्यग्निःप्राशनेतुशुचिः स्मृतः॥ सभ्योनामसचौलेतुव्रतादेशेसमुद्भवः॥
गोदानेसूर्यनामाग्निर्विवाहेयोजकोमतः॥ आवसथ्येद्विजोज्ञेयोवैश्वदेवेतुरक्तकः॥
प्रायश्चित्तेविष्टश्चैवपाकयज्ञेपाचकः॥ देवानांहव्यवाहश्चपितॄणांकव्यवाहनः॥ शां
तिकेवरदःप्रोक्तःपौष्टिकेबलवर्द्धनः॥ पूर्णाहुत्यामिलोनामक्रोधोग्निश्चाभिचारि
के॥ वश्यार्थेकामदोनामवनदाहेतुदूषकः॥ कुसीतुजाठरोज्ञेयःक्रव्यादोमृतदाहने॥
वह्निनामालक्षहोमेकोटिहोमेहुताशनः॥ समुद्रेवाडवोह्यग्निःक्षयेसंवर्त्तकस्तथा॥
ब्रह्मावैगार्हपत्यश्चईश्वरोदक्षिणस्तथा॥ विष्णुराहवनीयःस्यादग्निहोत्रेत्रयोग्नयः॥
ज्ञातेवमग्निनामानिगृह्यकर्मसमारभेत्॥ स्मृत्यर्थसारे॥ बर्हिर्धेधनेचाग्नौसुसमिद्धे ५९
विधूमके॥ सांगारेलेलिहानेचहोतव्यंनान्यथाक्वचित्॥ स्रुवस्रुगादिप्रकृतिवृक्षाः

स्मृत्यर्थसारे॥जुहूपालाशयुपभृदाश्वत्थीवैकंकतीध्रुवा॥यद्वासर्वास्रुचःकार्याएतेवा
मन्यवृक्षजाः॥शमीमयास्रुचःकार्याःसर्वावाभूर्जवृक्षजाः॥तद्भावेयथालाभमन्य
यज्ञियवृक्षजाः॥खादिरस्तुस्रुवःकार्यःशम्याघ्राणित्रमेक्षणे॥खादिरोमुसलःकार्यो
पालाशस्याद्दृढेखलः॥यद्वोभोवारणोकार्योतदभावे न्यवृक्षजो॥मुख्याभावेतुसदृशो
द्रव्यंप्रतिनिधीयते॥यावद्यावत्समादत्तेतत्तदेवहि गृह्यते॥संग्रहे॥प्रणीतोपूर्णपात्रार्थे
दारुकांस्यमयोमखे॥खदिरपलाशस्रुवःकार्यःपलाशोनजुहूर्भवेत्॥त्यक्त्वदेशाविलोस्या
तामन्यैर्वायज्ञियद्रुमैः॥तदभावेपलाशस्यपर्णाभ्यांहूयतेहविः॥पलाशपर्णाभावेतुपर्णे
र्वाप्यश्लोहवैः॥पर्णपत्रंमध्यमं॥मध्यमेनपर्णेनजुहोतीतिश्रुतेः॥चमसंवाप्रणीतामा
कांस्यपात्रमथापिवा॥घटनाप्रकारःसंग्रहे॥आयाम्यंपंचधाकृत्वाद्विभागंपात्रमुच्यते॥ ५९

त्रिभागंदंडमित्याहुरेतदायामलक्षणं॥पात्रायामार्द्धतःपात्रविस्तारश्चतदर्धतः॥यो
वाविस्तारस्तस्यार्द्धंद्विलस्योच्छ्रायइष्यते॥विस्तारादिगुणंपात्रंग्रीवाविस्तारमर्धतः॥अ
न्यानितुलक्षणानिविस्तारभयेननोक्तानि॥तथा॥काम्येप्रतिनिधिर्नास्तिनित्येनैमित्ति
केचसः॥काम्येषुपक्रमाद्ऊर्ध्वमन्येप्रतिनिधिंविदुः॥नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निक
र्मसु॥सदेशकालयोर्नास्तिनारणेऽग्निरेवसा॥नाभावस्यप्रतिनिधिरभावांतरमिष्यते॥ना
पिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्रचित्॥इत्यादि॥तथा॥स्वकालादुत्तरोगौणःकालःस
र्वस्यकर्मणः॥तथा॥कुशादर्व्यादयोमंत्राब्राह्मणाश्चबहुश्रुताः॥नतेनिर्माल्यतांयांतिवि
नियोज्याःपुनःपुनः॥कुशाःषट्सुतुनिर्माल्यादर्व्याद्याअभिचारिके॥मंत्रास्तत्रचशूद्रा
र्थेब्राह्मणाःप्रेतभोजिनः॥षट्सुतर्पणश्राद्धासनभोजनमूत्रपुरीषकालधारि तेषु॥तत्र

भिचारिके॥ कृतंविहितंकर्मवि स्मर्पणंकार्यं॥ तथाच॥बृहन्नारदीये॥विस्मर्पितानि कर्माणिसफलानिभवंतिहि॥अनर्पितानिकर्माणिभस्मनिन्यस्तहव्यवत्॥नित्यंनैमित्तिकंका म्यंयच्चान्यन्मोक्षसाधनं॥विष्णोःसमर्पितंसर्वंसात्विकंसफलंभवेत्॥गीतायां॥यत्करोषियद श्नासियज्जुहोषिददासियत्॥यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणं॥इति॥विहितमितिवि शेषः॥इत्यादि॥एवमन्याअपिपरिभाषाज्ञेयाः॥ ॥इतिश्रीनारायणभट्टकृतेप्रयोगरत्नेप रिभाषाप्रकरणं॥ ॥अथगर्भाधानाद्याःसंस्कारा उच्यंते॥तत्रप्रथमेरजोदर्शनेमासादोदुष्ट सतिगर्भाधानस्यशांतिकपूर्वकंकर्तव्यत्वाच्छांतिकंवक्तुंदुष्टकालाउच्यंते॥प्रथमेरजसिचैत्र ज्येष्ठाषाढभाद्रपदकार्तिकपौषाअशुभाः॥आश्विनोमध्यमः॥शेषाःशुभाः॥क्वचिद्देशाचार फाल्गुनपूर्वार्द्धयोरधमत्वमुक्तं॥तिथिषुप्रतिपच्चतुर्थीषष्ठ्यष्टमीद्वादशीचतुर्दशीपौर्णमास्य मावास्याअशुभाः॥शेषाःशुभाः॥क्वचित्सप्तम्येकादश्यावशुभेअष्टमीद्वादश्येशुभे भवेत्॥ ६०

वासरेषुरविभौमसंज्ञवाराअशुभाः॥केचित्सोमोप्यशुभउक्तः॥नक्षत्रेषुभरण्यार्द्रापुष्याश्ले षापूर्वाज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदारेवत्योःअशुभाः॥चित्राविशाखास्वाश्वयणाश्विनी मघास्वातयोमध्यमाः॥अन्यानिशुभानि॥कैश्चिदुत्तरात्रिकापुनर्वस्वनुराधारेवत्योप्यशुभउ क्तः॥एवंचतासांमध्यमत्वंएवमन्यत्रापि॥योगेषु व्याघातस्याधानवज्रयोर्गंडातिगंड योः॥षट्शूलेपंचदंडापरिघपूर्वार्द्धवैधृतिर्व्यतीपातश्चेत्यशुभाः॥वज्रंमध्यमं॥अन्येशु भाः॥करणानिविष्टिंविनासर्वाण्यशुभानि॥अहोरात्रेधाविभक्तेआद्योभागः शुभः॥द्वितीयो मध्यमः॥तृतीयोदुष्टः॥एवंरात्रौ॥सूर्योदयास्तमयावप्यशुभौ॥रविसंक्रमणादधोनाडीचतु ष्टयमूर्ध्वंचात्यशुभं॥संक्रांत्यादिदग्धदिनेघशुभं॥रविचंद्रोपरागयोरप्यशुभं॥संध्योपर वरावारयोश्चेशुभर्तुरात्मनश्चतुर्थाष्टमद्वादशस्थेचंद्रेजीर्णरक्तनीलमलिनक्षुद्रवस्त्रेषुपरि हृतेषुनशुभं॥संमार्जनीकाष्ठमृत्तृणाग्निभूर्पतुषभुङ्क्षनखलोहपाषाणशस्त्रादिधारिणा

एतैर्युक्तदेशेवाशुभं॥देहलीद्वाररथ्यापितृमातृगेहेषुशुभं॥ऊर्ध्वस्थितायानिद्रितायाश्चा
शुभं॥शय्यादौशुभं॥पित्रादिसविस्वभर्तृभिर्दृष्टमशुभंशय्यादौशुभमित्यादिज्ञेयं॥दुष्ट
मासादौप्रथमरजोदर्शने तांबूलभक्षणादिमंगलाचारंनकुर्यात्॥द्वितीयेतुशुभेतत्र
कुर्यादितिकेचित्॥प्रथमेदुष्टेरजोदर्शनेद्वितीयंप्रतीक्ष्यतस्मिन्नप्यशुभेवक्ष्यमाणां
विस्तरेणशांतिंकुर्यादित्यपिकेचित्॥प्रथमएवयथाशक्तिशांतिंचरेदित्यपरे॥अत्रैक
स्मिन्नप्यशुभेवक्ष्यमाणशांतिःकार्या॥द्वित्र्याद्यशुभसन्निपातेतुतत्सूचितबहुशुभनिरा
सार्थंवक्ष्यमाणाङ्गुनिसंख्यादिविवृध्याकुर्यात्॥यथाशक्तीत्यादिज्ञेयं॥इतिशुभाशुभवि
चारः॥ ॥अथशांतिरुच्यते॥तत्रैवंविनायकं पूज्यग्रहांश्चैवंविधानतः॥कर्मणांफ
लमाप्नोतीतियाज्ञवल्क्येनकर्मफलसिद्ध्यविघ्नार्थत्वेनग्रहयज्ञस्यानावश्यकत्वोक्ते ६१

रिहचत्रैगनकेन॥आर्तवानांतुनारीणांशांतिंवक्ष्यामित्रैगनकइत्युपक्रम्यग्रहांतिथ्यपुरः
सरमितिप्रकरणोक्तेरावश्यकत्वादेकदेशकालकर्तृकाणांचविशेषवचनाभावेनत्रैणकर्तृ
व्यत्वात्ग्रहमखपूर्वकस्तत्रैणशांतिप्रयोगउच्यते॥रजोदर्शनानंतरंपंचमादिदिनेचंद्रतारा
द्यानुकूल्येशुचिदेशेसुस्नातयापत्न्यायुतःपतिःप्राङ्मुखउपविश्यप्राणानायम्यदेशकालौ
स्मृत्वाममपत्न्याःप्रथमरजोदर्शनेःमुकदुष्टमासादिसूचितसकलारिष्टनिरासद्वाराश्रीप
रमेश्वरप्रीत्यर्थंसग्रहमखांत्रैणकोक्तांशांतिंकरिष्ये॥इतिसंकल्प्यगणेशपूजनपुण्या
हवाचनगोर्यादिषोडशमातृकापूजनब्राह्म्यादिसप्तमातृकापूजननांदीश्राद्धानिकृत्वा
शांतंदांतंकुटुंबिनंमंत्रतंत्रज्ञमाचार्यंब्रह्माणंचजपहोमार्थमष्टोषट्चतुरोवाऋत्विजोपि
रत्वागंधादिनापूजयेत्॥ततःआचार्योगृहेशानदेशेशुचौमहीद्योरितिभूमिंस्पृष्ट्वापत्ये

सुवर्णाश्चत्वारः पंचवापिप्रकीर्तितं॥पलं चकुंकुमस्यआदकोद्रोणएवच॥धान्य इ
मानेषुविज्ञेयाक्रमशोमीचतुर्गुणाः॥नदक्षिणोत्तरतश्चतथैवमंत्रावृत्याभूमिंस्पृष्ट्वा॥
ऊषधयःसमितिद्रोणप्रमाणव्रीहिभिर्मध्येनदक्षिणोत्तरतश्चस्पृष्टदेशेमंत्रावृत्या
रात्रित्रयंकृत्वातेनैवक्रमेणरात्रित्रयेनवमकालकमभग्नंकुंभत्रयमाकलशेधिति
मंत्रावृत्यास्थापयेत्॥एवंसर्वत्रमंत्रावृत्तिः॥ततःप्रसुवआपइतिनवर्चस्यसूक्तस्यसिं
धुक्षित्रेप्यमेधोनयोजगती॥कलशोदकपूरणेविनियोगः॥प्रसुवआपइत्यादि
सकृत्॥याःप्रवतइत्यस्यवसिष्ठोनद्यःऋषिः॥विनियोगःपूर्ववत्॥एवमग्रेपितत्र
तत्रविनियोगोज्ञेयः॥गंधद्वारमितित्रिर्घृतगंधंक्षिप्त्वा॥याऊषधीरितिसर्वौषधीः॥
ऊषधयःसमितियवान्क्षिपेत्॥ततोमध्यकुंभेयवव्रीहितिलमाषकंगुश्यामाकमु ६२

द्गान्क्षिप्त्वागायत्र्योदुंबरकुशदूर्वारक्तोत्पल॥चंपकबिल्वविष्णुक्रांतातुलसी॥बद्धि
षात्रंखपुष्पी॥शतावरी॥अश्वगंधानिर्गुंडी॥रक्तपीतसर्षपाःपामार्गपलाशापनस॥
जीवकात्रियंगुगोधूमाव्रीह्यश्वत्थादधिदुग्धाघृतापद्मपत्रानीलोत्पलासितारक्तापरा
जाकुरंटकगुंजावचाभद्रमुस्ताख्यानिद्वात्रिंशद्दोषधानिसर्वाणियथासंभवंवा
क्षिपेत्॥ततस्त्रिषुकलशेषुकांडात्कांडादितिदूर्वाश्वत्थेवदितिपंचपल्लवान्॥गजाश्व
स्थानरथ्यावल्मीकसंगमक्रदगोष्ठस्थामृदःस्योनापृथिवीतिक्षिप्त्वायाःफलिनीरिति
पूगीफलानि॥सहिरत्नानीतिकनककुलिशानीलपद्मरागमौक्तिकानिपंचरत्नानि॥हि
रण्यरूपइतिहिरण्यंचक्षिपेत्॥युवासुवासाइतिसूत्रेणवाससाचकलशाकंठान्वेष्टय
त्वा॥गंधाक्षतपुष्पमालादिभिःकलशान्भूषयेत्॥ततःकलशत्रयोपरितेनैवक्रमेण

सौवर्णराजतंकांस्यमयंताम्रमयंवैणवंमृन्मयंवायवादिधूरितंपात्रत्रयंपूर्णोदकै
तिनिधायतदुपरिश्वेतंवस्त्रत्रयंन्यस्यतत्रचंदनादिनाष्टदलानिकुर्यात्॥तत्रमध्य
मे॥गायत्र्याविश्वामित्रोभुवनेश्वरीगायत्री॥भुवनेश्वर्यावाहनेविनियोगः॥तत्सवितु
र्वरेण्यं०भुवनेश्वरीमावाहयामि॥यथान्याक्तिसुवर्णनिर्मितांभुवनेश्वरीप्रतिमामभ्यु
क्षारणपूर्वकंस्थापयेत्॥तद्दक्षिणकुंभोपरिवस्त्रे॥इंद्राणीवृषाकपिरिंद्राणीपंक्तिः॥
इंद्राण्यावाहनादौविनियोगः॥इंद्राणीमासुनारिषु०॥इंद्राणीमावाहयामीतितथैव
सौवर्णमिंद्राणीप्रतिमांसंस्थाप्योत्तरकलशोपरि॥इंद्रत्वाविश्वामित्रइंद्रोगायत्री॥
इंद्रावाहनेविनियोगः॥ॐइंद्रंत्वावृषं०॥इंद्रमावाहयामीतिसौवर्णमिंद्रप्रतिमांस्था
पयेत्॥ततऊर्ध्वमंत्रैरुक्तक्रमेणदेवतात्रयस्यकोष्ठानुसमयेनषोडशोपचारपूजांकुर्यात्॥ ६३

ततो मध्यकुंभेआचार्येष्टसहस्रमष्टशतंवागायत्रीजप्त्वाश्रीसूक्तंजपेत्॥यथा॥हिरण्य
वर्णामितिपंचदशर्चस्यसूक्तस्यकर्दमानंदचिक्लीतेंदिरासुताऋषयः॥श्रीर्देवताआद्यास्ति
स्रोनुष्टुभः॥ततएकाप्तस्तारपंक्तिः॥ततोद्वेत्रिष्टुभौ॥ततोष्टावनुष्टुभोंत्याप्तस्तारपंक्तिः॥जपे
विनियोगः॥ॐहिरण्यवर्णामित्यादि॥ततएकोऋत्विग्दक्षिणकुंभेरुद्रसूक्तानिजपेत्॥य
थाकद्रुद्रायेतिनवर्चस्यसूक्तस्यघोरःकण्वोरुद्रोगायत्री॥जपेविनियोगः॥आतेपितरिति
पंचदशर्चस्यगृ त्समदोरुद्रस्त्रिष्टुप्॥जपेवि
नियोगः॥इमारुद्रायस्थिरधन्वनइतिचतसृणांवसिष्ठोरुद्रस्त्रिष्टुप्॥जगत्यौत्र्यक्षरेण॥जपे
विनियोगः॥आवोराजानंवामदेवोरुद्रस्त्रिष्टुप्॥जपे०॥तमुष्टुहिभोमोत्रिरुद्रस्त्रिष्टुप्॥जपे०॥
भुवनस्यपितरंहुवेम्याहरुद्रस्त्रिष्टुप्॥जपेवि०॥त्र्यंबकंयजामहेरुद्रोनुष्टुप्॥जपे०॥अथान्योरुद्रसि

६४

पुनरकुंभेएकादशाग्निभीरुदंजपेत्॥तत्रादौन्यासान्कृत्वा॥ऋष्यादिस्मरेत्॥यथा॥तमका
नांप्रथमकानांप्रथमानुवाकेआद्यायाःकश्यपःद्वितीयायाआत्रेय स्तृतीयायाःकश्यपःत
तोद्वयोर्गौतमःतनएकस्याःकण्वस्ततोद्वयोर्मरुत्वांस्तनएकस्याभगवांस्तनस्तिसृणांनारद
स्तनस्तिसृणांभगवान्द्वितीयानुवाकस्यमंडूकस्तृतीयानुवाकस्यभगवांश्चतुर्थानुवाकस्य
दुर्वासाःपंचमषष्ठानुवाकयोर्भगवान्सप्तमानुवाक स्यहेमकोऽष्टमानुवाकस्यनवमानु
वाकेचनमोवइतियावद्भगवान्अवशिष्टस्याग्निर्दशमानुवाकेप्रथमस्यपुलहोद्वितीयस्य
स्कंदस्ततोद्वयोर्मंडव्यस्तनएकस्यदेवराट्॥तनएकस्यभगवांस्तनएकस्यात्रिस्तनएकस्यवैया
घ्रस्तनएकस्यभगवांस्तनएकस्यवैराजस्तनएकस्यपुलहस्तनएकस्यनारदस्तनएकादशा
नुवाकेआद्यानांचतुर्णांदुर्वासास्तनआसप्तानिदेवलइत्यृषयः॥प्रथमानुवाकेआद्यस्यरुद्र
स्तनएकस्यशंभुस्तनएकस्यस्कंदात्मारुद्रस्ततोद्वयोरुद्रस्तनएकस्यशंभुस्ततोद्वयोरादित्यत्रा ६४

रुद्रस्तनएकस्यशंभुस्तन स्तिसृणांरुद्रस्तनस्तिसृणांभगवांस्ततोद्वितीयतृतीयानुवाकयोस
ष्ठश्चतुर्थपंचमषष्ठानुवाकानांशंभुःसप्तमानुवाकस्यरुद्रोऽष्टमानुवाकस्यनमोवःकिरिकेभ्य
इत्यंतस्यचनवमानुवाकस्यभगवानवशिष्टस्यरुद्रोदशमानुवाकेचतुर्णांरुद्रस्तनएकस्य
नंदीश्वरात्मारुद्रस्तनएकस्यभगवांस्तनएकस्यशंभुस्तनएकस्यरुद्रस्तनएकस्यभगवांस्ततोद्व
योःशंभुस्ततोवशिष्टानांरुद्रइतिदेवताः॥प्रथमानुवाकेआद्येअनुष्टुभौतनएकास्वराडनुष्टुप्
तनएकानिचृदनुष्टुप्तनएकानुष्टुप्तनएकानिचृदनुष्टुप्तनएकाप्रस्तारपंक्तिःपंचपद
वापंक्तिःतनएकाषट्पदाजगतीतनःसप्तानुष्टुभस्ततोष्टानुवाकायज्ञूंषिःस्तनएकाप्रस्तारपं
क्तिःपंचपदापंक्तिर्वातनएकानुष्टुप्तनश्चतस्रोजगत्यस्ततस्तिस्त्रस्त्रिष्टुभस्तनएकापंचपदात्रि
ष्टुप्महाबृहतीवाततोद्वादशानुष्टुभस्तनस्त्रीणियजूंषिस्तनस्तिस्रोनुष्टुभस्तनएकंयजुरितिछंद
सि॥अथचमकानामग्निःकांडऋषिःआद्याआसावेतवीगायत्रीत्रिष्टुभांबार्हताद्यो ऽनादिष्टि

त्रोषादेवताःयजुःजपेविनियोगः॥एवंरुद्रंजप्त्वा॥त्रांनइंद्राग्नीतिसूक्तंजपेत्॥त्रींनइंद्रेति
पंचदत्रार्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप्जपेवि०ततःकुंभपश्चिमदेत्रोस्थंडिले
ग्निंप्रणीयतद्दीशान्यांवेद्यादोनवयज्ञादींस्तन्नंत्रेरावाह्यषोडत्रोपचारैःसंपूज्यतद्दीश
न्यांप्राग्वत्कुंभंसंस्थाप्यतत्रवरुणमावाह्याग्निसमीपमेत्याज्याधानंकुर्यात्॥यथा॥इंसमि
धावाधायदेवतापरियहार्थमन्वाधानंकरिष्येऽस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्ये
नित्यंनमुक्त्वा॥नवयज्ञान्त्रत्येकममुकसंख्याभिःसमिन्निलाज्याहुतिभिर्भुवनेश्वरींप्रत्येकममु
कसंख्याभिर्वातिलमिश्रगोधूमपायसाज्याहुतिभिरित्युक्त्वात्रीषेणस्विष्टकृतमित्यादियष्ट्वा
इत्युक्त्वाजुहुयात्॥अन्येतु॥गायत्र्यैवतुहोतव्यंहविरत्रचतुष्ट्यंततःस्विष्टकृतो द्वुत्वेतिनेत्रो
नकेनेंद्राणीड्योर्होमानभिधानात्तयोर्होमोनास्तीत्याहुः॥तन्मतेन्वाधानादौतत्कीर्तनाभाव॥
आहुतिसंख्यावक्ष्यते॥ततःपरिस्तरणादिपूर्णपात्रनिधानांतंकृत्वाभुवनेश्वरीइंद्राणीड्योः ६५

मुष्मेत्वेतिमनसाध्यायंस्रुचीचतुरश्चतुरोमुष्टीन्निरूप्याहुतिबहुत्वाच्चानुरूपगोदुग्धेपायसंश्च नि
यथितंघृतंसंस्काराद्याज्यभागांतंकुर्यात्॥ततोयजमानोदक्षिणतउपविश्य॥होमार्थंचजपा
र्थंचवरयेदत्विजोबहून्॥आचार्योद्विजैःसहेतिचोक्तेराचार्यर्त्विजांहोमावगमानेषांचास्व
त्वेनत्यागायोगात्तेश्चक्रियमाणेहोमेयजमानेनप्रत्याहुतित्यागस्याशक्यत्वात्तदानीमेवांग
प्रधानदेवताउद्दिश्यएताभ्यइदंनममेतित्यजेत्॥ततआचार्यःसऋत्विक्नवयज्ञेभ्योष्टशता
का ष्टविंशत्यष्टन्यूनसंख्याघृताक्ताअर्कादिसमिधस्तिलाज्याहुतीश्चहुत्वाधिदेवताप्रत्यधि
देवताविनायकादिपंचलोकपालेभ्यस्तन्न्यूनसंख्ययाजुहुयात्॥एभ्यस्तुपालाशयःसमिधः॥
गृह्णांयदाश्नोतदान्येभ्यश्चतस्रइतिसंप्रदायः॥ततोभुवनेश्वर्यैगायत्र्यादधिमधुघृताक्ता
भिस्तिलमिश्रैर्वाभिरेकाहुतिरित्येवमष्टसहस्रमष्टशतंवाहुत्वाहुतीर्घृताक्तातिलमिश्रगोधूमा
हुतीःपायसाहुतीर्घृताहुतीश्चजुहुयात्॥एवमिंद्राणीड्योःप्रागुक्तमंत्राभ्यांक्रमेणहुत्वाश्च

तुष्टयंप्रत्येकमष्टशतसंख्यंभुवनेश्वर्याअष्टसहस्रपक्षेजुहुयात्॥तस्याष्टशतपक्षेतुतयो
रष्टाविंशतिरितिसंप्रदायः॥पक्षेतुतयोर्नहोमः॥ततःसिष्टकृदादिप्रायश्चित्तहोमांतंकृत्वा
इंद्रादिदिक्पालेभ्योनवग्रहेभ्योभुवनेश्वरीद्वारपालेभ्यःक्षेत्रपालायचसदीपान्नाषभक्तबलीं
स्तत्तन्मंत्रैर्दत्वापूर्णाहुतिंसमुद्राद्दूर्मिरितिमंत्रेणजुहुयात्॥अस्यगोतमोवामदेवोग्निस्त्रि
ष्टुप्॥पूर्णाहुतिहोमेविनियोगः॥ततःप्रणीताविमोकंकृत्वाभुवनेश्वर्यादिकलशोदकंग्रह
कलशोदकंचपात्रांतरेगृहीत्वातेनतत्तत्स्थंचपल्लवैःसकुशाद्दूर्वैर्धृतनववस्त्रेयजमानंधृ
तनवैवस्त्रकंचुकींचनद्वारमस्थांकृतमंत्रीसन्॥त्विगुद्गुमुखआचार्योभिषिंचेदेतैर्मंत्रैः॥तत्र
आपोहिष्ठेतिनवर्चस्यसूक्तस्यांबरीषःसिंधुद्वीपआपोगायत्र्योंत्येहेअनुष्टुभौपंचमीवर्धमा
नासप्तमीप्रतिष्ठा॥अभिषेकेविनियोगः॥यएकइद्विदयतइतिगोतमोराहूगणइंद्रउष्णिक्

क्॥अभिषेकेविनियोगः॥त्रिभिष्टंदेवेतिसप्तर्चस्यसूक्तस्यवसिष्ठआद्यानांत्रयाणा
मग्निस्तनश्चतुर्णांविश्वेदेवाआद्यागायत्रीद्वितीयानुष्टुप्तृतीयस्त्रिष्टोगायत्र्योंत्येहेनुष्टुभौ॥
अभिषेकेवि०॥उभयंशृणवच्चनेतिभर्गइंद्रोवृहती॥अभिषेकेवि०॥स्वस्तिदाविशोयमइं
द्रोनुष्टुप्॥अभिषेकेवि०॥त्र्यंबकंयजामहेरुद्रोनुष्टुप्॥अभिषेकेवि०॥जातवेदसेकश्यपो
दुर्गात्रिष्टुप्॥अभिषेकेवि०॥समुद्रज्येष्ठाइतिचतसृणांवसिष्ठआपस्त्रिष्टुप्॥अभिषेकेवि०॥
त्रायंतामितिचतसृणांसप्तर्षयआपोनुष्टुप्॥अभिषेकेवि०॥इमाआपइतिचतसृणांसप्तर्षय
आपोनुष्टुप्॥अभिषेकेवि०॥देवस्यत्वेत्यापस्तंबब्राह्मवागनेस्त्रिभिर्मंत्रैः॥तमीशानंजग
तइतिगोतमईशानोजगती॥अभिषेकेवि०॥त्र्यंबकंरुद्रइत्यापस्तंबब्राह्मवागनेनैकेन॥
तमुष्टुहीत्यांगिरसस्तिरश्चीरुद्रस्त्रिष्टुप्॥अभिषेकेवि०॥भुवनस्यपितरंहृजिष्वारुद्रस्त्रि

ष्टुप्॥अभिषेके वि०॥यातेरुद्रेतिकश्यपोरुद्रस्वराडनुष्टुप्॥अभिषेके०॥यज्ञायज्ञेतिष
ण्णांशिवसंकल्पमंत्राणांप्रजापतिर्मनस्त्रिष्टुप्॥अभिषेके०॥यजुर्षोतिवृंदेवृषभंवय
मितिपंचानांविश्वामित्रइंद्रोगायत्री॥अभिषेके वि०॥ततःसुरास्त्वामभिषिंचंत्विनिन व
भिःपोराणमंत्रैरभिषिंचेत्॥ततःकलशोदकेनान्येनचोदकेनस्नातोदंपतीशुक्लवासो
गंधमाल्यादिधृत्वोपविशतां॥तत्रपत्नीदक्षिणतःततोयजमानोग्निंसंपूज्यविभूतिंधृत्वाचा
र्यादीनांधपुष्पवस्त्रालंकारादिभिर्यथाशक्तिपूजयित्वाचार्यायधेनुंदक्षिणांदद्यात्॥द
क्षिणात्वेनचास्यानदक्षिणांतरंअनवस्थाप्रसंगात्॥ततोब्रह्मणेयथाशक्तिदक्षिणांदत्वा
रुद्रजापिनेसदक्षिणमनड्वाहंदक्षिणांदद्यात्॥अत्रधेनुन्यायेनादक्षिणत्वेप्राप्तेसदक्षिण
मनड्वाहंप्रदद्यात् रुद्रजापिनेइतिप्रतिग्रहकरणात्सदक्षिणत्वं॥ततोन्येभ्यऋत्विग्भ्यो ६७

न्येभ्यश्चब्राह्मणेभ्यःभूयसींदक्षिणांदद्यात्॥ततोग्रहपीठदेवतानांभुवनेश्वर्यादीनांचो
त्तरपूजांपंचोपचारैःसंपूज्यक्षमाप्य॥यांतुदेवगणाइतिविसृज्याचार्यहस्तेप्रतियाद्याग्निसं
पूज्यगच्छगच्छसुरश्रेष्ठेतिविसर्जयेत्॥ततोब्राह्मणामहाशांतिंपठेयुः॥सायथा॥आनोभद्र
इतिदशानांगोतमोराहूगणोविश्वेदेवाःआद्याःपंचजगत्यःषष्ठीविराट्सप्तमीजगतीन
तस्तिस्त्रस्त्रिष्टुभः॥आनोभद्राः॥स्वस्तिमितिपंचानांस्वस्त्यात्रेयोविश्वेदेवाआद्या
स्तिस्त्रस्त्रिष्टुभस्तनोनुष्टुभौ॥त्रायंनइंद्राग्नीइतिपंचदशानांवसिष्ठोविश्वेदेवास्त्रिष्टुप्॥त्य
मूषुवितिसृणांताक्ष्योरिष्टनेमिस्ताक्ष्यस्त्रिष्टुप्॥तच्छंयोःत्रायुर्विश्वेदेवाःशाक्वरी॥सर्वेषां
शांतिपाठेविनियोगः॥ततोयजमानोनवग्रहप्रीत्यर्थंत्रीन्भुवनेश्वरीद्राणीद्रान्तयेचप्रत्येक
त्रीस्त्रीन्ब्राह्मणान्भोजयित्वासंकल्प्यवाविप्रान्त्रिषोगृहीत्वासमूहद्युनोभुंजीत॥एवंकृतेसर्व

नो

६८ ति रिष्टशांतिर्भवेा॥ततःशुक्लेगर्भाधानंकुर्यात्॥ ॥इतिदुष्टरजोदर्शनशांतिः॥ ॥अथचंद्रसूर्योपरागकालेप्रथमरजोदर्शनेशांतिविशेषउच्यते॥सचोपरागस्यपौर्णमास्यमावास्याभ्यामविनाभावात्॥तदतिरिक्तवारादौदुष्टेशुक्लशांत्यासमुच्चीयतेनिमित्तभेदात्॥अदृष्टार्थत्वाच्च॥प्रत्यक्षविध्यभावेतत्कार्यकारित्वानवगमेनामनहोमेनेष्टहोमानामिवानयातन्निवृत्त्ययोगात्॥ग्रहमात्रेत्वियमेवअत्रचपुनःश्रवणाभावान्नवग्रहमखःकृताकृतइतिविवेकः॥तत्रकेवलायाःप्रयोगः॥पूर्वोक्तकालेसस्त्रीकःशुचिः
प शाङ्गुखउदङ्मुखोविश्यप्राणानायम्यदेशकालौस्मृत्वाममपत्न्याश्चंद्रोपरागेप्रथमरजोदर्शन
र सूचितारिष्टनिरासद्वाराश्रीपरमेश्वरप्रीत्यर्थंशांतिंकरिष्यइतिसंकल्प्यप्राग्वदाचार्यकृत्वि
कृपूजांकुर्यात्॥नवग्रहपक्षेसनवग्रहामिति॥सूर्योपरागेतु॥सूर्योपरागेप्रथमेत्यादि ६८

ग्दर्शं दित्॥ततआचार्यःशुचिर्देशेगोमयेनोपलिप्यतत्रपंचवर्णरजोभिरष्टदलंपद्मंकृत्वातदुपरिनवंश्वेतवस्त्रमुदकुंभंसंस्थाप्ययथाशक्तिरजतनिर्मितांचंद्रप्रतिमांआप्यायस्वेतिमंत्रेणसोमोगायत्री॥चंद्रावाहनेविनियोगः॥ॐआप्यायस्व०॥चंद्रमावाहयामीतिस्थापयेत्॥सूर्यग्रहेतुयथाशक्तिसुवर्णनिर्मितामाकृष्णेनरजसेत्यनुसूर्यःसवितात्रिष्टुप्॥सूर्यावाहनेविनियोगः॥ॐआकृष्णेन०॥सूर्यमावाहयामीतिस्थापयेत्॥ततोयथाशक्तिसोमवन्निर्मितांराकुप्रतिमांस्वर्भानोरित्यस्यराकुरनुष्टुप्॥ओंस्वर्भानोरधि०॥राकुमावाहयामीतितदुक्तरीत्यास्थापयेत्॥ततोयस्मिन्नक्षत्रेग्रहपीडातन्नक्षत्रदेवता प्रतिमांयथाशक्तिसुवर्णनिर्मितांतत्तन्मंत्रैर्नाममंत्रैर्वा॥अश्विनावावाहयामिनमइतिप्रणवादिनमोंतैःस्थापयेत्॥मंत्रास्तुपस्तंबानामह्योवाक्यानीतिप्रसिद्धाः॥नामानितु॥अश्विनौ।यमः।अग्निः।प्रजापतिः।सो

मः।रुद्रः।अदितिः।बृहस्पतिः।सर्पाः।पितरः।भगः।अर्यमा।सविता।त्वष्टा।वायुः।इंद्रा
ग्नी।मित्रः।इंद्रः।निर्ऋतिः।आपः।विश्वेदेवाः।विष्णुः।वसवः।वरुणः।अजैकपात्।अहि
र्बुध्न्यः।पूषेति।एवंदेवता त्रयमावाह्येभिरेवमंत्रैः।।कांडानुसमयेनस्रोऽन्योपचोरेः पू
जयेत्।।तत्रचंद्रग्रहेचंद्रायश्वेतानिवस्त्रगंधाक्षतमाल्यानिदेयानि।।सूर्यग्रहेतु।सूर्या
यरक्तवस्त्ररक्तचंदनरक्ताक्षतकरवीरपुष्पाणिदेयानि।।राहवेकृष्णानिनक्षत्रेभ्यःश्वे
तानि।ततःपश्चिमतोग्निंप्रतिष्ठाप्यपक्षेनवग्रहानप्यावाहनपूर्वंसंपूज्यअन्वाधानंकु
र्यात्।।यथा।।द्वेसमिधोगृहीत्वाचक्षुषीआज्येनेत्यंतमुक्त्वापक्षेपूर्ववन्नवग्रहानुद्दिश्या
ष्टशताष्टविंशत्यन्यतमसंख्यामुद्दिश्यचंद्रममुकसंख्याभिःपलाशसमिदाज्यचरुति
लाकृतिभीराकुंअमुकसंख्याभिर्दूर्वाज्यचरुतिलाकृतिभिर्नक्षत्रदेवतामुकसंख्यप ६९

लाशसमिदाज्यचरुतिलाकृतिभिर्यथेशेपेत्याद्युक्त्वाजुहुयात्।।सूर्यग्रहेचंद्रस्था
नेसूर्यममुकसंख्यार्कसमिदाज्यचरुतिलाकृतिभिरितिवदेत्।।एवमन्वाधायप्रणीता
प्रणयनांतंकृत्वात्रिभ्योमुष्मैत्वेतिचतुरश्चतुरोमुष्टीन्निरूप्यचरुंश्रपयित्वाज्यभागांतंकु
र्यात्।।ततोयजमानोदक्षिणतोदेवताउद्दिश्यत्यजेत्।।ततोन्वाधानक्रमेणजुहुयुः।।तत्र
तिस्रःदूर्वाणामेकैकाहुतिः।।समिधश्चत्रिमध्यक्ताःकार्याः।।ततःस्विष्टकृदादिपूर्णाहु
त्यंतंप्राग्वत्।।ततःआचार्यएकस्मिन्कलशेजलपूर्णेपंचगव्यानिपंचरत्नानिवटाश्व त्थो
दुंबराश्वबिल्वानांत्वचःपंचपल्लवान्सर्वौषधिकल्कंदूर्वाःकुशाश्चनिक्षिप्यसर्त्विक्दंपती
पूर्ववदभिषिंचेदेतैर्मंत्रैः।।आपोहिष्ठेतितृचस्यांबरीषःसिंधुद्वीपआपोगायत्री।।अभिषेके
विनियोगः।।इमंमेगंगेसिंधुक्षित्यय्यमेधआपोजगती।।अभिषेकवि।।तत्तायामिशुन

त्रोपोवरुणस्त्रिष्टपू॥अभिषेकेवि०॥अन्येपिसमुद्रज्येष्ठेत्यादयःसुरास्त्वामित्यादयःपो
राणाश्च॥ततःस्नानदक्षिणादानप्रतिमाप्रतिपादनादिपूर्ववत्॥यदातुपूर्वशांतिसमुच्च
यस्तदाकालैक्यात्कर्त्रैक्याच्चाग्नेयादिचनंत्रप्रयोगः॥तत्रयजमानोदेशकालौस्मृत्वाम
मास्याःपत्न्याःप्रथमरजोदर्शनिमित्तकदुष्टमासतिथ्यादिअमुकग्रहणासूचितेत्यादिसंक
ल्यऋत्विक्पूजांतंविदध्यात्॥तत्रआचार्यंभुवनेश्वर्यादिपूजनंप्राक्पश्चाद्वाततउदीच्यां
चंद्रादीन्संपूज्यपश्चोपक्रमंनिर्वापहोमाभिषेकान्कुर्यादितिविशेषः॥अन्यत्सर्वंसमानं॥
इतिग्रहणेरजोदर्शनशांतिः॥ ॥इतिप्रयोगरत्नेदुष्टरजोदर्शनशांतिः॥ ॥अथगर्भलं
भनाख्यंगर्भाधानं॥रजोदर्शनात्षोडशाहोरात्रिरुतुस्तन्मध्येआद्यरात्रिचतुष्कंपर्वादिति
षिद्वदिनानिवर्जयित्वामघामूलादिव्यतिरिक्तेदैवज्ञोक्तेशुभेकालेदंपत्योश्चंद्रानुकूल्ये

गर्भाधानंकार्यं॥तत्रापियुग्मासुरात्रिषुपुत्राः॥अयुग्मासुकन्याजायंतेइत्यादिज्ञेयं॥त
त्रायंक्रमः॥कर्त्तास्नातरभ्यंगस्नानंकृत्वापत्नीमपिनवोदककुंभसलिलैःसम्मृत्तिकापं
चपल्लवपंचत्वक्सहितैःस्नापयित्वातयासदमंगलवस्त्राभरणादिधृत्वाचंद्यस्वस्तियाच
नाभ्युदयिकेकृत्वोपासनाग्निंमारुतसंज्ञंप्रज्वाल्यदेशकालौस्मृत्वाअस्याममभार्यायाः
प्रतिगर्भसंस्कारान्निश्चयद्वाराअस्यांजनिष्यमाणसर्वगर्भाणांबीजगर्भसमुद्भवैनोनिब
र्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंगर्भाधानाख्यंकर्मकरिष्ये॥इतिसंकल्यसमिद्व्यमाद्याय
गर्भाधानंकर्तुंप्राजापत्यहोमंकरिष्येतत्रदेवतापरिग्रहार्थमित्यादिचक्षुषीआज्येने
त्यंतमुक्त्वाप्रजापतिंचरुणाविष्णुंपशुनारुद्रमाज्येनप्रजापतिंचाज्येनशेषेणस्विष्टकृतमि
त्यादिसद्योयक्ष्येइत्यं तमुत्कासमिद्व्यमग्नावाधायपरिसमूहनादिपूर्णपात्रं

निधानांतं कृत्वा प्रजापतयेत्वाजुष्टं निर्वपामीत्यादि आज्यभागांतं कृत्वावदानधर्मेणावदा
य प्रजापतयेस्वाहेति चरुणैकाकुतिं हुत्वा॥ विष्णुर्योनिमिति तिसृणां त्वष्टा विष्णुरनुष्टुप्॥
प्रधानाज्यहोमे विनियोगः॥ ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु॥ आसिंचतु प्रजा
पतिर्धाता गर्भं दधातु ते स्वाहा॥ विष्णवइदं०॥ ॐ हिरण्मयीऽअरणी यं निर्मंथतो अश्विना॥
तं ते गर्भं हवामहे दशमे मासि सूतवे स्वाहा॥ विष्णवइदं०॥ नेजमेषइति तिसृणां त्वष्टा
विष्णुरनुष्टुप्॥ प्रधानाज्यहोमे वि०॥ ॐ नेजमेषपरापतन्त्सुपुत्रः पुनरापतन्॥ अस्यमेपुत्र
कामायुगर्भमाधेहि यः पुमान् स्वाहा॥ विष्णवइदं०॥ ॐ यथेयं पृथिवी मह्युत्तानागर्भमा
दधे॥ एवं तं गर्भमाधेहि दशमे मासि सूतवे स्वाहा॥ विष्णवइदं०॥ ॐ विष्णोः श्नप्त्रेण रूपेणा
स्यानार्यागवीन्योः पुमांसं पुत्रं जनयतं दशमे मासि सूतवे स्वाहा॥ विष्णवइदं०॥ प्रजापते ७१

हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ प्रधानाज्यहोमे०॥ ॐ प्रजापतेनत्वदेतान्यन्यो विश्वाजातानि
परिताबभूव॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयंस्यामपतयोरयीणां स्वाहा॥ प्रजापत
यइदं०॥ एवंसमाज्याकृतीर्हुत्वा॥ अपनःशोशुचदघमित्यस्यसूक्तस्यकुत्सोग्निर्गायत्री॥
पत्न्यामूर्धाभिमन्त्रणे वि०॥ ॐ अपनःशोशुचदघमग्नेशुशुग्ध्यारयिं॥ अपनःशोशुचदघं।
सुक्षेत्रियासुगातुयावसूयाचयजामहे॥ अपं०॥ प्रयङ्किंदिष्टएषांप्रास्माकासश्चसूरयः॥ अ
पनः०॥ प्रयन्तेऽअग्नेसूरयोजायेमहिप्रतेवयं॥ अपनः०॥ प्रयद्अग्नेःसहस्वतोविश्वतोयंतिभ
नवः॥ अपनः०॥ त्वंहिविश्वतोमुखविश्वतःपरिभूरसि॥ अपनः०॥ द्विषोनोविश्वतोमुखा
तिनावेवपारय॥ अपनः०॥ सनःसिंधुमिवनावयातिपर्षास्वस्तये॥ अपनः०॥ याःफलिनी
रित्यस्याथर्वणोभिषग्गोषधयोनुष्टुप्॥ जपे वि०॥ याःफलिनीर्याअफलाऽअपुष्पायाश्च

पुष्पिणीः॥बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः॥एनान्जयित्वा॥वधेनदस्युमितिषण्णांवसु
श्रुतोग्निस्त्रिष्टुप्॥अग्न्युपस्थानेवि०॥वृधेनदस्युंप्रहिचातयस्वचयःकृण्वानस्तन्वेऽस्तायै॥
पिपर्षिपित्वसहसस्पुत्रदेवास्तोऽअग्नेपाहिनृतमवाजेऽअस्मान्॥वयंतेऽअग्नउक्थैर्विधेम
वयंहव्यैःपावकभद्रशोचे॥अस्मेरयिंविश्ववारंसमिन्वास्मेविश्वानिद्रविणानिधेहि॥अस्मा
कमग्नेऽअधुरंजुषस्वसहसःसूनोत्रिषधस्थहव्यं॥वयंदेवेषुसुरुतःस्यामत्रामणानस्त्रिव
रूथेनपाहि॥विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरितातिपर्षि॥अग्नेऽअत्रिवन्नमसा
गृणानोऽस्माकंबोध्यविताततनूनां॥यस्तोहृदाकीरिणामन्यमानोमर्त्यमर्त्यंजोहवीमि॥जातवे
दोयशोऽअस्मासुधेहिप्रजाभिरग्नेऽअमृतत्वमश्याम्॥यस्मैत्वंसुरुतेजातवेदऽउलोकमग्
नेकृणवःस्योनं॥अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति॥६॥अग्निरूविश्व ७२

वस्तमितिहूयोर्वसुश्रुतोग्निस्त्रिष्टुप्॥अग्न्युपस्थानेवि०॥ॐअग्निस्तुविश्रवस्तमंतु
विब्रह्माणमुत्तमं॥अतूर्तश्रावयत्पतिंपुत्रंदेदातिदाशुषे॥अग्निर्ददातिसत्पतिंसासाहयो
युधानृभिः॥अग्निरत्यंरघुष्यदंजेतारमपराजितं॥इत्यष्टभिरग्निमुपस्थायस्विष्टकृदादि
होमान्होषंसमाप्य॥सूर्योनोदिवस्पात्विति पंचर्चस्यसूक्तस्यचक्षुःसूर्योगायत्री॥सूर्योपस्था
नेवि०॥ॐसूर्योनोदिवस्पातुवातोऽअंतरिक्षात्॥अग्निर्नःपार्थिवेभ्यः॥ओषधीसवितुर्यस्य
तिहरःस्तंसवांऽअर्हति॥पाहिनोदिद्युतःपतंत्याः॥चक्षुर्नोदेवःसविताचक्षुर्नउतपर्व
तः॥चक्षुर्धातादधातुनः॥चक्षुर्नोधेहिचक्षुषेचक्षुर्विख्यैतनूभ्यः॥सचेदंविचपश्येम॥सु
संदृशंत्वावयंप्रतिपश्येमसूर्य॥विपश्येमनृचक्षसः॥अनेनसपत्नीकःसूर्यमुपस्थायब्रा
ह्मणान्भोजयित्वातेभ्यःस्वस्त्ययनपूर्वमाज्यशेषंगृहीत्वा भुंजीत॥ततःसायंकालेनंनित्ये

कर्मकृत्वो भोशुक्लांबरानुलेपनमाल्याभरणादिरलंकृतोसलंकृतंसुधूपितंगंधमाल्याभ
लदीपयुक्तंगृहंप्रविशेत्तां॥ततोभर्त्ताअनग्नंजंतुविवर्जितंसुसुखस्पर्शंविनानोपरिमंडितं
पर्यंकमारुह्यप्रागुक्तशोभनेमुहूर्तेस्त्रियमारोप्याभ्यंगंधाकल्कंदूर्वाकल्कंवासूक्ष्मवस्त्रेनि
क्षिप्यउदीर्घातिदृयोःसूर्यासावित्रीसूर्यासावित्रीआद्यात्रिष्टुप्अंत्यानुष्टुप्॥भार्यायादृ
क्षिणानासापुटेऽभ्यंगंधारससेचनेविनियोगः॥ॐउदीर्घातुःपतिवतोद्येषाविश्वावसुं
नमसागीर्भिरीळेॐअन्यामिछप्रफर्व्यंसंजायांपत्यासृजस्वाहा॥इतिवामभागोपविष्टाय
दक्षिणनासाविलेऽभ्यंगंधादिरससिक्तानडसेउदरंगतेतामाचमय्योपेयात्॥इदानींवि
ष्टानस्पंदत्वेवस्विष्टकृदादिहोमत्रोषंसमापयंतिउपगमनेचायंक्रमः॥ॐगंधर्वस्यवि
श्वावसोर्मुखमासीतिमंत्रेणहोमोक्तरूपादिभिर्विधुर्योनिमितितिसृभिर्नेजमेषेतिच

४ + अन्यामिछपितृषदंव्यक्तांसतैभागोजनुषातस्यविद्धि।उदीर्घातोविश्वावसोनमसेळामहेत्वा॥४

सृभिस्त्रिभिरंगुलीभिर्योनिमभिमृश्य॥तांपूषन्नित्यस्यसूर्यासावित्रीसूर्यासावित्रीत्रिष्टु
प्॥जपेविनि०॥ॐतांपूषञ्छिवतमामेरयस्वयस्यांबीजंमनुष्याॅवपंति॥यानऊरूउशंतीवि
श्रयातेयस्यामुशंतःप्रहरामशेपं॥यो गर्भमोषधीनामित्यस्यवसिष्ठःपर्जन्योगायत्री॥
जपेवि०॥योगर्भमोषधीनांगवींकृणोत्यर्वतां॥पर्जन्यःपुरुषीणां॥अहंगर्भमदधामोषधीष्वहं
जापत्योगर्भमिंद्रोवात्रिष्टुप्॥जपेवि०॥ॐअहंगर्भमदधामोषधीष्वहंविश्वेषुभुवनेषुमंत॥
अहंप्रजाअजनयंपृथिव्यामहंजनिभ्योअपरीषुपुत्रान्॥इतित्रीमंत्रान्जपित्वासकृदुपग
च्छेत्॥ततःप्राणेरेतोदधाम्यसावित्यनुप्राण्य॥यथाभूमिरग्निगर्भायथाद्यौरिंद्रेणगर्भि
णी॥वायुर्यथादिशांगर्भएवंनेगर्भंदधाम्यसावितिस्त्रीहृदयमभिमृश्यावाचमेत्॥मंत्रं
पेविअसावित्यस्यस्थानेप्रथमेकवचनांतंस्वनामवदेत्॥अस्मिन्कर्मणिन्नानंब्राह्मणाभो
ज्याःदक्षावा॥यदिप्रथमरजोदर्शनंदुष्टतिथिवारनक्षत्रादिषुजायतेतदादोषपरिहारार्थ

शेनक्रांशांतिंकृत्वाप्रशस्तिस्त्यादिकृतुदर्शनपर्यंतंनस्यापगमनंवर्ज्यं॥तदाकृत्यो
तिर्वसिष्ठः॥प्रभूतदोषेयदिदृश्यतेनतुष्यंततनःशांतिककर्मकार्यं॥विसर्जयेद्देवतयेकरा
त्यांयावद्गोदर्शनमिष्टकाले॥एतत्कर्मकरणेप्रायश्चित्तमाहाचार्यः॥गर्भाधानस्यक
रणात्तस्यांजातस्तुदुष्यति॥अकृत्वागांद्विजेदत्वाकुर्यात्पुंसवनंपतिरिति॥ ॥इतिप्रयोगर
त्नेगर्भाधानं॥ ॥अथपुंसवनानवलोभनयोःप्रयोगः॥गर्भमासप्रभृतितृतीयेमासेगर्भा
भिव्यक्तेोतदनभिव्यक्तेोचतुर्थेष्टमेवामासिअरिक्तादितिथौपुष्यादिषुन्न क्षत्रेषुक
सोमबुधगुरुवारेषुविष्ट्यादिदोषरहितेदेवज्ञोक्तेकालेपुंसवनानवलोभनेकुर्यात्॥अत्र
नियतकालत्वाद्गुरुशुक्रास्तबाल्यत्वाद्धिमलमासादिष्वपिनदोषोदोषरहितकालाभे॥तत्र ला
हितविहितकालाभेतुशुक्रास्तादौकार्यंसीमंतदिनेवाकार्यं॥एतेकरिष्यमाणःपतिःपूर्वे ७४
न

पुःपुंसवनार्थंसमानरूपवत्सायागोस्तदलाभेन्यस्यावाक्षीरंदध्यर्थंपुष्टंमाषद्रंकयवत्रयंच ष
संपाद्यवृत्ताकारमविरल्पछायमल्पावकाशंगृहैकदेशंकृत्वाविधिवत्स्वस्तिवाचनंग्रहयज्ञांशु
दयिकानिकृत्वागर्भाभिवृध्यविरोधिहविषाकृतैकभक्तंभार्यांकृत्वाब्रह्मचारीसन्पेथुरनुकूल रे
कालेमंगलस्नानांपरिहितानवासंसंप्रावृतप्रावरणीयांभूषैर्भूषितांभार्यांपूर्वकृतदेशेस्वद ण
क्षिणतउपवेश्यसद्योवाकृतस्वस्तिवाचनादिर्देशकालौस्मृत्वा॥अस्यांभार्यायामुत्पद्यमानग
र्भस्यवैजिकगार्भिकदोषपरिहारपुंरूपताज्ञानौग्रतिरोधिपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं दय
पुंसवनमनवलोभनंचतंत्रेणकरिष्येइतिसंकल्प्यविधिवत्कोनुकसूत्रमाबध्यविधिवदोषा
नाग्निंपवमानंसंप्रतिष्ठाप्याद्यक्रियमाणंपुंसवनानवलोभन होमेदेवतापरिग्रहार्थम
न्वाधानंकरिष्ये॥अस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाप्रजापतिंचरुद्रव्येण
शेषेणस्विष्टकृतमित्यादिउक्त्वान्वाधायपरिस्तरणादिघृतांतप्रणयनावधिप्राक्तनंतंत्रंकृत्वा

प्रजापतयेत्वाजुष्टंनिर्वपामीतिचतुरोव्रीहिमुष्टीन्निरूप्यप्रोक्षणावघानादिबर्हिषिहवि
रासादनांतंकृत्वास्वदक्षिणतःप्रत्यग्ग्रीवमुत्तरलोमानडुहंचर्मास्तीर्यआत्मानमग्निंचांत
रायत्नीमाचांतःसलिलामानायचर्मण्युपवेश्यतयान्वारब्धइध्माधानाद्याज्यभागांत
कृत्वाप्रक्षालितेप्रसृतीकृतेदक्षिणेपत्नीपाणौप्रसृतिमितंतक्रोदधिनिक्षिप्यनडुपरि
लिंगवद्यवंतत्सार्ध्वयोरंडहूर्यन्नाषहूर्यंचनिधायकिंपिबसीतित्रिःपत्नीपृछेत्॥ सा
चपुंसवनमितित्रिरुक्त्वासयवमाषंतद्दधिनिःशेषंपीत्वाजलमाचम्यपुनरेवंद्विःप्रश्न
प्रतिवचनपूर्वकंप्राश्याचामेत्॥एतत्पुंसवनं॥अनवलोभनंतुदूर्वाःकन्ययादृषदुपले
षधित्वापिंडीकृत्यशुद्धवसनोचलेसंगृह्यप्रजावदारव्यंजीवसुत्रेसंज्ञकंचसूक्तंजपि
त्वामंडलागारछायायामुपविष्टायाःस्त्रियःपश्चिमतस्तिष्ठन्पतिस्तदाननमुन्न

मय्यदक्षिणेनासाबिलेस्रांगुष्ठाग्रेणदूर्वारसमासिंचेत्॥तत्रप्रजावदारव्यंसूक्तं॥
आतेगर्भोयोनिमेतुपुमान्बाणइवेषुधिं॥आवीरोजायतांपुत्रस्तेदशमास्यः॥करो
मितेप्राजापत्यमागर्भोयोनिमेतुते॥अनूनःपूर्णोजायतामश्लोणोपित्राचधीतः॥पुं
मांस्तेपुत्रोनारितंपुमानुजायतां॥तानिभद्राणिबीजान्यृषभाजनायतुनौ॥यानिभद्रा
णिबीजान्यृषभाजयंतिनः॥तेत्वंपुत्रान्विंदत्वंसाप्रसूर्ईनुकाभव॥कामःसमृध्यतांमह्य
मपराजितमेवमे॥यंकामंकामयेदेवतन्मेवायोसमर्धय॥॥अथजीवसुत्रारव्यंसूक्तं॥ग
अग्निरैतुप्रथमोदेवतानांसोस्मैप्रजांमुंचतुमृत्युपाशात्॥तदयंराजावरुणोनुमन्यतांय
थेयंस्त्रीपौत्रमघंनरोदात्॥इमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुः॥अ
मूयोपस्थाजीवनामस्तुमातापौत्रमानंदमभिप्रबुध्यतामियं॥मातेगृहेनिर्ऋतिर्घोषउत्थ

दन्यत्रत्वद्गुदंस्यःसंविशंतु॥मात्वंबिकेश्वरःआवधिष्टाजीवपत्नीपतिलोकेविराजपश्यं
तीप्रजांसुमनस्यमाना॥अप्रजस्तांपौत्रमृत्युंपाप्मानमुतवाद्यं॥ग्रीर्छःस्वजमिवोन्मुच्यद्वि
षद्भ्यःधतिमुंचामियाग्रं॥देवकृतंब्राह्मणकल्पमानंतेनहन्मियोनिषदःपित्राचान्॥क
व्यादोमृत्यूनधरान्पातयामिदीर्घमायुस्तवजीवंतुपुत्राः॥एतैर्दर्भाभिर्मंत्रैर्नस्येदन्ते
आचांतजलयापत्न्यास्पृष्टःप्राजापत्यंचरुंअवदानधर्मणादाय प्रजापतयेस्वाहेत्येकाहु
तिंहुत्वायत्तेसुशीमइतिमंत्रेणपत्न्याहृदयदेशंपाणिनास्पृशेत्॥यत्तेसुशीमइतिमंत्र
स्यहिरण्यगर्भःप्रजापतिरनुष्टुप्। भार्याहृदयालंभनेवि०॥ॐयत्तेसुशीमेहृदयंहितंम
नःप्रजापतौ॥मन्येहंमांतद्विद्वांसंमाहंपौत्रमघंनियां॥ततःखिष्टकृदादिहोमशेषंस
माप्यग्रातंब्राह्मणा भोज्याः॥इदंकर्मगर्भसंस्कारत्वात्प्रतिगर्भंकार्यं॥प्रथमगर्भएवइति ७६

कश्चित्॥अस्यकर्त्तापतिस्तदसंभवेदेवरोवा॥ ॥इतिप्रयोगरत्नेपुंसवनानवलोभने॥
॥अथसीमंतोन्नयनं॥ ॥तच्चगर्भमासापेक्षयाचतुर्थेषष्ठेऽष्टमेवामासिअसंभवेयाव त्स
र्वांतंशुक्लपक्षेपुनर्वसुपुष्याभिजिद्धस्तश्रोणपदानुराधाश्विनीमूलश्रवणरेवतीरोहिणी
मृगशिरःसंज्ञकानांपुन्नक्षत्राणांचतुर्द्वाविभक्तानांमध्येपादद्वयेषष्ठ्यष्टमीद्वादशीचतु म
र्थ्यनवमीचतुर्दश्यमावास्याव्यतिरिक्ततिथौसोमबुधवृहस्पतिशुक्रवारेषुचंद्रानुकूल्ये
विष्ट्यादिदोषाभावेशुभलग्नादौकार्यं॥अत्राप्यधिकमास गुरुशुक्रास्तादीनांनदोषः
कालांतरासंभवे॥पूर्ववन्नियतकालत्वात्॥ अथप्रयोगः॥सीमंतकर्मकरिष्यन्नतिरा
नडुहमजिनमपक्वफलयुग्मयुताखुडुंबरस्तबकोतदलाभेन्यस्तबकोवाशुक्लवर्णा
शालक्षीशिकुत्राविंजूलानिचसंपाद्यपुण्याहवाचनग्रहयज्ञाभ्युदयिकानितदहरे

वानुष्ठायमंगलस्नानांपरिहितवासोयुगलामलंकृतांपत्नीस्वदक्षिणतउपवेश्यदेशका
लौस्मृत्वातनुरुधिरप्रियालक्ष्मीभूतराक्षसीगणदूरनिरसनक्षमसकलसौभाग्यनिदान
भूतमहालक्ष्मीसमावेशद्वारापतिगर्भबीजगर्भसमुद्भवेनोनिबर्हणजनकातिशयद्वा
राश्वापरमेश्वरप्रीत्यर्थस्त्रीसंस्काररूपंसीमंतोन्नयनाख्यंकर्मकरिष्यइतिसंकल्प्यवधूंकृत
कौतुकबंधामर्चितेष्टदेवतांकृत्वाशुभ मुहूर्तेऔपासनाग्निंमंगलनामानंविधिवत्प्रति
ष्ठाप्यसमिध्यसमिद्वयमादायपुनर्देशालौस्मृत्वाऽद्यकरिष्यमाणेसीमंतोन्नयनहोमे
देवतापरिग्रहार्थमित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाद्विधातारंद्विःराकांत्रिर्विष्णुंप्रजा
पतिंचैताःप्रधानदेवताःआज्येनद्योषणास्विष्टकृतमित्यादिपूर्ववदुक्त्वाग्नावाधायपरि
समूहनादिकृत्वाप्रत्यग्नेःस्वस्यदक्षिणतःप्राग्ग्रीवमुत्तरलोमकमानडुहंचर्मास्तीर्यदेश

ग्नेर्दर्भेषुप्रोक्षणीपात्रस्रुवौप्रणीताज्यपात्रेइध्मबर्हिषीचक्रमादायपवित्रकरणंकृत्वा
संस्कारांतेकृतेतस्मिन्नग्नेरुत्तरतोदक्प्राङ्मुखीपत्नीमुपवेश्यतयान्वारब्धइध्माधा
नाद्याज्यभागांतंकर्मकृत्वाधातादददातुदाशुषइतिमंत्रद्वयस्यहिरण्यगर्भोधातानुष्टुप्।।हि
तीयात्रिष्टुप्।।सीमंतोन्नयनप्रधानाज्यहोमेविनियोगः।।एवमग्नेपिवि०।।ॐधातादददातु
दाशुषेप्राचींजीवातुमक्षितांवयंदेवस्यधीमहिसुमतिंवाजिनीवतुःस्वाहा।।धात्रेइदंधाता
प्रजानोसुतरायईशेधातेदंविश्वंभुवनंजजान।।धातारुक्षारनिमिषाभिचष्टेधात्रेइद्व्यधु
तवज्रुहोतुस्वाहा।।धात्रेइदं०।।राकामहमिहिद्वयोर्गृत्समदोराकाजगती।।विनियोगःप्राग्व
त्।।ॐराकामहंसुहवांसुष्टुतीहुवेशृणोतुनःसुभगाबोधतुत्मना।।सीव्यत्वपःसूच्याछिद्य
मानयाददातुवीरवतीदयमुक्थ्यंस्वाहा।।राकायाइदं।।ॐयास्तेराकेसुमतयःसुपेशसोया

भिर्दद्मसि दाशुषेवसूनि॥नाभिर्नोअद्यसुमनोनुपागहिसहस्रपोषंसुभगोररोणास्वाहा॥
राकायाइदं॥नेजमेषेत्यादिमंत्रत्रयस्यहिरण्यगर्भस्त्वष्टाविष्टुरनुष्टुप्॥विनियोगःप्राग्व
त्॥ॐनेजमेषुपरापतसुपुत्रःपुनरापत॥अस्यैमेपुत्रकामायेगर्भमाधेहिअःपुमान्स्वाहा॥
विष्णवइदं॥यथेयंपृथिवीमह्यनागर्भमादधे॥एवंतंगर्भमाधेहिदशमेमासिसूतवे
स्वाहा॥विष्णवइदं॥विष्णोःश्रेष्ठेनरूपेणास्यानार्योगवीन्याः॥पुमांसंपुत्रानाधेहिदशमे
मासिसूतवेस्वाहा॥विष्णवइदं॥प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥विनियोगःप्रा
ग्वत्॥ॐप्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव॥यत्कामास्तेजुहुमस्तन्नोअस्तु
वयंस्यामपतयोरयीणांस्वाहा॥प्रजापतयइदं॥८॥एवंअष्टावाज्याहुतीःस्रुवेणजुहोति॥
न्याःपश्चिमतःप्राङ्मुखस्तिष्ठन्नपक्वफलयुग्मान्वितमौदुंबरस्तबकद्वयंत्रिःशुक्लांत्रा

लीकुशांकुरत्रयंचैकीकृतंपाणिनागृह्यात्तन्मूलेनपत्न्याःकेशालललाटयोःसंधि
मारभ्यामूर्धप्रदेशात्॥ॐभूर्भुवःस्वरोमितिमंत्रेणत्रिश्चतुर्वाप्रयुनक्तियनंमंत्रमावर्तय
न्सीमंतमुन्नयेत्॥भूर्भुवःस्वरितिमंत्रस्यप्रजापतिःप्रजापतिर्बृहती॥सीमंतव्यूहनेवि
नियोगः॥ततोयथाचारंसगोधूमौदुंबरफलमालांतत्कंठेनिधायवीणागाथिनोद्वि
जोसोमंराजानंसंगायेतामितिप्रेषयेत्॥तोचॐ सोमोनोराजावतुमानुषीःप्रजानिवि
ष्टचक्रासावितिमंत्रेअसावितिस्थानेगंगेत्यादिसमीपस्थनद्याःसंबुध्यंतंनामनिर्दिश
तोवीणयागायेतां॥सामगानापरिज्ञानेमंत्रमात्रंत्रिःपठेतां॥ततःस्विष्टकृदादिहोमम
संसमाप्यब्रह्मणेवृषभंदक्षिणांतदभावेन्यस्मैविदुषेब्राह्मणायदत्वापतिपुत्रवतीभि
र्द्वाभिरुपदिष्टंमंगलाचारंकारयेत्॥ततंब्राह्मणा भोज्याःइदंकर्मभर्त्रैवकार्यं॥इदंचप्र

तिगर्भनावर्त्तने॥तथाचहारितः॥सकृच्चकृतसंस्काराःसीमंतेनद्विजातयः॥यंयंगर्भमि
सूयंतेससर्वःसंस्कृतोभवेत्॥कारिकापि॥नावर्त्तनइदंकर्मप्रतिगर्भमितिस्थितिः॥अ
कृतसीमंतायाःप्रसवेविष्णोषःसत्यव्रतेनोक्तः॥स्त्रीयद्यकृतसीमंताप्रसूयेतकथंचन॥पुत्र
गृहीत्वाविधिवत्पुनःसंस्कारमर्हतीति॥इतिप्रयोगरत्नेसीमंतोन्नयनप्रयोगः॥॥अथवि
ष्णुबलिः॥॥गर्भाष्टमेमासेपूर्वेद्युःदंपतीस्नातौधृतहतवासासावलंकृतौभवेतां॥ततःपतिप्र
गुरुवदाभ्युदयिकंपुण्याहवाचनंकृत्वातदहरेववाइदंकृत्वादेशकालौस्मृत्वागुर्विण्याम
मपत्न्यागर्भस्यनिर्बाधपरिपोषणपूर्वकसुखप्रसूतिसिध्यर्थंगर्भाधिदेवताविष्णुप्रीतिका
मोहंविष्णुबलिनामकंकर्मकरिष्यइतिसंकल्प्यद्वितीयासप्तमीद्वादशीषुश्रवणरोहिणीपुष्य
पुनर्वसूदयेविष्क्रादिदोषाभावेपूर्वाह्णेगृहांगणेगृहेवास्थंडिलेगृह्याग्निंप्रतिष्ठाप्यपुनर्दर्श ७९

कालावुंहाकरिष्यमाणेविष्णुबलिहोमेदेवतापरिग्रहोमित्यादिचक्षुषीआज्येनेत्यंतमु
क्त्वाविष्णुप्रधानदेवतांचतुःषष्टिवारंचरुणाद्रोषेणस्विष्टकृतमित्याघुक्त्वा न्वाधायप
रिसमूहनादिआज्येदर्भाग्रद्वयप्रक्षेपांतंकृत्वासिद्धांनेनसहाज्यंत्रिःपर्यग्निकृत्वासुवसं
मार्जनांतंकृत्वाचरुपात्रांतरेपृथक्कृत्वाग्नावधिश्रित्याभिघार्योद्गुह्यास्याज्यादक्षिण
तोबर्हिष्यासाद्यप्रत्यभिधारणाद्याज्यभागांतंकृत्वा॥दक्षिणतोग्नेःस्थंडिलेकदलपत्रं
स्वस्तिकंवाप्रकल्प्यतत्रविष्णुमावाह्यषोडशो पिरुपचारैरभिपूज्यपुनर्यथासनमासि
त्वापत्न्यावार्द्धोवदानधर्मेणचरुमवदायस्रुचाचतुःषष्टिमाहुतीर्जुहुयात्॥तत्रायं
मंत्रक्रमः॥अतोदेवाइतिषट्चस्यमेधातिथिर्विष्णुर्गायत्री॥॥विष्णोर्नुकमितिसप्तदशर्च
स्यसूक्तस्यउशन्यपुत्रोदीर्घतमाविष्णुःप्रथमंसूक्तंत्रैष्टुभं॥द्वितीयेतृतीयेजागतेसंवामि

त्यष्टर्चस्य भरद्वाजोविष्णुस्त्रिष्टुप्॥परोमात्रयेतिवर्गद्वयस्यवसिष्ठोविष्णुस्त्रिष्टुप्॥सहस्र
शीर्षेतिवर्गत्रयस्यनारायणःपुरुषोनुष्टुवंत्यात्रिष्टुप्॥विष्णुर्योनिमितिमंत्रस्यहिरण्यग
र्भोविष्णुरनुष्टुप्॥सर्वत्रविष्णुबलिप्रधानचरुर्होमेवि०॥विष्णवइदंनमेतिसर्वत्रोद्दिश्यत्या मे
गो॥अनंतरमग्नेरैशान्यांद्वात्रिंशदंगुलायामविस्तारंगोमयोपलिप्तस्थंडिलेचतुरंगक्र
डावत्समचतुरस्रंचतुरंगुलंचतुःषष्टिपदंसितेनरजसामंडलंकृत्वानेषुपदेषुनैर्ऋतप
दादिक्रमेणप्रथमंबाह्यावृत्तौततस्तथैवानंतरावृत्तिषुचप्रागुक्तचतुःषष्टिमंत्रैःप्रणवा
द्यैःस्वाहांतैःप्रादक्षिण्येनचरुशेषेणबलिंदत्वासर्वत्रविष्णवइदंनममेत्युद्दिश्यत्यक्त्व
तन्मंडलमध्येनमोनारायणायेतिबलिंदत्वापूर्ववत्यक्त्वातेनैवमंत्रेणार्घ्यंदत्वाबलिशेषा ८०
लिंचिदन्नमादायपिंडद्वयंकृत्वादंपतीपृथगग्नेर्यातां॥ततआचम्यपतिःस्विष्टकृदादि

होमशेषंसमाप्यगुरवेदक्षिणांदत्वायथाशक्तिब्राह्मणान्भोजयित्वादंपतीभुंजीयातां॥
अयंविष्णुबलिःप्रतिगर्भमावर्तते॥प्रतिगर्भबलिःकार्यःसीमंतश्चप्रशस्यते॥इत्यौलाय श्व
नोक्तेः॥इदंचगृह्यसूत्रानुक्तत्वादिदानींशिष्टाचरंति॥ ॥इतिनारायणभट्टकृतेप्रयोग
रत्नेविष्णुबलिप्रयोगः॥ ॥अथजातकर्मप्रयोगः॥ ॥अथजातमात्रेपितातस्यमुखंनिरी
क्ष्यनद्यादावुदञ्मुखःस्नात्वाअसंभवेदिवाहृताभिःशीताभिरद्भिःसुवर्णयुताभिर्गृहएवस्ना
त्वाआचम्यसितचंदनमाल्यादिभिरलंकृतोनालछेदनात्पूर्वंसूतिकादिव्यतिरिक्तैरस्पृ
श्यमकृतस्तनपानंप्रक्षालितमलंकुमारंमातुरुत्संगेप्राङ्मुखमवस्थाप्यब्राह्मणैःसाधुपुण्या
हवाचनंकृत्वादेशकालौस्मृत्वाममास्यकुमारस्यगर्भोद्भवजननसकलदोषनिबर्हणा
युर्मेधाबुद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंजातकर्मकरिष्यइतिसं

क स्याभ्युदयिकश्राद्धंहिरण्येनविधायहोमकरणपक्षेव्याहृतिभिर्लौकिकाग्निंप्रबलसंज्ञंविधिवत्प्रतिष्ठाप्यदेवताकालोस्मत्वास्मिन्नूजातकर्महोमेदेवतापरियहार्थमन्वाधानं करिष्येइत्यादिचक्षुषाआज्येनेत्यंतमुक्त्वाग्निमिंद्रंप्रजापतिंविश्वान्देवान्ब्रह्मणाज्येनस्रोषेणस्विष्टकृतमित्यादिसद्योयस्येइत्यंतमुक्त्वान्वाधानपरिसमूहनाद्याज्यभागांतं कृत्वाप्रधानदेवताश्चतुर्थ्यंतनाममंत्रेणाज्यंहुत्वादेवतोद्देशेनत्यागंकुर्यात्॥ततोविषमभागेनमधुसर्पिषीमिश्रीकृत्यशिलातलेनिक्षिप्यतत्रसुवर्णरजोविमोकंयावदवघृष्यभाजनेनिधाय॥ॐप्रतेददामिमधुनोघृतस्यवेदंसवित्राप्रसूतंमुघोनां॥आयुष्मानुग्नोदेवताभिःशातंजीवन्नरदोलोकेअस्मिन्निति मंत्रेणनेनवहिरण्यनकुमारंपाययित्वातद्धिरण्यंप्रक्षाल्यकुमारस्यदक्षिणेकर्णेनिधायतन्मुखसमीपेस्वमुखमानीय॥ॐमेधांतेदेवःसवितामेधांदेवीसरस्वती॥मेधांतेअश्विनौदेवावाधत्तांपुष्करस्रजाविनिरुचंपद्मित्वापुनस्तद्धिरण्यंसव्येकर्णेनिधायतामेवजपेत्॥ततः

शिशोरंसौयुगपदभिमृशेत्॥ॐअश्माभवपरशुर्भवहिरण्यमस्तृतंभव॥वैदोवैपुत्रनामासिसजीवन्नरदःशतमितिमंत्रेण॥इंद्रश्रेष्ठानिगृत्समदइंद्रस्त्रिष्टुप्॥असाभिमर्शनेवि०॥ॐइंद्रश्रेष्ठानिद्रविणानिधेहिचित्तिंदक्षस्यसुभगत्वमस्मे॥पोषंरयीणामरिष्टिंतनूनांस्वाढ्यानंशतःसुदिनत्वमह्नां॥अस्मेप्रयंधिविश्वामित्रइंद्रस्त्रिष्टुप्॥अभिमर्शनेवि०॥ॐअस्मेप्रयंधिमघवन्नजीषिन्निंद्रगोविश्ववारस्यभूरेः॥अस्मेशातंशारदोजीवसेधाअस्मेवीरांछश्वतइंद्रशिप्रिन्॥इतिमंत्रैश्चाभिमृशयततोरक्षायुषोरभिवृध्यर्थं॥अंगादंगात्संभवसिहृदयादधिजायसे॥आत्मावैपुत्रनामासिसजीवन्नरदःशतमितिमंत्रमुच्चार्यमूर्धानंत्रिराजिघ्रेत्॥ततःशि शोःकरिष्यमाणंनामतंदेवस्मरेत्॥अथस्विष्टकृदादिहोमंत्रोषंसमाप्ययथाचारंहिरण्योदकेनमातुर्दक्षिणास्तनंप्रक्षाल्य॥ॐइमांकुमारोजुषंधेय

तुदीर्घमायुःप्रजीवसे॥अस्येस्तुनोप्रयुंजानाआयुर्वर्चोयशोबलमितिमंत्रेणमात्राकुमा
रंपाययित्वाब्राह्मणेभ्योभूतिलहिरण्यादिकमन्नंवर्जितंयथाशक्तिदत्वाब्राह्मणैराशिषो
वाचयेत्॥जन्मलग्नेदुष्टस्थानस्थितग्रहपीडानिवृत्तयेतत्तीर्थविप्रोषनोदक्षिणादेया॥
तमर्वंतमितिपंचानांवामदेवोग्निर्गायत्री॥तमर्वंतमितिपंचमिरात्रीषः॥होमोत्रकृताकृतः॥
कुमार्याश्चैतज्जातकर्ममंत्रंकार्यं॥रात्रौसंध्यायांग्रहणेजातात्रौचांतरमध्येपीदंकार्यं॥मृ
तात्रौचमध्येजातश्चेत्तदेवात्रौचांतेवाकार्यं॥पितरिग्रामांतरगतेपित्र्यादिगोत्रिजोज्येष्ठकं वा
मेणेदंकुर्यात्॥ ॥इतिजातकर्म॥ ॥अथषष्ठीपूजा॥पंचमेषष्ठेचदिनेषष्ठएववापूर्वरात्रेपि
त्र्यादिःआचम्यप्राणानायम्यदेशकालौस्मृत्वास्यशिशोरायुरारोग्यसकलाभिष्टप्राप्तिद्वारा
श्रीपरमेश्वरप्रीत्यर्थंविघ्नशांत्यर्थंजन्मदानांषष्ठीदेव्याज्ञावंतिकायाश्चयथा मीलितोपचारैःषू
जनंकरिष्यइतिसंकल्प्यषोडशोपचारैस्तंत्रेणपूजयेत्॥पृथग्वासंकल्प्यपृथगेवपूजाकार्यादि ८२

तस्यशिशोर्माश्चानुलेपनादिनाकुड्यलेखनीयाः॥पीठादौवाक्षतपुंजरूपेणनिवेश्याःपुरु
षाःशस्त्रहस्ताःस्त्रियश्चनृत्यगीतकादिप्योस्यारात्रौजागरणंकुर्युः॥सूतिकायग्रहंचसधूमाग्नि
दीपशस्त्रमुसलांबुविभूतियुतंकार्यं॥सर्षपांश्चसर्वतोविकिरेत्॥अन्यदपियथाचारंसर्वंका
र्यं॥जन्मदाभ्योन्नादिनाबलिर्देयः॥विप्रेभ्यश्चतांबूलस्वाद्यदक्षिणादिदद्यात्॥जननात्रौच
मध्येप्रथमषष्ठदिनेषुदानेप्रतिग्रहेचनदोषः॥अन्नंतुनिषिद्धं॥षष्ठीप्रार्थना॥गौरीपु
त्रोयथास्कंदःशिशुत्वेरक्षितःपुरा॥तथामामप्ययंबालःषष्ठिकेरक्षतांनमः॥ ॥इतिषष्ठी
पूजाविधिः॥ ॥अथनामकरणप्रयोगः॥ ॥जन्मैकादशेद्वादशेवायथाचारंनियतदिने न
वानामकरणंकार्यं॥नियतकालेपिविष्टिवैधृतिव्यतीपातग्रहणसंक्रांत्यमावास्याश्राद्धदि
नेषुनकार्यं॥नियतकालेक्रियमाणेगुरुशुक्रास्तबाल्यवार्द्धक्यवक्रातिचारमलमासादिनि

LIBRARY OF THE BOMBAY BRANCH OF THE ASIATIC

षेधो नास्ति नियतकालातिक्रमेतुज्योतिःशास्त्रोक्तेशुभे कालेकार्यं॥सर्वथापूर्वाह्णः प्रशस्तः।
अत्रहोमः कृताकृतः॥उक्तकालेत्रिंशन्नामचिकीर्षुर्विप्रानाहूयपूर्वेद्युस्तदहरेववा स्व
स्तिवाचनमुपक्रम्यपुण्याहत्रयमुच्चारयिष्यमाणनामचतुर्थ्यन्तमुच्चारयेत्त्रिःएतन्नाम्नेस्वस्ति
भवंतोब्रुवंत्विति उक्तेविप्रैस्तन्नाम्ने स्वस्तीतित्रिःप्रत्युक्तेशेषंस्वस्तिवाचनंसमाप्येदमायुः
कुमारस्यनामाहंविदधानीतिविप्राननुज्ञाप्यतैर्विधीयतामित्यनुमोदितोदेशकालौनिर्दिश्या
स्यैबीजिगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनाम
करणंकरिष्यइतिसंकल्प्यग्रहयज्ञाभ्युदयिकेयथाशक्तिकृत्वायथाचारंस्वकुलदेवताभक्त
इतिनामकृत्वाजन्मकालीनमासनामकुर्यात्॥तच्च॥कृष्णानंतोच्युतश्चक्रीवैकुंठोथजनार्द
नः॥उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः॥योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात्॥
अत्रयथाचारंचैत्रादिमार्गशीर्षादिवाक्रमः॥ततस्त्रियुरुषवाचिदेवतावाचिवास्वेष्टंवायुग्मा

क्षरंह्यक्षरंकुमारप्रतिष्ठाकामश्चतुरक्षरंब्रह्मवर्चसकामोनामकृत्वाततो भिवाद
नीयंनामविप्रादिवर्णक्रमेणशर्मवर्मगुप्तदासान्यतमपदांतमुपांशुकुर्यात्॥तच्चमौञ्जी
बंधनान्मातापितरावेवजानीयातां॥उपनयनकालेचानेनना मभिवादयेतिकुमारंप्र
तिवाच्यंअत्रौञ्जिष्ठा चारःतंडुलान्कांस्यादिपात्रेप्रसार्यतदुपरिसुवर्णशलाकयाकु
लदेवताप्रयुक्तमादौअमुकभक्तइतिनामलेख्यंततोमासनामततोवकदाख्यंज्योतिः
शास्त्रोक्तचक्रानुसारेणजन्मनक्षत्रपादप्रयुक्ताक्षरादिनामततोव्यवहारिकंस्वेष्टंनामे
तिचतुर्थ्यंलिखित्वानामदेवताभ्योनमइतिसंपूज्यामुकनाम्नात्वममुकोसीतिस्वदक्षिण
स्थमातुरुत्संगस्थस्यशिशोर्दक्षिणेकर्णेकथयित्वातदनुमित्रेत्यादिमंत्रपाठांतेविप्रै
र्नामसुप्रतिष्ठितमस्तित्युक्तेभमुकनाम्नामुकनामायंभवतोभिवादयते इत्युक्ता

मकर्त्री प्रतिनामविप्रानभिवादयेत्॥तेचायुष्मान्भवत्वमुकइतिवदेयुरितिनक्षत्रनामे
वाभिवादनीयंगुसंचेत्यपिवदंति॥ततःकर्त्तादेवताभ्योब्राह्मणेभ्यश्चनत्वायथाविभवं
ब्राह्मणान्भोजयेद्दक्षिणांचदद्यात्॥विप्रास्त्रिषश्चाद्याः॥कुमार्याअपिनामकरणमम
त्रकंकार्यं॥विषमाक्षरंतुनन्नामहोमपक्षेतुपार्थिवंगोजातकर्मवदेवप्रधानाकुतीर्द्वि
नामयथोक्तंधृत्वास्विष्टकृदादिहोमंशेषंतंत्रंकुर्यात्॥अत्रजातकर्मवत्पित्राद्याःक्रमे
णकर्त्तारः॥ ॥इतिश्रीनारायणभट्टकृतेप्रयोगरत्नेनामकरणप्रयोगः॥ ॥तत्रनामक
रणदिनेषोडशेद्वात्रिंशेन्यस्मिन्वाज्योतिःशास्त्रोक्तमृदुध्रुवक्षिप्रनक्षत्रादियुक्तेशुभेकाले
यथाचारंकुलदेवतादिपूजांविधायालंकृतंश्रेष्ठंहरिद्राघृतालंकृतेपर्यंकेमात्राद्याःसौभाग्य
युक्ताःस्त्रियोयोगशायिनंहरिंस्मरंत्योगीतवाद्यादिसमकालंप्राङ्मुखंसंन्यस्येयुः॥स्व
स्त्याचारशांतिंचान्यदधिकार्यं॥ ॥अथदुग्धेधानं॥ ॥एकत्रिंशेदिनेद्वितीयजन्मनक्षत्रेवान्य ८४

स्मिन्वान्न प्राशननक्षत्रयुक्तेशुभदिनेकुलदेवतादिपूजांतेगोक्षीरंशंखेनधात्रीमातान्या
वासुभगालंकृतंकुमारंदक्षिणत्रिरसंप्राङ्मुखंवापाययेदिति॥अथकर्णवेधः॥ ॥जन्म
दिनाद्वादशेषोडशेवादिनेषष्ठसप्तमाष्टमदशममासान्यतरमासेन्यदावादंतजननात्पूर्व
मेवज्योतिःशास्त्रोक्तमासशुक्लपक्षतिथिवारनक्षत्रादिशुभकालेपूर्वाह्णेमध्याह्नेवाविघ्ने
शिवब्रह्मचंद्रसूर्यादिदिग्देवतासत्यसरस्वतीकुलदेवतागोब्राह्मणान्यथाविभवंसंपूज्य
मातुरुत्संगस्थस्यालंकृतशुभासनस्थस्यवालंकृतस्यशिशोःकर्णयोर्वेध्यस्थलमलक्तक
सेनांकयित्वायथाविभवंसुवर्णरूप्यताम्रलोहसूच्यामांगलिकद्विगुणपट्टादिसूत्रोपेत
यासौचिकेनान्येनवाकुशलेनसुभगस्त्रियावाप्राङ्मुखस्यादक्षुखस्यवाकर्णौवेधयेदना
दृत्तेसूर्यरश्मिपातस्थलंगणादोषित्रादिःकुमारस्यपूर्वंदक्षिणःकुमार्यास्तुपूर्ववामःकर्ण

विध्यः॥ वेधननक्षत्रात्तृतीयनक्षत्रेकर्णक्षालनमुच्छ्वासिणारोहणार्थंकार्यं॥ रूढौचक
र्णेयथाभरणधारणक्षमोभवतस्तथावर्धयेत्पुंसः॥ सूर्यरश्मिग्रवेशायोग्यरंध्रपर्यंतंवर्द्धये
त्॥ लंबकर्णानातुनिषिद्धास्त्रीणांयथेच्छं॥ ॥अथसूर्यावलोकनंनिष्क्रमणंच॥ ॥जननात्तृ
तीयेमासिजन्मदिनेजन्मनक्षत्रेवाइष्टदेवतापूजनपूर्वकंअलंकृतेनत्रिशुनासोत्सवंसूर्य
दर्शनंकारयित्वाचतुर्थमासेशुभकालेग्निंचंद्रंधेनुंचदर्शयेत्॥ केचित्तु॥ सप्तिनआग्नेयो
विश्वेदेवास्त्रिष्टुप्पूत्रिशोरंकारोपणे विनियोगः॥ ॐस्वस्तिनोमिमानामुष्विनाभगः॥
अनेनपित्रादिःत्रिशुमंकमारोप्य॥ आशुःशिशानइतित्रयोदशर्चस्याप्रतिरथसूक्तस्य
इंद्रोप्रतिरथइंद्रस्त्रिष्टूपचतुर्थीबृहस्पतिर्देवत्याग्नेयोदशम्यनुष्टूप्त्रिशोरथ्याभिहृष्य
र्थंजपेवि॥ ओंआ त्वाशिशानोवृषभोनभीमः॥१३॥असोयासेनेतिद्वयंत्रिशुक्रो ८५

चजपेत्॥ तच्चक्षुर्वसिष्ठःसूर्यःपुरउक्तिकुमारस्यादित्यावेक्षणेवि॥ तच्चक्षुर्देव
हितंशुक्रमुच्चरत्॥ पश्येम शरदःशतंजीवेमशरदःशतमितिसूर्यंनिरीक्षयेदितिवदंति॥
तृतीयेमासेसूर्यावलोकनंनकारितं चेन्निष्क्रमणेनसहैवकार्यं॥ ततश्चतुर्थमासिषष्ठे
वाशुक्लपक्षेशुभतिथ्यादौपितासभार्यःसत्रिशुरभ्यंगस्नातःममत्रिशोरायुःश्रीवृद्धिबीजगर्भ
समुद्भवेनोनिवर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंनिष्क्रमणाख्यंकर्मकरिष्येइतिसंकल्प्यतद्वं
गतयास्वस्तिवाचनाभ्युदयिकंगृह्यंकृत्वाइंद्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशा
नानांप्राच्यादिदिग्गांचंद्रार्कवासुदेवगगनानांचयथाक्रमंपूजांकृत्वाब्राह्मणान् भोजयि
त्वातैःस्वस्त्ययनंवाचयित्वासायंसंध्यादिकंकृत्वात्रिशुंसौवर्णैःकृत्रिमैर्वाभरणैर्यथा
शक्त्यलंकृत्यपूर्वंनलतंचेदितानीत्रिशुनाग्निंचंद्रधेनूनांदर्शनंकारयित्वाशुभादिवाहन

स्थं त्रिशुंमानुलेनधान्यावावाहयित्वाभार्यापुत्रविद्वद्ब्राह्मणज्ञातिबांधवपुरंध्रीगण
दर्पणापूर्णकलशयुक्तकन्यागणपुष्पहरिद्राक्षतदीपमालाध्वजलाजमंगलवाद्यघोष
युक्तकंनिजदज्जानुषमित्यादिनाकुंतादिसुमंगल्यसूक्तंपठन्गृहाद्बहिर्गत्वामंत्रमेनमुदी
रयेत्॥चंद्रार्कयोर्दिगीशानांदिशांचवरुणस्यच॥निक्षेपार्थमिदंदत्तेत्वांरक्षंतुसर्वदा॥
अद्यमत्तंप्रमत्तंवादिवारात्रावथापिवा॥रक्षंतुसततंसर्वेदेवाःभक्तपुरोगमाः॥एवंत्रिशु
रक्षणार्थंदेवान्संप्रार्थ्यविसृत्रिवालयोरन्यतरद्वंधुगृहंवागत्वातत्रदेवंसुमंगलवाद्यघो
षंपुष्पोपहारादिभिःसंपूज्यगोमयाद्यनुलिप्तचतुरस्रदेशेधान्यादिनिधायतत्रत्रिशुमा
सयित्वामंत्रेणरक्षांकुर्यात्॥मंत्रश्चत्र्यंबकमितिमंत्रस्यवसिष्ठोमृत्युंजयस्त्र्यंबकोनुष्टु
प्॥त्रिशोरक्षायांविनियोगः॥ॐ त्र्यंबकंयजामहेसुगंधिपुष्टिवर्द्धनं॥उर्वारु ८६
हौंजूंसः ॐभूर्भुवःस्वःॐ

ॐस्वःभुवःभूःॐसःजूंहौंॐ

कमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥ इत्येवंरूपंमृतसंजीवनीतिमंत्रंजपन्वि
भूत्याक्षतेर्वामूर्ध्निललाटेचरक्षांकृत्वाअघोरादिभिर्भूतेर्ज्ञानंगणेशमभ्यर्च्यत्रिशुंभक्ष्या
दिभिस्तोषयित्वाआत्रिशोर्वाचयित्वादेवनापणांप्रदक्षिणत्रयंचत्रिशुनाकारयित्वा
मानुलाद्यासन्नबंधुगृहंपूर्ववन्नीत्वातत्रदानोपहारादिभिःत्रिशुंतोषयित्वाब्राह्मणेरा
त्रिशोर्वाचयित्वास्वगृहं गत्वातेभ्यःसुवासिनीभ्यश्चयथाशक्तिदक्षिणांदत्वाबंधुभिःसह
भुंजीत॥कुमार्याभप्येतत्समानंहोमोत्रकृताकृतः॥होमपक्षेत्रिशोरलंकरणानंतरंलौकि
काग्निंप्रतिष्ठाप्यज्ञातकर्मवदनादेशादेवताभ्योकृत्वाग्निंचंद्रदर्शनादिस्वगृहगमनांतंकृ
त्वाविसृष्टकृदादिहोमशेषंसमाप्यब्राह्मणान्त्रीर्वादादिकारयेदितिक्रमः॥ ॥इतिनिष्क्रमण
प्रयोगः॥ ॥अथोपवेशनं॥पंचमेमासिशुक्लपक्षेज्योतिःशास्त्रोक्तशुभतिथ्यादौपूर्वाह्णे

स्वस्तिवाचनंकृत्वावराहपृथ्वीगुरुदेवताद्विजान्पूजयित्वाभूभागमुपलिप्यतत्रमंड
लंकृत्वातत्रशंखतूर्यादिमांगलिकध्वनौक्रियमाणेशिशुमुपवेशयेदेतैर्मंत्रैः॥रक्षेनंव
सुधेदेविसदासर्वगतंशुभे॥आयुःप्रमाणंनिखिलंनिक्षिपस्वहरिप्रिये॥अचिरादायुष
स्त्वस्ययेकेचित्परिपंथिनः॥जीवितारोग्यवित्तेषुनिर्दहस्वाचिरेणतान्॥धरिष्यत्रोषभू
तानांमानस्त्वमधिहंससि॥कुमारंपाहिमानस्त्वंब्रह्मातदनुमन्यतामितिततोब्राह्मणान्
पूजयित्वाशिषोवाचयित्वानीराजनाद्युत्सवंकुर्यात्॥एवंकुमार्याअपि॥ ॥इत्युपवेश
नं॥ ॥अथान्नप्राशनं॥जन्मतःषष्ठेमासिअष्टमेवादंतेषुजातेषुवाज्योतिःशास्त्रोक्तति
थिनक्षत्रादिशुभकालेपूर्वाह्णेपित्रादिःशिशोरंनप्राशनंकुर्यात्॥षष्ठेमासिचेत्क्रियते
तदागुरुशुक्रमौढ्यादिदोषोधिकमासादिदोषश्चनास्ति॥पित्रादिःसभार्य शिशुर्मंगल

स्नानंकृत्वादेशाकालौस्मृत्वाममास्यशिशोर्मातृगर्भमलप्राशनशुध्यंनाघब्रह्मवर्च
सतेजइंद्रियायुर्लक्षणफलसिद्धिबीजगर्भसमुद्भवेनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्य
र्थंअन्नप्राशनाख्यंकर्मकरिष्यइतिसंकल्प्यतदंगस्वस्तिवाचनाभ्युदयिकेकृत्वाशिशु
मलंकृत्यजातकर्मवल्लौकिकाग्निंप्रतिष्ठाप्यानादेशाकृतीर्ज्ञात्वापूजोपहारादिभिरभीष्ट
देवतामभ्यर्च्यतत्पुरतःस्वदक्षिणेशुभस्थोपरिस्थमातुरुत्संगेप्राङ्मुखोपविष्टस्यशि
शोःप्रथमान्नप्राशनंकारयेत्॥दधिमधुघृतमिश्रमन्नंशुभेभाजनेप्रक्षिप्य॥अन्नपत
इत्यस्यनलकूबरोन्नपतिर्जगती॥शिशोरन्नप्राशनेविनियोगः॥ॐअन्नेपुतेन्नस्यनोदे
ह्यनमीवस्यशुष्मिणः॥प्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदेचतुष्पदेइतिमंत्रेणसमुद
र्ण्यहस्तेन्नमादायप्रथमकवलंप्राशयित्वायथेष्टंभोजयित्वामुखंप्रक्षाल्यबालंभूमा

८७

वुपवेश्यतदग्रेपुस्तकंशास्त्रवस्त्रादित्रित्यानिविन्यस्यजीविकांपरिक्षांकुर्यात्॥त्रिशुः
स्वेछयायत्रथमंस्पृशेत्तत्सास्यजीविकेतिविद्यात्॥ततःस्विष्टकृदादिहोमत्रोषंसमाप्य
यथान्नाभिब्राह्मणान्भोजयित्वादक्षिणांदत्वात्रिपोवाचयित्वाबंधुभिःसहस्वयंभुंजी
त॥होमोत्रकृताकृतः॥होमपक्षेपूर्वेद्युर्नांदीश्राद्धं॥कुमार्याअप्येतदमंत्रकंकार्यं॥कि
तुसप्तमेमासेइत्यन्नप्राशनं॥ ॥अथवर्द्धापनविधिः॥ ॥आदित्यपुराणे॥सर्वेषांजन्म
दिवसेस्नातैर्मंगलवारिभिः॥गुरुदेवा ग्निविप्राश्चपूजनीयाःप्रयत्नतः॥स्वनक्षत्रंच
पितरस्तथादेवः प्रजापतिः॥प्रतिसंवत्सरंयत्नात्कर्त्तव्यश्चमहोत्सवः॥स्वनक्षत्रंस्वनक्ष
त्रदेवता॥स्वनक्षत्रंवित्तपश्चेतिकश्चित्याढः॥तदावित्तपःकुबेरः॥अत्रप्रयोगः॥प्रति ८८
र्षंजन्मदिनेसोरमानेनजन्मनक्षत्रेवायजमानःपूर्वोक्तैःभ्यज्यस्नात्वासर्वौषधियुतज

लंपूरितकलशंसंपूज्यतदुदकेनस्नानःशुक्लांबरधरोयथाविभवमलंकृतोविधिवत्स्व
स्तिवाचयित्वाकौतुकमाबध्यदूर्वाहोमंकुर्यात्॥तत्रायंक्रमः॥देशकालौस्मृत्वाममाब्दे
पूर्तिदिवसेआयुरभिवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंदूर्वाहोमंकरिष्येइतिसंकल्यविधि
वदग्निंप्रतिष्ठाप्यपुनर्देशकालौसंकीर्यसमिधावादायास्मिन्दूर्वाहोमेदेवतापरिग्रहा
र्थमन्वाधानंकरिष्यइतिउक्त्वास्मिन्नग्नौहिनेग्नावित्यादिचतसृभिराज्येनस्यंतमुक्त्वा
प्रधानदेवतांमृत्युंजयमष्टोत्तरशतदूर्वाद्रव्येणहोषेणस्विष्टकृतमित्यादिसद्योयस्य
इत्यंतमुक्त्वासमिधावग्नावाधायपरिसमूह्याज्यभागांतंकृत्वादधिमधुघृतानांके
वलाज्यान्तंवादूर्वात्रयंत्र्यंबकमित्यस्यवसिष्ठोमृत्युंजयरुद्रोबकोनुष्टुप्॥दूर्वाहोमेविनि
योगः॥ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीय

ॐहौंजूंसः ॐभूर्भुवःस्वः ॐ

ॐस्वःभुवःभूःॐसःजूंहोॐ

मामृतात्॥ इत्यनेनमंत्रेणाष्टोत्तरशतंकृत्वास्विष्ट कृदादिहोमशेषंसमापयेत्॥त
तोविधिनाग्रहयज्ञं कृत्वाआयुषेचरुहोमंसंकल्पपूर्वकंकुर्यात्॥तत्रायंक्रमः॥देशका
लौसंकीर्त्यास्मिन्होमेदेवतापरिग्रहार्थमित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाविश्वान्दे
वान्दशवारमग्निंषोडशवारंजातवेदोग्निमेकवारंचरुद्रव्येणशेषेणस्विष्टकृतमित्या
दिसद्योयक्ष्येइत्युक्त्वासमिधावघ्नावाधायपरिसमूहनादिआज्येदर्भाग्रद्वयप्रक्षेपणां
तंकृत्वासिद्धान्नमाज्यसमीपेनिधायाज्येनसहतदन्नंत्रिःपर्यग्निकृत्वाज्योद्वासनादिसु
वसंमार्जनांतंकृत्वान्नंपात्रेपृथक्कृत्वाग्नावधिश्रित्यस्रुवेणाभिघार्यैदंशुद्धास्याज्याद्द
क्षिणतोबर्हिष्यासाद्यपुनरभिघारणाद्याज्यभागांतंकृत्वा॥आनोभद्राइतिदशर्चस्यसू
क्तस्यगोतमोविश्वेदेवाआद्याःपंचसप्तमीजगत्यःषष्ठीविराट्स्थानाअष्टम्याद्यास्तिस्र ८९

स्त्रिष्टुभः॥आनोभद्राःक्रतवोयंतुविश्वतः॥अदब्धासोअपरीतासउद्भिदः॥देवानोयथासदमिद्वृधेअसन्न
प्रायुवोरक्षितारोदिवेदिवे॥१॥देवानांभद्रासुमतिर्ऋजूयतांदेवानांरातिरभिनोनिवर्तताम्॥देवानांसख्यमुपसेदिमावयं
देवान्आयुःप्रतिरंतुजीवसे॥२॥तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिंदक्षमस्रिधं॥अर्यमणंवरुणंसोमम
श्विनासरस्वतीनःसुभगामयस्करत्॥३॥तन्नोवातोमयोभुवातुभेषजंतन्मातापृथिवीतत्पिताद्यौः॥तद्ग्रावाणःसोमसुतो
मयस्करंतदश्विनाशृणुतंधिष्ण्यायुवं॥४॥तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं॥पूषानोयथापुरेवद
सदमृधेरक्षितापायुरदब्धःस्वस्तये॥५॥स्वस्तयआसुचरथंदधिक्रावाणमकारिषंजिष्णुंनियुत्वंतंसहध्वजं॥ऊर्ध्वोनोयातु
भयेषुजीवसेमाद्यावीर्मध्यमायुर्गन्तारिषन्॥६॥शंनोमित्रःशंवरुणःशंनोभवत्वर्यमा॥शंनइंद्रोबृहस्पतिःशंनोविष्णुरुरु
क्रमः॥७॥पावकाःशंनोदेवीरभिष्टयआपोभवंतुपीतये॥शंयोरभिस्रवंतुनः॥८॥विश्वेषांदेवीरवसांविश्वेषांपथ्याव
स्तिः॥विश्वेषांमित्रधरुणाभूतस्यप्रचेतसोविश्वेदेवाअदब्धाःपुरोगवाःसप्तहोतारऋतावृधः॥९॥पावकयाःसरस्वतीवा
जेभिर्वाजिनीवतीयज्ञंवष्टुधियावसुः॥चोदयित्रीसूनृतानांचेतंतीसुमतीनां॥१०॥महोअर्णःसरस्वतीप्रचेतयतिकेतु
नाधियोविश्वाविराजति॥१॥चोदयित्रीसूनृतानांचेतंतीसुमतीनां॥यज्ञंदधेसरस्वतीं॥२॥सरस्वतीसाधयंतीधियंनोम
णिंजुषंतांविश्वतूर्तये॥३॥सरस्वतिनयसुपथाराये॥४॥सरस्वतिदेवनिदोनिबर्हयप्रजांविश्वस्यबृसयस्यमायिनः॥
प्रपीनयपृथिवीपप्रथेपुरुषप्रजाभिरग्नेयुक्ष्वाहविष्मतीदेवेभ्योहविष्मतीं॥५॥इळेसरस्वतिमहीतिस्रोदेवीर्मयोभुवः॥
बर्हिःसीदंतुनःप्रियं॥६॥इळासरस्वतीमहीतिस्रोदेवीर्मयस्करन्॥बर्हिरास्दोअदितेसुपुत्रकेदेवेभिर्मातरादनं॥७॥
तन्नस्तुरीपमद्भुतंपुरुक्षुंविश्वदर्शतं॥आदित्यंयोषणांमहे॥८॥आदित्यासोअदितयःस्योनाःसुशर्माणोबृहदुक्षमाणाः॥
अनर्वाणोअकुटासोअदब्धासोमंपांतुसदमिद्गोपीथे॥९॥अदितेमित्रवरुणोतनूपादितेर्विष्णुःसुदानुःसुशर्मा॥अदि
तेरंशोमदसोमपीथायादित्याःसंतोमनसापिबंतु॥१०॥

९०

सि पूर्व्यः धनृणा स्तापोता जनुषा पुरोहितः॥ विश्वा विद्वां आर्त्विज्या धीरपुष्यस्यग्नेसुरत्वे०॥
यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवातिरोचसे॥ राज्यश्चिदधो अतिदेवपश्यस्यग्नेसुरत्वे०॥ पूर्वो देवाभवतु सुन्वतो रथो स्माकं वीरां उ अभ्यस्तु दूढ्यः॥ तदाजानी तो तपुष्यतावचोग्नेसुरत्वे०॥ वृधेदुः वीरां उ अर्पदूढ्यो जहि दूरेवाये अंतिवाके चिदत्रिणः॥ अथा यज्ञाय गृणतेसुगं कृध्यग्नेसुरत्वे०॥ यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव तेरवः॥
आदिन्वसि वनिनो धूमकेतुग्नेसुरत्वे०॥२॥ अधस्वना दुतबिभ्युः पतत्रिणो दुष्पायन्तेयवसादो व्यस्थिरन्॥ सुगं तन्ते नावुकेभ्यो रथेभ्योग्नेसुरत्वे०॥ अयं मित्रस्य वरुणस्य धायसे वयातामरुतां हेळोअद्भुतः॥ मृळासुनो भूत्वेषां मनुः पुनरग्नेसुरत्वे०॥ देवो देवानामसि मित्रोअद्भुतो वसुर्वसूनामसि चारुरध्वरे॥ शर्मन्त्स्यामृतवसुप्रथस्तमेग्नेसुरत्वे०॥ तन्ते भद्रं यत्समिद्धः ९०

स्वदमेसोमं क्रतोजरसिमृळयत्तमः॥ दधासि रत्नं द्रविणं चदाशुषेग्नेसु०॥ यस्मेत्वंसुद्रविणोददोग्नागास्त्वमदितेसुर्वतातौ॥ तंदक्षेणक्रतुनापासिपुष्यसिराधसातेस्याम॥ सत्वमग्नेसोभगत्वस्यविद्वानस्माकमायुःप्रतिरन्तुजीवसे॥ तन्नोमित्रोवरुणोममहन्तामदितिःसिंधुःपृथिवीउतद्यौः॥१६॥ ॐ जातवेदसइत्यस्यमारीचः कश्यपोजातवेदोग्निस्त्रिष्टुप्॥ सर्वेषांचरुहोमेविनियोगः॥ ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः॥
सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥ एतैःसप्तविंशतिमंत्रैरवदानथमिणङ्कृत्वास्विष्टकृदादिहोमञ्चषंसमाप्यवासुदेवनक्षत्रदेवतांचंद्रंस्वनक्षत्रंवरुणंचयोडशोपचारैरभ्यर्च्यतन्नक्षत्रकाम्यकेमंत्रैर्धृतेननेभ्योयथाशक्तिहोमंकृत्वाग्रहयज्ञोक्तविधिनाभिषिक्तोयथाशक्तिगोभूहिरण्यादिदेवगुरुब्राह्मणान्सहृद्धुजनपूजांस्वाहनायुधकृता

दत्ता

पीठछत्रपूजांकृत्वाविधवत्नांदीश्राद्धंकृत्वाब्राह्मणान्भोजयित्वाशुभमुहूर्तेगंगादिभिर्
लंकृतःस्वभूषणधारणपूर्वकंसुवर्णमयकटिसूत्रंनूतनवस्त्रंचधृत्वापतिपुत्रवतीभिः
स्त्रीभिर्नीराजितोब्राह्मणाशिषोगृहीत्वास्वयंहविष्यान्नाजिनेंद्रियोवर्त्तेतेनेदंसर्वंथ
वह्वाद्यपित्रादिभिःकार्यंपश्चात्तुप्रतिवर्षंस्वयमेवेति॥ ॥इतिप्रयोगरत्नेपारिजातोक्तअ
ब्दपूर्त्तिविधिः॥ ॥अन्यत्रतु॥वर्षपर्यंतंप्रतिमासंततःप्रतिवर्षमांगल्यस्नानंकृत्वाकुमु
दिदेवताःसंपूज्ययथान्नाक्किब्राह्मणभोजनंचदक्षिणांचदत्वासुवासिनीभिर्नीराजितो
ध्तनूतनवस्त्रोब्राह्मणीभ्यःत्रिभुग्भ्यश्चापूपपूरिकाःसज्यकुमुदादित्रीतयेआयुर्वृद्ध
येचवायनानिदद्यात्॥जन्मर्क्षदेवताप्रीत्यैचदद्यात्॥वर्षंतुसुहृदद्वादशवंशपेटिका
सुमोदकादिखाद्यंनिधायनूतनवस्त्राच्छादिताःपेटिकाजीवत्पितृपुत्राभ्योदत्वा तदाशी ९१

न

षोगृह्णीयात्॥इदंसर्वंजीवंतीमातेवापत्यायुषेकुर्यात्॥ग्रंथांतरेतु॥गणेशंग्रहानिष्टदे
वतांमार्कंडेयंचप्रपूज्यप्रार्थयेत्॥मार्कंडेयनमस्तेसुसप्तकल्पांतजीवन॥आयुरारोग्यसि
ध्यर्थंप्रसीदभगवन्मुने॥चिरजीवीयथात्वंतुमुनीनांप्रवरद्विज॥कुरुष्वमुनिशार्दूलतथामा
चिरजीविनं॥ततःमार्कंडेयमहाभागसप्तकल्पांतजीवन॥आयुरारोग्यसिध्यर्थमस्माकंवर
दोभव॥सतिलेगुडसंमिश्रमंजल्यर्धमितंपयः॥ मार्कं
याद्वरंलब्ध्वापिबाभ्यांसुविस्तृतये॥इतिसतिलगुडमंजल्यर्द्धमितंदुग्धंपिबेत्॥अश्वत्थामा
बलिर्व्यासोहनूमांश्चविभीषणः॥कृपःपरशुरामश्चसप्तैतेचिरजीविनः॥सप्तैतान्यःस्मरे
नित्यंमार्कंडेयमथाष्टमं॥जीवेद्वर्षशतंसाग्रंसर्वव्याधिविवर्जितं॥इतिवचनादश्वत्थामा
दीन्मार्कंडेयांतानष्टौस्मरेत्॥इदंचवर्द्धापनंयदिजन्ममासेऽसंक्रांतस्तदाभूद्यमासएवक

श्री

र्थनत्वधिके॥ ॥इतिभट्टाभेश्वरदैसूरिसुतनारायणभट्टविरचितेप्रयोगरत्नेचधर्मोपन
प्रयोगः॥ ॥अथचौलं॥तत्रकालस्तावत्प्रथमेद्वितीयेपंचमेसप्तमेवावर्षेगततृतीयभा तृतीये
गेआगनत्रिभागेवाउपनीत्यासहवायथाकुलाचारंचौलंकार्यं॥तत्रापिद्वितीयादौवर्षेज
न्मतोमुख्यं॥गर्भ तोगौणं॥उदगयनेशुक्लपक्षेगुरुशुक्रयोर्बाल्यवार्धकास्तमयाभावेऽ
क्षयेअनधिकेचमासिज्योतिःशास्त्रोक्तप्रशस्ततिथिवारलग्नेषुशुभमुहूर्तेदिनएवन
तुरात्रौकार्यं॥इदंकर्मलौकिकाग्नौतस्यसभ्यइतिनाम॥यदिगर्भाधानादिसंस्कारलोप
स्तदाप्रायश्चित्तंकृत्वाकालंत्यथानिमित्तंप्रायश्चित्तहोमंचकृत्वाचौलहोमःकार्यः॥तदा
हभगवान्॥आरभ्याधानमाचौलात्कालेतानेतुकर्मणां॥व्याहृत्याज्यंसुसंस्कृत्यकृत्वा
कर्मयथाक्रमं॥कार्यमित्रेषः॥प्रायश्चित्तंचसएवाह॥एतेषांकेकलोपेपिपादकृच्छ्र ९२

समाचरेत्॥चूडायाअर्धकृच्छ्रंस्यादापदित्वेचमीरितं॥अनापदितुसर्वत्रद्विगुणंद्वि
गुणंचरेत्॥मनुः॥जातकर्मादिसंस्काराःस्वकालेनभवंतिचेत्॥चौलादर्वाक्प्रकुर्वीतप्रायश्चि
त्तादनंतरं॥प्रायश्चित्तहोमेकृतेतत्कर्मकृताकृतं॥तथाचकारिका॥प्रायश्चित्तेकृतेप
श्चादतीतमपिकर्मवै॥कार्यमित्येकआचार्यानेत्यन्येतुविपश्चितः॥प्रायश्चित्तहोमस्य प
प्रधानहोमात्पूर्वंसमस्ताभिर्व्याहृतिभिःप्रतिकर्मलौकिकाज्याहुतिःकार्येति॥ ॥अथचूडा
कर्मप्रयोगः॥ ॥उक्तेतृतीयादौवर्षेउद गयनेशुक्लपक्षेप्रशस्ततिथिवारनक्षत्रयोग
तेशुभेमुहूर्तेकुमारस्यचौलकर्मकरिष्यन्कर्त्तापूर्वेद्युःस्वस्तिवाचनपूर्वकंनांदीश्राद्धंयदे
यज्ञमंकुरार्पणंचकृत्वापरेद्युःकृतमंगलस्नानंकुमारमलंकृत्यब्राह्मणैःपुण्याहंवाचयि
त्वामात्रंकेकुमारंदक्षिणतउपवेश्यदेशकालौसंस्मृत्यकुमारस्यबीजगर्भसमुद्भवेनोनि स्य

र्हणेन बलायुर्वर्चोभिरृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंचोलाख्यंकर्मकरिष्येइतिसंकल्प्य
शुभेमुहूर्तेसभ्याग्निंउपलेपाद्यग्निप्रतिष्ठांतंकृत्वापुनर्देशकालौनिर्दिश्यमयाक्रियमा
णेचौलकर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्येअस्मिन्नन्वाहितेग्नावित्याद्याधारावा
ज्येनेत्यंतमुक्त्वाग्निंपवमानंप्रजापतिंचेतिप्रधानदेवताआज्यद्रव्येणशेषेणस्विष्ट
कृतमित्याद्युक्त्वासमिद्वयमन्वाधायपूर्णपात्रनिधानांतंपरिषेचनपात्रप्रयोगादिनंत्रंकृत्वाग्ने
रुदगास्तीर्णेषुदर्भेषुव्रीहियवमाषतिलैःपृथक्पूरितानिनवानिश्रावाणिचत्वारिक्रमे
णैकैकशःपाकसंस्थान्यासादयेत्॥मानात्रत्यग्नेरासीनस्यकर्तुर्दक्षिणतःकुमारमुत्संगे ग
त्वासीनं॥ततःकर्त्तामातुःपुरस्तात्पश्चाग्नेरानडुहगोमययुतनश्रावंश्रामीपर्णयुतंश्रावं द
चनिदध्यात्॥ततोब्रह्मैकविंशतिकुशाग्रैर्जूलान्यादायमातुर्दक्षिणनासिकेनूपिता
वातथानिश्चेतू॥अस्मिन्पक्षेन्यएवचोलकर्त्ततःकुमारेणान्वारब्धःकर्त्तापुरस्तनमाघा ९३

रांतेकर्मकृत्वा॥अग्नआयूंषीतिनिसृणांश्रांतंवैरवानसाऋषयः॥अग्निःपवमानोदेवता
गायत्रीछंदः॥प्रधानाज्यहोमेविनियोगः॥ॐअग्नआयूंषिपवसआसुवोर्जमिषंचनः॥
आरेबाधस्वदुच्छुनांस्वाहा॥अग्नयेपवमानायेदंनममेत्यागः॥एवमग्नेपि॥ॐअग्निर्ऋषि ति
पवमानःपांचजन्यःपुरोहितः॥तमीमहेमहागयंस्वाहा॥ॐअग्नेपवस्वस्वपाअस्मेवर्चः
सुवीर्यं॥दधद्रयिंमयिपोषंस्वाहा॥प्रजापतेरित्यस्यहिरण्यगर्भऋषिः॥प्रजापतिर्देवता त्रि
ष्टुप्छंदः॥प्रधानाज्यहोमेविनियोगः॥प्रजापतेनत्वदेतान्यस्वाहाप्रजापतयइदं॥४॥
ततःश्रीतमुलूखलोभेजलेदक्षिणवामकराभ्यांक्रमेणपात्रयोःपृथक्गृहीत्वाश्रोत्रोःपश्चि
मेदेशेस्थित्वातदुदकहृदयमन्यस्मिन्पात्रेभ्यांॐउलूखलायउदकेनेहीतिमंत्रेणयुगपन्नि
नीयतदेकदेशंगृहीत्वानवनीतेनदधिद्रप्तेनवामिश्रयित्वाकुमारस्यवामकर्णमारभ्यप्र
दक्षिणंॐअदितिःकेशान्वपत्वायउंदंतुवर्चसइतिमंत्रेणक्षुरस्त्रिवारंक्लेदयेत्॥प्रति

छेदनंमंत्रावृत्तिः॥ततोब्रह्मदक्षस्थितेकविंशतिकुशपिंजूलमध्येत्रीणिपिंजूलान्या
दाय॥ॐॐषधेत्रायस्वेनमितिमंत्रेणकुमारा भिमुखंपश्चिमाग्राणितस्यदक्षिणेकेशभा
गेनिधायतेषुताम्रमयंक्षुरं॥ॐस्वधितेमैनंहिंसीरितिमंत्रेणनिधाय॥ॐयेनावपत्स
वितास्तुरेणसोमंस्यराज्ञोवरुणस्यविद्वान्॥तेनब्रह्माणावपतेदमुस्यायुष्माञ्जरदष्टिर्य
थासंदितिमंत्रेणसकेशानिपिंजूलानिछित्वाग्रागणिकृत्वाशिरावस्थश्मीयपर्णे
रंकीकृत्यमातुःकरेदद्यात्॥साचतानिसकेशान्यानडुहेगोमयेग्रागणिनिदध्यात्॥
एवंद्वितीयादिछेदनेषुपिंजूलनिधानादिसमंत्रकंकार्यं॥छेदनमंत्रेतुविशेषः॥ॐयेनधा
ताबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्॥तेनतआयुषेवपामिसुश्लोकायस्वस्तयइतिद्वितीय
छेदने॥येनभूर्यश्वरात्र्यांज्योक्पश्यात्सूर्यं॥तेनैआयुषेवपामिसुश्लोकायस्वस्तय ९४
त

इतितृतीयछेदने॥चतुर्थेतुयेनावपत्॥ॐयेनंधाता॥येनभूर्यश्चेतित्रयोपिमंत्राः॥ए
वंदक्षिणेकेशभागेचत्वारिछेदनानिकृत्वोत्तरेपिकेशभागेएवमेवप्रत्येकंमंत्रैराद्यानि
त्रीणिछेदनानिकुर्यात्॥ननुसर्वमंत्रैश्चतुर्थी॥ततः॥ॐयत्क्षुरेणमृर्चयतासुपेशोसाव
सावपसिकेशान्॥शुंधिग्रीवामास्यायुःप्रमोषीरितिमंत्रेणाग्रतआरभ्यामूलंक्षुरधारां
निमृज्यनापितमाकूय॥ॐश्रीतोष्ठाभिरद्भिरर्थंकुर्वाणोक्षण्वन्कुशालीकुर्वितिमंत्रेण
नुशास्यतंप्रेषार्थंचाचबोध्यनापितेनपूर्ववन्नीतोष्ठांबुभिराईकृतंकुमारशि
रोयथाकुलाचारंकल्पितन्निरवंवापयित्वाकुमारंस्नापयित्वापूर्ववन्मातुरुत्संगेवस्था
प्यस्विष्टकृदादिहोमंत्रेषंसमाप्यब्रीह्यपूर्णशरावंचतुष्टयंनापितायदद्यात्॥यस्यस्म
त्येत्युक्त्वाविघ्नमस्कृत्यात्रीषोब्राह्मणोक्ताःस्वयंकुमारश्चगृह्णीयात्॥एतत्सर्वंकुमार्यो

† भूयसींदक्षिणांदत्वाब्राह्मणेभ्योदद्यासंरब्धाकेभ्योभोजनंचसंकल्प्यकर्मसंपूर्णतांवाचयित्वा२

अप्यमंत्रकं। होमस्तुसमंत्रक इति। मध्येशिरसिचूडा स्याद्वासिष्ठानांतुदक्षिणे।
उभयोःपार्श्वयोरत्रिकश्यपा नांशिखामता। शिशोर्मातरिगर्भिण्यां चूडाकर्मन
कारयेत्। पंचमाब्दादधोर्ध्वंतुगर्भिण्यामपिकारयेत्। सद्योपनीत्या कुर्याच्चेन्न
दोषोनविद्यते॥ ॥इतिश्रीरामेश्वरभट्टप्रयोगरत्नेचूडाकर्मप्रयोगः॥ ॥
अथोपनयनं॥ ॥तद्गर्भाष्टमेष्टमेवाब्देकार्यं। मनुः। ब्रह्मवर्चसकामस्यकार्यं
विप्रस्यपंचमे। विशुः। षष्ठेतुधनकामस्यविद्याकामस्यसप्तमे। अष्टमेसर्वका
मस्यनवमेकीर्तिमिच्छतः। तथासंग्रहे। सप्तमेचाष्टमेवर्षेनवमेदशमेतथा। ए
कादशेद्वादशेवाप्युपनेयाद्विजातयः। ब्रह्मवर्चसमायुष्यंतेजोन्याद्यंतथेंद्रियं॥ ९५

पश्यन्कामयमानावैप्राप्नुवंतियथाक्रमं। नरसिंहः। उत्तरायणगेसूर्येकर्त्तव्योपनाय
नं। श्रुतिः। वसंतेब्राह्मणमुपनयीतग्रीष्मेराजन्यं। माघादिपंचमासेषुमेखलाबंधनंशिशो
र्ज्येष्ठमासेनज्येष्ठस्यजन्ममासेनसर्वेषां। शुक्लपक्षेद्वितीयादिस्वाध्यायतिथिषुनान
ध्यायेनैमित्तिकानध्यायेपूर्वाह्णेशुभमूर्त्तेशुभचंद्रादित्यरुशुक्रयोर्बाल्यवार्धका
स्तराहित्येज्योतिर्विदोक्तेशुभकालेउपनयनंकार्यं। उपनेत्रकर्ममात्रेवृद्धगर्गः। पि
तापितामहोभ्राताज्ञातयोगोत्रजायाजः। उपायनेधिकारीस्यात्सर्वाभावेपरःपरः। न
ह्यापित्रेवोपनयेत्पुत्रंतदभावेपितुःपिता। तदभावेपितुर्भ्राताततदभावेतुसोदरः। अधि
कारसिद्ध्यैप्रायश्चित्तमाह। वृद्धविशुः। कृच्छ्रत्रयंचोपनेतात्रीन्कृच्छ्रांश्चबहुश्च
रेत्। आचार्यीद्वादशसाहस्रंगायत्रीचजपेत्तथा। नांदीश्राद्धंकृतेपश्चादनध्याय

स्वकालिकः॥मौंजीबंधंतदाकुर्याद्वेदारंभंनकारयेत्॥अकालिकोगर्जनिर्घाताद्यनिमि
त्तकः॥आश्वलायनानामुपनयनदिनेवेदारंभाभावात्वेदारंभ करणंयजुर्वेदविषय॥आ
श्वलायनस्तुवृद्धिश्राद्धदिनात्पूर्वदिनमध्येमुहूर्त्तांतरेसतितेनैवनांदीश्राद्धेननत्रोपनयनंकु
र्यात्॥तदूर्ध्वंतुमुहूर्त्तेश्राद्धांतरपूर्वकमुपनयनंयथाकालंकुर्यात्॥॥इत्युपनयनोपयुक्तवि
चारः॥ अथोपनयनप्रयोगः॥ ॥उक्तकालेउपनिनीषुराचार्यः पूर्वेद्युःबटोःपरिधानार्थंशु
क्लंक्षौमंदौतंनवंसदशंपरेणाधौतंवस्त्रंउत्तरीयार्थंचकषायवस्त्रमजिनंवाकृष्णमृगस्य
ज्ञोपवीतंमौंजीमेखलांचपालाशंदंडमक्रणमृजुंसौम्यदर्शनंबटोःकेशसंमितंसाग्रंदंडंको
पीनंतद्धनसूत्रंभिक्षाभाजनंचसंपाद्यस्वस्योपनेतृत्वाधिकारसिद्ध्येकृच्छ्रत्रयंवादशस
हस्रंगायत्रीचजप्त्वाकुमारेणापिकामचारकामवादकौभक्षणादिदोषापनोदार्थंकृच्छ्र

यंकारयित्वास्वस्तिवाचनांकुरार्पणग्रहयज्ञनांदीश्राद्धानिसंकल्प्य पूर्वकंकृत्वामंडपप्र
तिष्ठांकुर्यात्॥तत्रसंकल्पः॥अस्यकुमारस्योपनयनेग्रहानुकूल्य सिद्ध्द्वाराश्रीपर
मेश्वरप्रीत्यर्थंग्रहयज्ञंकरिष्ये॥ग्रहयज्ञंसमाप्यास्यकुमारस्यद्विजत्वसिध्यावेदाध्ययना
धिकारार्थंब्रह्मउपनयनंकरिष्ये॥तदंगभूतमघगणपतिपूजनपूर्वकंस्वस्तिवाचनपूर्वक
नांदीश्राद्धंमंडपप्रतिष्ठांकुंदेवतादिस्थापनंचकरिष्ये॥उपनयनेनसहचौलकरणपक्षेनद
पिसंकल्पेकीर्त्तयेत्॥तत्रैषास्वस्तिवाचनग्रहयज्ञनांदीश्राद्धादीनिकुर्यात्॥अथापरेद्युः॥
कृतनित्यक्रियःकृतमंगलस्नानमलंकृतंकुमारमुक्तस्वस्त्ययनंकृतकौतुकबंधंभोजयित्वा
देशकालौसंकीर्त्यअस्यकुमारस्योपनयनंकर्तुंतत्राऽंगभूतंवापनादिकरिष्ये॥इतिसंक
ल्प्यकृतवापनंस्नापितंबद्धशिखंकुमारंमोदूर्तिकोक्तेशुभमुहूर्त्तेस्वसमीपमानीयतन्मुखं

सम्यगीक्षेत॥ततस्तंस्वदक्षिणतउपवेश्यउपलेपनाद्यग्निप्रतिष्ठापनांतंकृत्वासमिद्वय
मादायेत्थादिसमुच्चार्यास्यकुमारस्यद्विजत्वसिध्यर्थंक्रियमाणेउपनयनहोमेदेव
तापरिग्रहार्थमन्वाधानंकरिष्ये॥अस्मिन्नन्वाहितेग्नावित्याद्याघारावाज्येनेत्यंतमुक्त्वा
व्याहृतिभिरग्नावाधायपरिसमूहनाद्याज्यसंस्कारांतंकृत्वाचार्योऽग्नेःपश्चादवस्थायकु
मारंप्राङ्मुखमवस्थाप्यकोपीनार्थंत्रिवृतंकार्पाससूत्रंकटौबध्वाकोपीनंपरिधाप्यद्विजो वा
यज्ञोपवीत्युत्तरीयप्रतिनिधिभूतमहतंशुक्लंवासःसमंत्रंपरिधाप्यान्येनकाषायवाससासंवेष्ट
यावारयेत्॥तत्रमंत्रः॥युवंवस्त्राणीत्यस्यौचथ्योदीर्घतमामित्रावरुणोत्रिष्टुप्॥वासो
धारणेविनियोगः॥प्रावरणार्थंकृष्णाजिनंवा॥तत्र॥त्र्यंगुलंतुबहिर्लोमयद्वास्याच्चतुरंगु
लं॥अजिनंधारयेद्विप्रश्चतुर्विंशाष्टषोडशोः॥मित्रस्यचक्षुरित्यस्यवामदेवोजिनंत्रिष्टुप्॥
अजिनधारणेविनियोगः॥ॐमित्रस्यचक्षुर्धरुणंबलीयस्तेजोयशस्वीस्थविरंसमिद्धं॥ ९७

अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनंदधेहं॥ततोद्विजत्वसिद्ध्यर्थंयज्ञोपवीतं
दद्यात्॥यज्ञोपवीतमित्यस्यपरब्रह्मपरमात्मात्रिष्टुप्॥श्रौतस्मार्तकर्मानुष्ठानसिध्य
र्थंयज्ञोपवीतधारणेविनियोगः॥ॐयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्ता
त्॥आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः॥इतिमंत्रंवाचयित्वातद्दक्षि
णबाहुमुद्धृत्यउपवीतंधारयित्वाकुमारमात्मनोग्नेश्चमध्येनयज्ञपात्रोत्तरभागंगमयि
त्वातत्रविधिवदाचम्यपुनस्तथैवानीयस्वदक्षिणेउपवेश्यबर्हिरास्तरणादिस्रुवसंमार्ज
नांतंकृत्वाब्रह्मचार्यन्वारब्धइध्माधानाद्याघारांतमाज्यभागवर्जंकुर्यात्॥ततःअग्नअ
यूंषीतितिसृणांशांतवैखानसाऋषयःअग्निःपवमानोदेवतागायत्रीछंदः॥उपनयन
प्रधानाज्यहोमेवि०॥ॐअग्नआयूंषिपवसआसुवोर्जमिषंचनः॥आरेबाधस्वदुच्छुनांस्वा

म

हो अग्नये पवमानाय इदं न मम इति त्यागः॥ एवमग्नेपि॥ ओं अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः॥ तमीमहे महागयं स्वाहा॥२॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं॥ दधद्रयिं मयि पोषं स्वाहा॥३॥ प्रजापत इत्यस्य हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ घृतेनाज्यहोमे विनियोगः॥ ओं प्रजापतेन त्वदे०॥ स्वाहा प्रजापत इदं०॥ अथाचार्योत्तरतोग्नेः प्राङ्मुख स्तिष्ठेत्॥ कुमारोप्यग्न्याचार्ययोर्मध्येनगत्वाचार्यस्याभिमुख स्तिष्ठेत्॥ अथाचार्यः संयतात्मा कुमारस्य शुचित्व सिद्धयेसवितृदेवतात्मनयेचांजलिक्षारणं कुर्यात्॥ तच्चेत्थं॥ शुद्धोदकेनञ्जलिमापूर्य तस्यांजलिमन्येन पूरयित्वा॥ तत्सवितुरित्यस्यश्यावाश्वः सवितानुष्टुप्॥ अवक्षारणे विनियोगः॥ ओं तत्सवितुर्वृणीमहे वयं देवस्य भोजनं॥ श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि॥ अनेन स्वांजल्युदकं शिष्यांजलाववक्षार्य तञ्जलं कुमारांजलिनेवावक्षारं

येत्॥ ततः शिष्यत्वसिध्यर्थं बटोर्दक्षिणं गृह्णीयात्॥ तत्रमंत्रः॥ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णो हस्ताभ्यां हस्तं गृह्णामीति यजुरनेन मुकुन्नामानमिति कुमारस्याभिवादनं कृत्वा नामशब्दमंतं संबुध्यानिर्दिश्य दक्षिणेन पाणिना कुमारस्य सांगुष्ठं दक्षिणपाणिं गृहीत्वापुनरपि पूर्ववदुदकपूरणादि कृत्वा सवित्रानेन हस्तमग्रभादिति मंत्रांतेपूर्ववद्बटुनामोक्त्वा हस्तं गृहीत्वापुनरपि पूर्ववत्पूरयित्वाग्निराचार्यस्तवेति मंत्रांतेपूर्ववन्नाम निर्दिश्य हस्तं गृह्णीयात्॥ अथाचार्योब्रह्मचारिणासहनिष्क्रम्य देवसवितरेषतेब्रह्मचारीतं गोपायस्व मामृतेत्यनेनाचार्यसंरक्षणार्थं व्रतपतयेआदित्यायबटुं ददामीतिमनसास्मरन्ब्रह्मचारिणमादित्यमीक्षयेत्॥ ततउभावपि पूर्ववदुत्तरतोग्नेरन्योन्याभिमुखौतिष्ठेतां॥ अथाचार्यः॥ कस्यब्रह्मचार्यसिब्रह्मचार्यसि॥ कस्त्वाकमुपनयतेकायत्वापरिददामीतिमंत्रेज

पन्कुमारं प्रजापतयेरक्षणार्थमनसासमर्प्य॥युवासुवासाइत्यस्य कौत्सिकोविश्वामित्रो
यूपस्त्रिष्टुप्॥पूर्वार्धर्चस्य प्रदक्षिणावर्त्तनेउत्तरार्धर्चस्य पाणिभ्यांबद्वोर्हृदयालंभनेवि०।
ॐयुवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानइत्यर्धर्चमुच्चार्यनूबद्धं प्रद २
क्षिणमावर्त्यप्राङ्मुखमवस्थापयेत्॥ततःकुमारंसयोरुपरिस्वपाणीगमयित्वा॥ॐत
धीरासःकवयुञ्जन्तीत्यर्धर्चोऽनुमन्तासेवयंतइत्युत्तरार्द्धमुच्चार्यतद्धृदयप्रदेशंसकृ २
त्पाणिभ्यांस्पृशेत्॥ततआचार्यआत्मानमग्निंचांतरेणबद्धंनीत्वाप्रत्यङ्निःस्वयमुपवि ग
श्यस्वस्यदक्षिणतःप्राङ्मुखंतमुपवेशयेत्॥ततोबद्धस्यपरिसमूहनपर्युक्षणेकृत्वा
वृत्तिकारमंतेत्वकृत्वा॥अग्नयेसमिधमित्यस्यहिरण्यगर्भोग्निस्त्रिष्टुप्॥समिदाधा
नेवि०॥ॐअग्नयेसमिधमाहार्षंबृहतेजातवेदसे॥तथात्वमग्नेवर्धस्वसमिधाब्रह्म ९१

य

णावृयंस्वाहेतिसमिधमादायाग्नेइदंनममेत्युदगात्यागेकृत्वापाणिंप्रक्षाल्याग्निंस्पृष्ट्वा
तेजसामासमनज्मीतिसंवृत्तोष्टहूयंमुखमवाङ्मृज्यपाणिंप्रक्षाल्यपुनरग्निंस्पृष्ट्वामंत्रेण
तथैवमुखंनिमृज्यपाणिभ्यांप्रक्षाल्याग्निंस्पृष्ट्वामंत्रेणतथैवमुखंनिमृज्यपाणिंप्रक्षालयेत्॥
ततस्तिष्ठन्॥प्रणतिमुद्रांकृत्वामयिमेधामितिषंणांहिरण्यगर्भऋषिः॥त्रयोवर्षांत्रयाणांअग्नी
द्रसूर्यादेवताःउत्तरत्रयाणामग्निर्देवतागायत्रीछंदःअग्न्युपस्थानेविनियोगः॥ॐमयिमेधा
मयिप्रज्ञांमय्यग्निस्तेजोदधातु॥मयिमेधांमयिप्रज्ञांमयीद्रइंद्रियंदधातु॥मयिमेधांमयि
प्रज्ञांमयिसूर्योभ्राजोदधातु॥यत्तेअग्नेतेजस्तेनाहंतेजस्वीभूयासं॥यत्तेअग्नेवर्चस्तेनाहं
वर्चस्वीभूयासं॥यत्तेअग्नेहरस्तेनाहंहरस्वीभूयासंइतिषण्मंत्रैरग्निमुपस्थाय॥मानस्तो
कइत्यस्यकुत्सोरुद्रोजगतीविभूतियहणेविनियोगः॥ॐमानस्तोकेतनयेमानआयोमा

१००

नोगोषुमानोअश्वेषुरीरिषः॥वीरान्मानोरुद्रभामितोवधीर्हविष्मंतः सदमित्त्वादवामहे॥
इत्यनेनभस्मादाययथाचारंत्र्यायुषंजमदग्नेरितिललाटे॥कश्यपस्यत्र्यायुषमितिकंठे॥
अगस्त्यस्यत्र्यायुषमितिनाभ्यां॥यद्देवानांत्र्यायुषमितिदक्षिणस्कंधे॥तन्मेअस्तुत्र्यायुष
मितिवामस्कंधे॥तन्तायुषमितिशिरसि॥भस्मधारयेत्॥पुनःपरिसमूह्नपर्युक्षणेकृ
त्वाकृतांजलिस्तिष्ठन्नोंचमेस्वरश्चमेयज्ञोपचेतनमश्च॥यत्तेन्यूनंतस्मैतउपयत्तेतिरिक्तं
स्मैतेनमः॥अग्नयेनमः॥स्वस्तिप्रज्ञांमेधां यज्ञःप्रज्ञांविद्यांबुद्धिंश्रियंबलं आयुष्यं
तेजआरोग्यंदेहिमेहव्यवाहनोन्नमदग्निमुपस्थायअग्नेरुत्तरतोगत्वाप्रत्यङ्मुखीभूया
चार्यमिमुखोभूत्वादक्षिणंजानुंभूतलेनिधायपाणिभ्यांयथासव्यदक्षिणश्रोत्रंसंस्पृश्य
व्यस्तपाणिराचार्यस्यदक्षिणपादं स्वदक्षिणहस्तेनसव्यंचसव्यहस्तेनजा १००

नुप्रभृतिपादपर्यंतंस्पृष्ट्वामुकगोत्रोमुकनामाहंभोअभिवादयेइत्युच्चारयन्शिरोवनतिपूर्व
कमभिवाद्यआचार्येणायुष्मान्भवसौम्यदेवदत्तेतिप्रत्युक्ताशीर्वादोविनयावनतोभूत्वासा
वित्र्युपदेशंवांछन्नधीहिभोःसावित्रीमोअनुब्रूहीत्याचार्यंप्रत्युक्तावामपाणिमुत्तानीकृत्य
दक्षिणपाणिंन्यङ्मुखीकृत्यसंधायपाणिपृष्ठमंगुलीश्चांगुष्ठौचदृढीकृत्यकृतंब्रह्मांजलिंद
क्षिणंकेनिक्षिप्याचार्योतिकआसीत॥अथाचार्यस्तदंजलिंतत्परिधानीयवाससाआछाद्य
स्वपाणिभ्यांतदंजलिंपरिगृह्यप्रणवव्याहृतिपूर्वकंसावित्रीप्रथमंपादशःस्वयमुक्त्वावाचये
त्॥ततोऽर्धर्चशस्ततःसर्वांएवंग्रहणशक्तौयथाशक्तिस्वयमुक्त्वावाचयेत्॥तद्यथा॥प्रणवस्य
परब्रह्मऋषिःपरमात्मादेवतादेवीगायत्रीछंदः॥व्याहृतिमंत्रस्यप्रजापतिःप्रजापतिर्दे
वी॥गायत्र्याविश्वामित्रःसवितागायत्रीउपनयनेविनियोगः॥गायत्रीवाचयित्वा॥ततःममब्र

१०१.

तद्ब्रह्मेतिमंत्रस्यप्रजापतिर्ऋषिःबृहस्पतिर्देवतात्रिष्टुप्छंदःवटोर्हृदयेऊर्ध्वांगुलिपाणिनिधा
नेविनियोगः॥ॐममव्रतेहृदयंतेदधामिममचित्तमनुचित्तंतेअस्तु॥ममवाचमेकव्रतोजुष
स्वबृहस्पतिष्ट्वानियुनक्तुमह्यमितिस्वपाणिमूर्ध्वांगुलिंब्रह्मचारिणोहृदयदेशेनिधायतस्य
क्षार्थंशुद्ध्यर्थंचमेखलामाबध्नीयात्॥इयंदुरुक्तादितिद्वयोर्वामदेवोमेखलात्रिष्टुप्॥मेख
लाबंधनेविनियोगः॥ॐइयंदुरुक्तात्परिबाधमानाःशर्मवरूथंपुनतीनआगात्॥प्राणापाना
भ्यांबलमाभरंतीप्रियादेवानांसुभगामेरयंलेयं॥ऋतस्यगोपावितपंसस्पर्स्योघृतीरक्षःसहमा
नाअरातीः॥सानःसमंतमनुपरेहिभद्रयाभर्नारस्तेमेखलेमारिषामेतिवाचयित्वामेखलांत्रि
रावर्त्यनाभिप्रदेशेग्रंथित्रयंकुर्यात्॥तदाबटुःरहस्योगसहितंवेदत्रयेणावृतोहमितिमन्येत॥
तत्तद्धर्मस्ययोगक्षेमार्थम्[illegible]धर्मनिवृत्तयेचकेन्द्रासंमितंपालाशंदंडंदद्यात्॥स्वस्तिन १०१

इत्यस्यस्यस्यात्रेयोविश्वेदेवास्त्रिष्टुप्॥दंडदानेवि०॥ॐस्वस्तिनोमिमीतामुश्विनाभगः
स्वस्तिदेव्यदितिरर्वणः॥स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना॥ततोबटो
स्तद्ग्रहणेमंत्रं॥अदांतंदमयित्वामांमागेसंस्थापयन्त्वयं॥दंडःकरेस्थितोयस्मात्तस्माद्रक्षय
तोभयमितिवाचयेत्॥ततःकुमारस्याचारमादिशेत्॥ब्रह्मचार्यसिआचमनंकुरुमूत्रपुरी
षादौशुध्यर्थमित्यर्थः॥कर्मकुरुसंध्योपासनादीत्यर्थः॥दिवामास्वापीःआचार्याधीनोभव
वेदमधीष्वसायंप्रातर्भिक्षेथाः॥सायंप्रातःसमिधमाधेहिद्वादशवर्षाणिवेदग्रहणांतंब्र वा
ह्मचर्यंचरेतिशेषार्थान्बोधयेत्॥ततःस्विष्टादिहोमशेषंसमाप्याग्निंमेधाजननांतंरक्षेत्॥
तत्रैवसायंप्रातरग्निकार्यंकुर्यात्॥ततोनुप्रवचनीयहोमब्राह्मणभोजनपर्यंतंतंडुलरूपं
भिक्षांयाचेत॥तत्रक्रमः॥भिक्षापात्रमादायादोमातरंभवतीभिक्षांददात्विति॥अथवापितरं॥

भवान्भिक्षांददात्विति॥एवंमातुःस्वसारंस्वभगिनीमन्यानपिबांधवानश्रत्याख्यायिनोश्रत्याख्यापिनीश्चयाचित्वाभैक्षमाचार्यायनिवेद्यमध्याह्नसंध्यांकुर्यादितिप्रयोगपारिजाते॥नेक्षिरुच्छभट्टीकारः॥ब्राह्मणान्त्रिषांग्रहणं॥द्वौत्रीनेवावि ब्राउपनयनेभोज्याः॥ततोगुरुसन्निधावचपलस्तिष्ठन्नहः शेषंनीत्वासायंवंदितसंध्यऔपासनायनिकाग्नेरंतिकआसीनःप्राणानायम्यसायमग्निकार्यंकरिष्यइतिसंकल्प्यपरिसमुह्यपर्युक्ष्यपूर्ववत्समिधमाधायत्रिर्मुखंपूर्ववदवमृज्यउत्रूषण्मंत्रैरुपस्थायमानस्तोकइतिभस्मादायन्यायुषमितितन्नत्थानेषुपूर्ववद्धुत्वापुनःपरिसमूहनपर्युक्षणेकृत्वाकृतांजलिस्तिष्ठन्नोंचमइत्यपतिष्ठेत॥अथाचार्यास्तमितेग्नेःपश्चात्त्वासीनःप्राणानायम्यब्रह्मचारिणंदक्षिणतउपवेश्यतिथ्यादिसंकीर्त्यउपनयनांगभूतंअनुप्रवचनीयहोमंकरिष्यइतिसंकल्प्यअद्यकरिष्यमाणेऽनुप्रवचनीय १०२

होमेदेवतापरियद्दार्थमन्वाधानंकरिष्येअस्मिन्नन्वाहितेग्नावित्यादिआधारावाज्येनेत्यंतमुक्त्वासदसस्पतिंसवितारंरुषानूइतिप्रधानदेवताश्चरुद्रव्येणत्रोषणस्विष्टकृतमित्यादिसंयक्ष्यइत्यंतमुक्त्वाभूर्भुवःस्वःस्वाहेतिद्वेसमिधोहुत्वापरिसमूहनादिप्रणीताप्रणयनांतंकृत्वातद्भिक्षाद्व्यंचतुरश्चतुरोमुष्टीन्भूलीदेवतात्रयस्यविप्रत्रयभोजनस्यचपर्याप्तंनिरूप्यतूष्णीम्प्रोक्ष्यत्रिःफलीकृत्यत्रिःप्रक्षाल्यश्रपयित्वाभृतःस्थालीपाकइत्याचार्यायनिवेदयेद्भूःबटोरिवं करणाद्भोक्तोतद्भुंधुनान्येनकारयेत्॥ततोब्रह्मचारिणान्वारब्धोगुरुराज्यसंस्कारंचाघारांतंकृत्वाप्रधानहोमंकुर्यात्॥अवदानधर्मणावदाय॥सदसस्पतिमित्यस्यकाण्वोमेधातिथिःसदसस्पतिर्गायत्रीअनुवचनीयप्रधानचरुहोमेविनियोगः॥ॐसदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं॥सनिंमेधामयासिषंस्वाहासदसस्पतये॥तत्सवितुरित्यस्यगाथिनोविश्वामित्रःसविताग्नायत्रीविनियोगउक्तवत्॥तत्सवितुर्वरेण्यं॥स्वाहासवित्रे॥ऋषिभ्यःस्वाहाऽऋषिभ्यइदं॥एवंत्रिभिर्मन्त्रै

स

१०३ र्ङ्कृत्वास्विष्टकृदादिहोमत्रोषंसमाप्यतदवशिष्टान्नेनन्यूनानब्राह्मणान्भोजयित्वातैर्वेदस
मा शिर्वाचयीतानतोब्रह्मचारीअक्षारालवणमश्नंभुञ्जीथाःत्रयीत॥मेधाजननंयावदेव
न मेवगुरुंप्रसादयन्ववर्त्तेतयदागर्जैद्यनध्यायत्रोकालदादिवैचचरुंश्रपयेत्॥होमंसायंसंध्योत्तर
मेवकुर्यात्॥तदानानध्यायदोषः॥॥तदुक्तंसंग्रहे॥नसंध्यागर्जितेकालेनदृष्ट्युत्पातदूषिते॥
ब्रह्मौदनंपचेद्यत्रोपकंचेन्ननिवर्त्तते॥तथा॥ब्रह्मौदनंपचेद्यत्रिपक्वमन्नंनदुष्यति॥तथा
चोपनयनानुप्रवचनीयचरुश्रपणयोरंतरानध्यायेनरुपनयनंएषप्रयोगः स्वस्वकालस्य
पूर्वसंस्कारस्य॥असंस्कृतस्यतुविशेषउच्यते॥आचार्योपनयनात्पूर्वदिनेवटुनासहमं
गलस्नातःप्राणानायम्यतिथ्यादिसंकीर्त्यमकुमारस्यगर्भाधानपुंसवनसीमंतविष्णुब
लि जातकर्मनामकरणनिष्क्रमणान्नप्राशनचौलकर्मतानांनवसंस्कारणांकालोपपत्तिदो १०३
ति

षप्रायश्चित्तद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रायश्चित्तहोमंकरिष्यइतिसंकल्योपलेपनादिपू
र्वंपात्रनिधानांतंकृत्वाविधिवदाज्यंसंस्कृत्याघारांतंकृत्वाऽनीतकर्मसंख्यया॥ॐभूर्भुवः
स्वःस्वाहेत्याज्याहुतीर्हुत्वास्विष्टकृदादिहोमत्रोषंसमाप्यचौलातिरिक्तसंस्काराणां प्रमाद
र दकरणेप्रत्येकंपादकृच्छ्रंचौलाकैर्णेर्द्धकृच्छ्रंबुद्धिपूर्वेचौलातिरिक्ताकरणेप्रत्येकमर्द्धकृच्छ्रं
चौलाकरणेकृच्छ्रंवटुनाकारयेत्॥अत्राक्तोतत्सत्यात्मायतेनगोदानतिलाहुतिसहस्रदश
सहस्रगायत्रीजपद्वादशब्राह्मणभोजनादिद्वेकंप्रायश्चित्तंकारयित्वाऽतीतानिजातक
र्मादीनिकृत्वापूर्वोक्तप्रकारेणोपनयनतंत्रंसर्वमाचरेत्॥उपनयेनसहचौलकरणेपूर्वेद्युः
संस्कारद्वयंसंकीर्त्ययुगपत्स्वस्तिवाचनयज्ञोपवीतादीश्राद्धानिकृत्वापरेद्युर्मंगलस्नानादि
ब्रीह्यादिपात्रचतुष्टयदानांतंपूर्वोक्तचौलप्रयोगंसर्वंकृत्वापुनस्तिथ्यादिसंकीर्त्योपनयम

होमाद्यनुप्रवचनीयहोमांतंसर्वंकार्यं॥ ॥इतिश्रीभट्टरामेश्वरसुतनारायणभट्टकृतेप्र
योगरत्नेउपनयनप्रयोगः॥ ॥अथमेधाजननप्रयोगः॥ ॥आयुक्तक्रमेणाचरितव्रतस्यब्र न
ह्मचारिणोमेधासिध्यर्थंआचार्यश्चतुर्थदिवसेमेधाजननाख्यंकर्मकुर्यात्॥तत्रायंक्रमः॥
प्रत्यक्षायद्युदक्प्रागुदक्पूर्वान्यतमस्यांदिशिन्यग्रोधवर्जितंपलाशांतदभावेसन्यग्रोधंवा
तदभावेकुत्रास्तंबंवातदसंभवेस्वगृहेऽग्न्यादिभागेसर्वतोद्वादशांगुलांत्रिमेखलांवेदि
कृत्वातस्यांपत्राकुरसमन्वितामार्द्रांपलाशन्यग्रोधसम्मूलंकुत्रास्तंबंवाप्रतिष्ठाप्यब्रह्मचा
रिणान्वारब्धःसंकल्पपूर्वकंपूजांकुर्यात्॥तत्रक्रमः॥तिथ्यादिसंकीर्त्यममकुमारस्योप न
यनव्रतसमाप्तिवेदग्रहणसामर्थ्यलक्षणमेधासिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंमेधाजन
नाख्यंकर्मकरिष्ये॥इतिसंकल्प्यशौनकमतेपुण्याहवाचनमपिकृत्वामेधाजननकर्मणिपू १०४

वोक्तिफलसिध्यर्थंमेधांपरनामकसावित्रीपूजांकरिष्यइतिसंकल्प्यपलाशन्यग्रोधयोमे
धायैनमइतिनाममंत्रेणावाहनाद्युपचारान्कृत्वा सक्तुमोदकमिश्रमन्नंनिवेद्यपूर्ववद
भ्यर्च्यब्रह्मचारिणाप्रणम्यभुङ्जलपात्रोदकेनसेचनंकुर्वताबटुनात्रिःप्रदक्षिणांकारय
न्मंत्रंवाचयेत्॥प्रणामयेच्च॥ॐसुश्रवःसुश्रवाअसियथात्वंसुश्रवःसुश्रवाअस्येवंमांसुश्र
वःसौश्रवसंकुरु॥यथात्वंदेवानांयज्ञस्यनिधिपोस्येवमहंमनुष्याणांवेदस्यनिधिपोभूयास
मिति॥प्रतिप्रदक्षिणंमंत्रावृत्तिः॥प्रणामंचएवमेवकारयेत्॥ततोब्रह्मचारीस्नात्वानवान्य
ज्ञोपवीताजिनमेखलादंडानुपनयनवत्समंत्रंधृत्वापुराणानिपलाशसन्निधोविसृज्यपूर्व
धृतवाससीगुरवेदत्वामेधामद्यमितिसूक्तंविप्रैःपाठयित्वाविधिवत्स्वस्तिवाचनंकृत्वाब्राह्म
णेभ्योदक्षिणांयथाशक्तिदत्वातान्भोजयित्वातान्नमस्कृत्यात्रिपोगृह्णीयात्॥अथमेधांमद्य

मितिसूक्तं॥मेधामद्युमंगिरसोमेधांसप्तऋषयोददुः॥मेधामिंद्रश्चाग्निश्चमेधांधातादद
तुते॥मेधांमेवरुणोराजामेधांदेवीसरस्वती॥मेधांमेअश्विनौदेवावाधत्तांपुष्करस्रजा॥यां मे
धांअप्सरःसुगंधर्वेषुचयन्मनः॥दैव्यामानुषीमेधासामायाविनाताडुमां॥यन्मे नोक्तंवा
मनोवाकेयंयदनुब्रुवे॥निन्नामतंनिन्नाम यु मयिश्रुतंसह वृतेनभूयासंब्रह्मणा सं
गेमेमहि॥वाशीरमोविचक्षणंवाज्मेमधुमद्धवां॥अदृष्टमहमुसौसूर्योब्रह्मणानीस्थे
ऋतंमे माग्रहासीः॥मेधांदेवीमनसारेजमानांगंधर्वजुष्टांप्रतिनोजुषस्व॥मह्यंमेधांवद
मह्यंश्रियंवदमेधावीभूयासमृजरोजरिष्णुः॥सदेसुस्पतिमहुतंप्रियमिंद्रस्यकाम्यं॥
सनिंमेधामयासिषंॐमेधांदेवगणाःपितरश्चोपासते॥तयामामद्यमेधयाग्नेमे
धाविनंकरः॥मेधाव्यृहंसुमनाःसुप्रतीकःश्रद्धामनाःसत्यनृतःसुरोवः॥मह्यग्ना १०५

धारयिष्णुरवृक्काभूयासमुर्यस्वधयाप्रयोगे॥ ॥इतिश्रीप्रयोगरत्नेमेधाजननांतउपन
र्थप्रयोगः॥ ॥अथमहानाम्यादिव्रतानि॥तत्रआद्यंनावत् जन्मप्रभृतित्रयोदशवर्ष
उक्तोदगयनादिकालेमहानाम्नीव्रतंकार्यं॥पूर्वेद्युराचार्यब्रह्मचारिणासहसुस्नातःस्व
तनित्यक्रियःप्राणानायम्यतिथ्यादिसंकीर्त्यमंब्रह्मचारिणंमहानाम्नीरध्यापयिष्यंस्त
दादौमहानाम्नीव्रतसिद्ध्यर्थंश्रीपरमेश्वरप्रीतयेहोमंकरिष्यंस्तदंगतयास्वस्तिवाच
नांकुर्यात्पर्णयज्ञाभ्युदयिकश्राद्धानिकरिष्यइतिसंकल्पपूर्वोक्तवस्त्रानिकृत्वापरेद्यु
र्ब्रह्मचारिणावपनस्नानेकारयित्वाबद्धशिखंतंसमुहूर्तेस्वस्यदक्षिणतउपवेश्यविधि
वत्कौतुकमाबध्यसंकल्पपूर्वकंउपलेपनाद्यग्निप्रतिष्ठापनांतंकर्मकृत्वासमिद्वयमाद
यतिथ्यादिसंकीर्त्यास्यब्रह्मचारिणोमहानाम्नीव्रतांगभूतंहोमंकर्तुंदेवतापरियेहाथी

मन्वाधानंकरिष्ये॥अस्मिन्नन्वाहितेग्नावित्याद्याघारावाज्येनेत्यंतमुक्त्वाग्निंपवमा
नंप्रजापतिंचाज्येनद्योषेणास्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वाव्याहृतिरग्नावा भि
धायोदेशत्यागंकृत्वापरिसमूहनाद्याज्यसंस्कारांतंकृत्वाथाचार्यउत्थायाग्नेःपश्चादव
स्थायब्रह्मचारिणंप्राङ्मुखमवस्थाप्यकौपीनार्थं त्रिवृतंकार्पासंसूत्रमाबध्यकौपीनंधा
रयित्वायुवंवस्त्राणीतिमंत्रावृत्याऽहतंवासःपरिधाप्यान्येनकाषायवस्त्रेणप्रावृणुयात्॥
ततोयज्ञोपवीतंसमंत्रंधारयित्वात्मात्मन्यार्मध्येनयज्ञपात्रोत्तरभागंगमयित्वात्रविं
धिवदाचम्यतथेवानीयोपवेश्यबर्हिष्याज्यासादनांतंकृत्वाब्रह्मचारिणादक्षिणहस्तेनस्पृ
ष्टःसन्नाघारांतंकृत्वाज्यभागवर्जमग्नआयूंषीत्यादिभिश्चतुर्भिश्चतस्रआज्याहुतीर्जुहु
यात्॥अग्नआयूंषीतितिसृणांस्रातंवैखानसाग्निःपवमानोगायत्री॥प्रधानाज्यहोमेवि० १०६

ॐअग्नआयूंषि०ॐअग्निर्ऋषिः०ॐअग्नेपवस्वस्वपा०अग्नयेपवमानायेदंनम
मेतिसर्वत्रत्यागः॥प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्प्रधानाज्यहोमेवि०ॐप्रजा
पतेनत्वदेता०प्रजापतयइदं०ततआचार्यउत्तरतोग्नेःप्राङ्मुखोब्रह्मचारीचाचार्यमा
र्मध्येनगत्वाआचार्यस्यपुरोभिमुखस्तिष्ठेत्॥ततआचार्यःसंयतःसूर्यात्मासंस्तस्यशुचि
त्वसिद्ध्येसवित्रेदेवतात्रयेचांजलिक्षारणंकुर्यात्॥तत्रक्रमः॥जलपात्रोदकेनत्रिर्पू
जलिमापूर्यस्वस्यांजलिमन्येनपूरयित्वा॥तत्सवितुर्वृणीमहइत्यस्यश्यावाश्वःसवितानु
ष्टुप्अंजलिक्षारणेविनियो०ॐतत्सवितुर्वृणीमहे०ऋक्॥इतिस्वांजलिस्थोदकंत्रिर्ध्यांज
लावासिच्यतज्जलंबयेरंजलिनैवावक्षारयेत्॥ततआचार्योबटोर्हस्तंगृह्णीयात्॥तत्रमंत्रः॥
देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यमुकशर्मन्नितिबटो

राभिवादनिकं नाम ग्रामीतं संबुध्यामंत्रांते निर्दिश्य दक्षिणपाणिना सांगुष्ठं बटोर्दक्षि
णपाणिं गृहीत्वापुनरपि पूर्ववदुदकपूरणादि कृत्वासुव्रतांतेहस्तमग्रभीदिति मंत्रांते पू
र्ववन्नामनिर्दिश्यहस्तं गृहीत्वापुनरपि पूर्ववत्पूरयित्वाग्निराचार्यस्तवेतिमंत्रांते पूर्ववन्
नामनिर्दिश्यहस्तं गृह्णीयात्॥ततोबटुंरक्षणार्थंव्रतपतयेआदित्याय बटुंददामीति
मनसास्मरेद्यात्॥तत्रमंत्रः॥बटुनासह निष्क्रम्य॥देवसवितरेषतेब्रह्मचारीतंगोपायस्व
मामृतेभ्युच्चार्यतमादित्यमीक्षयेत्॥ततउभावप्युत्तरतोग्नेः पूर्ववदन्योन्याभिमुखौनिवि
शतां॥अथाचार्यः॥कस्यब्रह्मचार्यसिप्रापास्यब्रह्मचार्यसि॥कस्त्वाकमुपनयतेकायत्वा
परिददामीतिमंत्रंजपन्प्रजापतयेरक्षणार्थंबटुंमनसासमर्प्यपूर्ववदुपविश्यइयंदुरुक्तै
तिमंत्रेणमेखलामाबध्य॥अदांतंदमयित्वामांमार्गेसंस्थापयन्त्स्वयं॥दंडःकरेस्थितो १०७

यस्मात्तस्माद्व्रतयतोभयमितिदंडंप्रदायपुराणानियज्ञोपवीतादीनिजलेनिक्षिप्य
स्विष्टकृदादिहोमशेषंसमापयेत्॥अथगुरुणामहानाम्नीव्रतंचरेतिब्रह्मचारीप्रेषि
तश्चरिष्यामीतिउक्तासंवत्सरपर्यंतंकेशश्मश्रुलोमनखधारणभिक्षाचरणादिव्र
तंपूर्ववच्चरेत्॥पूर्णेवर्षेउदगयनेशुक्लपक्षेबटुर्गुरोर्महानाम्नीःश्रोष्यन्नयामाद्धिवि
विक्तंशुचिदेशंदेवालयादिगत्वेत्॥तत्रगुरुस्तिथ्यादिसंकीर्त्यास्यब्रह्मचारिणोमहाना
म्नीश्रवणांगभूतव्रतसंपूर्त्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनिदंगहोमंकर्तुमुपलेपादिकं
करिष्यइतिसंकल्प्यस्थंडिलोल्लेखनाद्यग्निप्रतिष्ठापनांतंकर्मकृत्वापुनस्तिथ्यादिसं
कीर्त्यास्मिन्होमेदेवतापरिग्रहार्थमन्वाधानंकरिष्यइत्यादिचक्षुषीआज्येनेत्यंतमुक्त्वा
अग्निंसंराधनोअग्निमसूयंतोअनुमतिंप्रदातारंअग्निंवायुंसूर्यंरुसरान्नद्रव्येणग्रे

विष्टकृतमित्यादि सद्योयक्ष्य इत्यन्वाधायपरिसमूहनादि पूर्णपात्रनिधानांतंकुर्यात्॥ततोबटुस्थालीपाकविधानेनहोमायात्मनोभोजनायचपर्याप्तांस्तंडुलान्नवभ्योदेवताभ्यस्तूष्णींनिरूप्यनथैवप्रोक्ष्यमहानाम्नीदेवताप्रीत्यर्थंनवनितलान्त्राक्षिप्यश्रपयित्वाचार्यायशृतःस्थालीपाकइतिविज्ञापयेत्॥ततआचार्योब्रह्मचारिणंव्रतलोपान्पृच्छतेनव्रतलोपेउक्तेतस्यगोरवलाघवेंचार्यआचार्योगुरुश्चेदत्रोक्तप्रायश्चित्तंकारयित्वापुनःसंवत्सरंव्रतमादिशेत्॥लघुश्चेत्प्रायश्चित्तमेवकारयित्वाशुद्धेनतेनान्वारब्धआज्यसंस्काराद्याज्यभागांतंकृत्वाःवदानधर्मेणचरुमवदायाग्नावग्निरित्यादिभिरेकऋत्योक्तैःषण्मंत्रैर्व्यस्ताभिर्व्याहृतिभिश्चनवाहुतीर्जुहुयात्॥तेचमंत्राः॥अग्नावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअधिराजएषः॥तस्मैजुहोमिहविषाघृतेनुमादेवानांमोमुहऋागधेयं॥१०८॥

मोअस्माकंमेमुहऋागधेयंस्वाहा॥१॥अग्नयइदं॰॥यातिरश्चीनिपद्यतेऽहंविधरणीइति॥तांत्वाघृतस्यधारयायजेसंराधनीमहंस्वाहा॥संराधन्येइदं॰॥२॥यस्मैत्वाकामकामाययजेसमृद्ध्यैजामदे॥तमुस्मभ्यंकामंदत्वाथेदंत्वंघृतंपिबस्वाहा॥अग्नयइदं॰॥३॥अयंनोअग्निर्वरिवःकृणोत्वयंमृधःपुरएतुप्रभिंदन्॥अयंशत्रूंजयतुजर्हृषाणोयंवाजंजयतुवाजसातौस्वाहा॥अग्नयइदं॰॥४॥असूयंत्यैचानुमत्यैस्वाहा॥असूयंत्यैचानुमत्याइदं॰॥५॥प्रदात्रेस्वाहा॥प्रदात्रेइंद्रायेदं॰॥६॥भूःस्वाहाअग्नयइदं॰॥७॥भुवःस्वाहावायवइदं॰॥८॥स्वःस्वाहासूर्यायेदं॰॥९॥एवंनवाहुतीर्हुत्वास्विष्टकृदर्थंस्रुचिचरुमवदायतांबर्हिषिनिधायब्रह्मचारिणंशास्तिएनंस्थालीपाकंसर्वमश्नानेति॥सचसर्वंचरुमश्नीयात्॥आचार्योभुञ्जानंमाचांतंव्रतपतिमादित्यव्रतपूर्नयेऽपतिघ्न

स्वेति प्रेष्येत्॥ततः सः॥त्वं व्रतानां व्रतपतिरसि व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यासमिति आदित्यमुपतिष्ठमानोऽञ्जलिं सिंचेत्॥तदाचार्यस्तेन मंत्रेणाहृतांजलिं बटुमादित्यमुपस्थापयेत्॥ततः अनालोक्यालोकनासंभाष्य संभाष्य निवृ ष
त्तयेबटुनाक्षिसंमीलनंवाग्यमनंचकारयित्वात्रयस्त्रिंशद्देवताप्रीत्यर्थंवेदत्रयमनु
स्मरन्नहतेनवाससाबटोर्मुखंहितंत्रिरोवामकर्णदेशमारभ्यत्रिःप्रदक्षिणंवेष्टयित्वा स
यथातद्वासोनपततितथाबध्वाएकरात्रंत्रिरात्रंवैवंभूतोस्वपन्भवेतिप्रेष्यस्विष्टकृद्
दिहोमशेषंसमापयेत्॥बटुस्त्ववश्यकर्त्तव्यसंध्यावंदनादन्यत्स्नानभोजनाद्यकुर्वाणः
तंकालंनयेत्॥ततःएकरात्रपक्षेद्वितीयदिनेत्रिरात्रपक्षेचतुर्थदिनेग्रामाद्बहिरपराजि
तायांदिशिस्त्रीसंचारशून्येशुचौदेशेअन्योब्रह्मचारीअग्निस्थंडिलादुत्तरतोसमुद १०९

कमंडलुमश्मानंचनिधायतत्स्थगुरुंदेशेमहानाम्न्यसंश्रवणस्थलेपिसंगतानां
योगिनामाश्रयार्थंरम्यारक्तोद्विचषंवित्सतरीतदसंभवेश्वेतांवाबध्वाचार्यायनिवेदये
त्॥ततआचार्यस्तत्स्थंडिलेउपलेपनादिपर्युक्षणांतमग्निप्रतिष्ठापनंचकृत्वातत्पश्चा
त्सागयेषुतृणेघेशानस्थानूदेवानूसंमानयन्निवतदभिमुखउपविशेत्॥ततःस्त्रीष्योवे
ष्टितवस्त्रंकिंचिदपसार्यमुखंप्रक्षाल्यकंठस्नानंकृत्वाचम्याग्निमाचार्यंचप्रदक्षिणीकृ
त्यगुरुमभिवाद्यतस्यैवासनद भंमूलेघेवनैर्ऋतीस्थानूराक्षसान्निरीक्षणोननिर्दे
हंस्तदभिमुखउपविश्यरक्षसामंतरागमननिर्हरणार्थंस्वपृष्ठमाचार्यपृष्ठेनसंधा
यमहानाम्नीर्भिअनुब्रूहीतिमनसागुरुंवदेत्॥ततोगुरुःकालप्रमाणेनतदुक्तिंज्ञात्वा
पुनस्तदहरुत्पन्नव्रतलोपानूपेक्षानुतापिनेश्रद्दधानायबटवेस्वयमक्षिणीसंमील

विदामघवन्नित्याघानवऋचःएवाद्येवेवाद्यश्वाइइत्यादिनवपुरोषदानिचत्रिवारं ५
ब्रूयात्॥शिष्योपित्रिवारंपठेत्॥ततस्तस्यशिरोवेष्टनमुन्मुच्यादित्यमीक्षस्वेतिचदेत॥
ततोबद्वर्मित्रस्यत्वाचक्षुषाप्रतीक्षेमित्रस्यत्वाचक्षुषासमीक्षइतिमंत्रद्वयेनादित्यमवे
क्षेत॥ततोस्यादिसंभारयुनादिशोमित्रस्यवृश्चक्षुषानुवीक्षइतीक्षेत॥पुनरादित्यमी
क्षस्वेत्युक्तेमित्रस्यत्वाचक्षुषाप्रतिपश्यामियोस्मान्द्वेष्टियंचवयंद्विष्मस्तंचक्षुषोहरा
मीतित्यादित्यमीक्षते॥ततोग्नइळेत्याद्यष्टमंत्रैर्भुवमुपस्पृशेत्॥तेच॥ॐअग्नइ
ळानमइळानमृषिभ्योमंत्रकृद्भ्योमंत्रपतिभ्योनमोवोअस्तुदेवेभ्यःशिवानूःशंत
माभवसुभळुकासरस्वतिमातेयोमसुदत्रि॥१॥भद्रंकर्णेभिरित्यस्यराहूगणोगोत
मोविश्वेदेवास्त्रिष्टुप्॥भूम्युपस्पर्शनेविनियोगः॥ॐभद्रंकर्णेभिःशृणुयामदेवाभद्रं ११०

द्रंपश्येमाक्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः॥२॥शं
नइंद्राग्नीतवसिछोविश्वेदेवास्त्रिष्टुप्॥ओंशंनइंद्राग्नीभवतामवोभिःशंनइंद्रावरुणा
रातहव्या॥शमिंद्रासोमासुविताययुर्योःशंनइंद्रोपूषणावाजसातौ॥३॥सुषेजनंसुत्र
तमितिऋजिश्वोविश्वेदेवास्त्रिष्टुप्॥ॐसुषेजनंसुव्रतंनव्यसाभिर्गृणद्भिर्भिष्टावरुणास्यु
न्नयंतो॥नआगमंतुनइहश्रुवंतुसुक्षत्रासोवरुणोमित्रोअग्निः॥४॥कयानश्चित्रइति
तृचस्यवामदेवइंद्रोगायत्री॥ॐकयानश्चित्रआभुवदूतीसदावृधःसखा॥कयाशचि
ष्ठयावृता॥५॥कस्तासत्योमदानांमंहिष्ठोमत्सदंधसः॥दृढाचिदारुजेवसु॥६॥ॐअ
भीषुणःसखीनामविताजरितॄणां॥शतंभवास्यूतिभिः॥७॥स्योनापृथिवीमेधानिथि
र्भूमिर्गायत्री॥भूम्युपस्पर्शनेविनियोगः॥ॐस्योनापृथिविभवानृक्षरानिवेशनी॥य

छोनुः नूर्मसुप्रथः॥८॥ एतैर्मंत्रैर्भूमिंस्पृष्ट्वावत्सतरीगुरवेदत्वानुप्रवच नीयार्थंउपन
यनवत्तंडुलान्भिक्षित्वागुरवेनिवेद्यदिवैवब्रह्मौदनहोमंकुर्यात्॥तत्रक्रमः॥देशकालौ
निर्दिश्यमहानाम्न्यध्ययनांगभूतमनुप्रवचनीयहोमंकरिष्यइतिसंकल्प्योल्लेखनाद्य
ग्निप्रतिष्ठापनांतंकृत्वापुनर्देशकालौनिर्दिश्यानुप्रवचनीयहोमेदेवतापरिग्रह
र्थमन्वाधानंकरिष्यइत्याद्याघारावाज्येनेत्यंतमुक्त्वासदसस्पतिंमहानाम्नीः ऋचीश्च
प्रधानदेवताश्चरुद्व्येणनोषणस्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वासमिद्ध
यमाधायोद्देशत्यागौकृत्वापरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वाभेक्ष्यतंडुलांश्च
तुरश्चतुरोमुष्टीन्तूष्णींदेवतात्रयस्यविप्रद्वयभोजनायचनिरूप्यतथैवप्रोक्ष्यश्रपयि
त्वाश्रितोनुप्रवचनीयइतिगुरवेनिवेदयेत्॥ततःसन्निध्येणान्वारब्धआज्यसंस्कारा द्या ११११

व घारांतंकृत्वाज्यभागवर्जमवदानधर्मेणचरुमेदाय॥सदसस्पतिंकापर्वोमेधातिथिःस
दसस्पतिर्गायत्रीअनुप्रवचनीयप्रधानहोमेविनियोगः॥सदसस्पतिमद्भुतंप्रियमिंद्र
स्यकाम्यं॥सनिंमेधामयासिषंस्वाहा॥सदसस्पतयइदंनइतिप्रथमाहुतिं॥महानाम्नी
भ्यःस्वाहेतिद्वितीयां॥ऋषिभ्यःस्वाहेतितृतीयाहुतीर्हुत्वास्विष्टकृदादिहोमंत्रोषंसमा
प्यकर्मांतेकर्त्तव्यस्वस्तिवाचनंकृत्वाब्राह्मणान्भोजयित्वावेदसमाप्तिरस्त्वितिभवंतोब्रुवं
त्वितितान्वदेत्॥तेपिवेदसमाप्तिरस्त्वितिप्रतिब्रूयुरिति॥ ॥इतिमहानाम्नीव्रतप्र
योगः॥ ॥अथमहाव्रतप्रयोगः॥आचार्यःपूर्ववदुदयनादोस्वस्तिवाचनादिहोम ग
त्रोषसमाप्यंतंमहानाम्नीव्रतवत्कृत्वासंवत्सरंमहाव्रतमाचरेतिवदुंप्रेष्यतेनसंवत्सर
व्रतआचरितेग्रामाद्बहिःशुद्धेदेशेप्रागग्रेषुदर्भेषुप्राङ्मुखउपविश्यसन्निध्येणविधि

वदभिवादनपूर्वकंमहाव्रतंभोअनुब्रूहीतिवचनेनेवोक्तःसंघाड्युरवमुप वेश्याथमहा
व्रतमित्याचारप्यकंत्रिर्ब्रूयात्॥ततःशिष्यस्तथेवत्रिवारमुक्त्वापूर्ववन्मंत्रद्वयेनादित्य
मवेक्षेत॥ततोगुरुःशिष्यावग्नइळादिभिर्मंत्रैर्भूमिंस्पृशेतां॥ततःशिष्योदिव्याब्रह्मौद
नंश्रपयित्वाचार्यायनिवेदयेत्॥ततआचार्योमहानाम्नीभ्यःस्वाहेतिस्थानेमहाव्रत
यस्वाहेतिद्वितीयाकृतिंकृत्वासर्वमनुप्रवचनीयंकुर्यात्॥ ॥इतिमहाव्रतप्रयोगः॥ ॥
अथोपनिषत्प्रयोगः॥आचार्यःपूर्ववद्धोमसमाप्त्यंतंमहानाम्नीवत्कृत्वासंवत्सरमुपनि
षद्व्रतमाचरेतिवदुंप्रेष्यतेनतथाव्रतेकृतेशाग्वदुपनिषदंभोअनुब्रूहीतिउक्तःसंघाड्यु
रवमथातःसंहितायाउपनिषदित्याचारप्यकंत्रिर्ब्रूयात्॥शिष्यस्तथेवत्रिरुक्त्वापूर्ववदा
दित्यावेक्षणभूस्पर्शौब्रह्मौदनश्रपणनिवेदनानिकुर्यात्॥ततआचार्योमहाव्रतस्थाने ११२

उपनिषदेस्वाहेतिकृत्वासर्वमनुप्रवचनीयंकुर्यात्॥आचार्याभावेशिष्यःस्वयमेव
महाव्रताध्ययनादिकंकुर्यात्इति॥ ॥इत्युपनिषद्व्रतं॥ ॥इतिमहानाम्न्योव्रतत्रयं॥ दि
अथगोदानव्रतप्रयोगः॥जन्मतःषोडशेवर्षेउदगयनेशुक्लपक्षेचौलोक्ततिथ्यादौगो
दानंकुर्यात्॥ततपूर्वेद्युराचार्यःकृतनित्यक्रियःकृतस्नानोब्रह्मचारिणंस्वदक्षिणत
उपवेश्यशाणानायम्यतिथ्यादिसंकीर्त्यास्यब्रह्मचारिणोगोदानंकर्तुमेदंगस्तिवा
चनांकुर्यार्षणग्रहयज्ञाभ्युदयिकानिकरिष्यइतिप्रत्येकंसंकल्प्यतानिक्रमेणकृत्वाप
रेद्युःकृतनित्यक्रियःकृतनित्यक्रियंवटुंदक्षिणतउपवेश्यकौतुकमाबध्यसमुद्धृत्यो
पलेपनाद्यग्निप्रतिष्ठापनांतंकृत्वापुनर्देशकालौस्मृत्वामयाक्रियमाणोगोदानहोमं
देवतापरिग्रहार्थमन्वाधानंकरिष्ये॥अस्मिन्नन्वाहितेग्नौइत्याद्याघारावाज्येनेत्यंत

मुल्का त्रिरग्निं परिवदमानं प्रजापतिं चैताः प्रधानदेवताः आज्येन शेषेण स्विष्टकृतमित्या
द्युक्त्वा समिद्धयमग्नावाधाय पूर्णपात्रनिधानांतं कृत्वोदगग्नेरास्तीर्य दर्भेषु ब्रीहियव मा
षतिलैः पृथक्पूरितनवशरावचतुष्टयं क्रमेणोत्तरोत्तरं संस्थमासाद्य पश्चाग्नेरा
सीनस्य कर्तुर्दक्षिणेन वटोर्मातामाङ्गुल्यासीन॥मातुः पुरस्ताद्ग्नेः पश्चादानडुहशृङ्ग छ
रावं शमीपर्णशरावं चस्थापयेत्॥ततो ब्रह्मैकविंशतिकुशांकुरानूर्ध्वानो मातुर्दक्षि
तस्मिन्धेत्॥ततो बटुनान्वारब्धः कर्त्ता पूर्ववंत्रमाघारांतं कृत्वाग्न आयूंषीत्यादि॥चतुर्भि
र्मंत्रैः पूर्ववदाज्याहुतीर्हुत्वोदग्वत्यागे कृत्वाग्नीतो ब्रह्मजलेपात्राभ्यांपृथगानीयबटोः
पश्चिमतः स्थित्वानुदकमन्यस्मिन्पात्रेपाणिभ्यामुद्धृत्यनवायनुदकेनेतीतियुगपन्नि
नीयतदेकदेशेनवनीतेनदध्नावामेलयित्वाबटोर्वामभ्रूश्मश्रु देशमारभ्यप्रदक्षि ११३

पामर्दिनिःशमश्रूणिवपत्वापंडंदंतुवर्त्तसेइतिमंत्रावृत्त्यानिःशमश्रूण्येवक्लेदयित्वा
ब्रह्मस्थैकविंशतिकुशाकुरेषुत्रीनंकुरानादायबटोरभिमुखंपश्चिमाग्रान्कृत्वोपु
धे त्रायस्वेनमितिदक्षिणशमश्रुभागेनिधायनेधंकुरेषुनाग्नमयंक्षुरंस्वधितेमैन
हिंसीरितिनिधाय॥ॐयेनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्॥तेन
ब्रह्माणोवपतेदमुष्यायुष्माञ्जरदष्टिर्यथासदितिसशमश्रुकान्कुशांकुरान्छित्त्वापा
गग्रान्शरावशमीपर्णेरिकीकृत्यमातुःकरेदद्यात्॥साचतानानडुहेगोमयेनागया
न्निदध्यात्॥एवंद्वितीयादिछेदनेकुशांकुरत्रयनिधानादिसमंत्रंकार्यं॥विशेषस्तु॥
येनधाताबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्॥तेनतआयुषेवपामिसुश्लोकायस्वस्तये॥
इतिमंत्रोद्वितीयछेदने॥येनभूश्वराज्यांज्योक्पश्यातिसूर्यं॥तेनतआयुषेवपामिसु

श्लोक्यायस्वस्तयेऽइतितृतीये॥चतुर्थेत्वेतेत्रयोपिमंत्राः॥एवंदक्षिणश्मश्रुभागेचत्वा
रिछेदनानिकृत्वोत्तरभागेप्येवंत्रीणिछेदनान्यादितोमंत्रत्रयेणकुर्यात्॥नचतुर्थमंत्रे॥
ततःक्षुरधारांयत्क्षुरेणमृर्च्चयतासुपेशसावस्तावपसिश्मश्रूणि॥शुंधिच्छिरोमास्य
युःप्रमोषीरित्यग्रतआरभ्यामूलमवमृज्यनापितमाकूयत्रीतोष्णाभिरद्भिरवर्थंकुर्वा
णोक्षण्वन्कुत्रालोकेशमश्रुलोमनखान्युदकूसंस्थानिकुर्वितिप्रेष्यप्रेषार्थंचाव
बोध्यतेनपूर्वसेकावसिष्टैःशीतोष्णाबुभिरग्रपाणिमार्द्रीकृत्यकेशमश्रुलोमनख
न्युदकूसंस्थानिवापयित्वास्नातंबटुंपूर्ववदुपवेश्यस्विष्टकृदादिहोमशेषंसमाप्यतद्वृ
द्ध्यादिपात्रचतुष्टयंनापितायदद्यात्॥ततोबटुरहःशेषंमौनेननीत्वावंदितसायंसंध्यो
गुरोरंतिकंगत्वावरंददामीतिवाचंविसृज्यतस्माअनड्वाहंगांचदक्षिणात्वेनयाचित्वा ११४

वादद्यात्॥ततःपरेद्युःसंवत्सरंगोदानव्रतमाचरेतिआचार्यणोक्तोब्रह्मचारीसंवत्स
रंकेशमश्रूणिधृत्वापूर्वोक्तब्रह्मचारिनियमेनगुरुसमीपेव्रतंचरेत्॥ ॥इतिप्रयोगर
त्नेगोदानव्रतप्रयोगः॥ ॥अथब्रह्मचारीव्रतप्रायश्चित्तं॥तत्रबोधायनः॥अत्रश्लोकाः॥
मनसंध्यावंदनदर्भभिक्षाग्निकार्यरात्रित्यशूद्रादिस्पर्शनकोपीनकटिसूत्रयज्ञोपवी
तमेखलादंडाजिनत्यागदिवास्वापछत्रधारणपादुकाध्यारोहणमालाधारणोदून्नी
नानुलेपनांजनजलक्रीडाद्यूतनृत्यगीतवाद्याद्यभिरतिपारुष्यदंडादिसंभाषणपर्युषित
भोजनादिब्रह्मचारिव्रतलोपजसकलदोषपरिहारार्थंब्रह्मचारीकृच्छ्रत्रयंचरेन्महाव्या
हृतिहोमंचकुर्यात्॥तद्यथा॥लोकिकाग्नौप्रतिष्ठाप्याधानाद्याज्यभागांतेकृत्वाप्रथ
मंव्यस्तसमस्ताभिर्व्याहृतिभिश्चतस्र आज्याहुतीर्हुत्वा॥ॐभूरग्नयेचपृथिव्यैचमदु

ते चुस्वाहा॥५॥ध्रुवोवायवेचांतरिक्षायचमहतेचुस्वाहा॥६॥ॐसुवरादित्यायचदिवे
चमहतेचुस्वाहा॥७॥ॐभूर्भुवःसुवश्चुद्रमसेचुनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचुस्वाहा॥८॥
ॐपाहिनोअग्नएनसुस्वाहा॥९॥ॐपाहिनोअग्नेविश्ववेदसुस्वाहा॥१०॥युन्नःपाहिवि
भावसोस्वाहा॥११॥ॐसचैपाहिशतक्रतोस्वाहा॥१२॥ॐपुनर्नोनिवर्त्तस्वपुनरग्न इ
हायुषापुनर्नःपाह्यंहसःस्वाहा॥१३॥ॐसुदुरयानिवर्त्तस्वाग्नेपिन्वस्वधारया॥विश्व
स्मियाविश्वतस्परिस्वाहा॥१४॥पुनर्व्याहृतिभिर्हुत्वास्विष्टकृदादि होमन्नोपसमापये
दिति॥एतदल्पधर्मलोपेप्रायश्चित्तं॥बहुधर्मलोपेतुप्रायश्चित्तविशेषोऽग्निधाने
नोनकोक्तः॥तंवोधियाजपेन्मंत्रंलक्षंचैत्रेत्रिवालये॥ब्रह्मचारीस्वधर्मंचन्यूनंचेत्पू
र्णमेवतदिति॥महानाम्यादिव्रतेषुलुप्तेषुनारतम्येनत्रीषडादशावाऽऽहुत्वाप

ते नर्व्रतंप्रारभेतिस्मृत्यर्थसारे॥॥इतिब्रह्मचारीव्रतलोपप्रायश्चित्तं॥॥अथसमा
वर्तनप्रयोगः॥आचरितब्रह्मचारिनियममहानाम्यादिव्रतचतुष्टयोब्रह्मचारीविद्यो
तेगुरुमर्थदानेनसंपूज्यतेनानुज्ञातोज्योतिर्विदुक्तेशुभकालेआचार्यगृहेसमावर्त्तनं
नामकुर्यात्॥ब्रह्मचारिनियमव्रतचतुष्टयलोपपक्षेप्रायश्चित्तंकृत्वाशुद्धःसन्निदंकु
र्यात्॥अत्रायंक्रमःपूर्वेद्युस्तिथ्यादिसंकीर्त्यममशौचाचमनादिसर्वब्रह्मचार्यनियम
व्रतलोपप्रायश्चित्तद्वाराश्रीपरमेश्वरप्रीत्यर्थंहोमपूर्वकंकृच्छ्रत्रयमाचरिष्यइतिसं
कल्प्य॥लौकिकाग्निप्रतिष्ठाप्याज्यहोमधर्मेणाधानपूर्वोक्तषोडशाऽऽहुतीर्हुत्वा
ऽऽहुत्याम्नायत्वेनकल्पितगोदानसहस्रतिलहोमदशसहस्रगायत्रीजपादिपुण्य
न्यूनमंचरित्वाहोमन्नोपसमापयेत्॥महानाम्यादिव्रतलोपपक्षेप्रत्येकंगायत्र्यष्टश

तसंख्याकैः अष्टाविंशतिमष्टोवाज्याहुतीर्हुत्वा एकैकंलुछंचरित्वाशुभदिनेम
हानाम्नीव्रतंकृत्वातथैवमहाव्रताद्व्रतत्रयंकृत्वागुरवेदक्षिणांदत्वातेनानुज्ञातो
मुष्यादीन्येकादशोपकल्पयेत्॥तानिच॥मणिकुंडलेवस्त्रयुगंछत्रमुपानद्युगंद
ंडंस्रजंएकबीजकंकरंजफलपिष्टंश्रीखंडाद्यनुलेपनमंजनमुष्णीषमिति॥एता
न्यात्मनेचाचार्यायचयद्युभयोर्नविंदेत्ताचार्यायैवसंपादयेत्॥यस्मिन्नहनिस
मावर्त्तनंतस्मिन्त्रानरपराजितांदिग्गत्वायज्ञियवृक्षस्येशानीशाखांछित्वात्म
प्रदेशमितांसमिधमाहृत्यभूमेरन्यत्रोपरिनिदध्यात्॥अथक्रमः॥ब्रह्मचारीकृ
तनित्यक्रियःकृतप्रातरग्निकार्यश्चप्राणानायम्यनिथ्यादिसंकीर्त्यममगृहस्था
द्याश्रमांतरप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसमावर्त्तनंकरिष्यइतिसंकल्यतदं ११६

ग भूतस्वस्तिवाचनांकुरार्पणग्रहयज्ञास्युदयिकानिसंकल्यपूर्वंकृत्वाप्रागुक्तल
क्षणांसमिधमाहृत्योपरिनिधायब्रह्मचर्यव्रतपूर्त्तयेब्राह्मणायगांदत्वाद्विजान्
भोजयित्वाविधिवत्तोनुकमावध्यशुभकालेस्थंडिलोपलेपाद्यग्निप्रतिष्ठा
नांतंकृत्वा पुनर्देशकालौनिर्दिश्यमयाक्रियमाणेसमावर्त्तनहो
मिदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥अस्मिन्वाहितेग्नावित्याद्याघारावाज्यभा न्त्र
ंतमुक्कासमिधमग्निंपवमानमग्निंपवमानमग्निंपवमानंप्रजापतिंचैताःप्रधानदेवता
आज्येनअग्निमूर्ध्वसमिधाविश्वान्देवानदर्शसमिद्भिःस्रुवेणास्विष्टकृतमित्यादि
सद्योयक्ष्यइत्यतमुक्कासमिद्वयंगृह्यावाधायपूर्णपात्रनिधानांतंपुरस्तनंतंत्रम
धिश्रयोदग्नेरास्तीर्यपुरुभिर्व्रीहियवमाषतिलैःपृथक्पृथक्पूरितानिचत्रा

ये प

रिश्रारावाणिक्रमेणैकैकन्राः प्राक्संस्थमासादयेत्॥ताम्रमयंलोहमयंवाक्षुरं
श्रीनमुष्णेचोदकंनवनीतंदधिदूर्वाश्चामण्याद्येकादशाड्व्याणिचाग्नेरुत्तरतः
आसादयेत्॥ततःप्रत्यग्नेरासीनस्यकर्तुर्दक्षिणतोमातापाङ्मुख्यासीत॥तस्याःपुरः
अग्नेपश्चात्एकस्मिन्श्रारावेन्नामीयर्णान्यैरस्मिन्नानडुहंगोमयमासादयेत्॥ततो
ब्रह्मैकविंशतिकुशांकुशानूदधानोमातुर्दक्षिणतःसन्निधत्ते॥ततोब्रह्मचारीपुरस्तात्
तंत्रंआधारांतंकृत्वा॥अग्नआयूंषीतितिसृणांश्रातंवैरवानसाग्निःपवमानोदेवता
गायत्रीछंदःप्रधानाज्यहोमेविनियोगः॥ॐअग्नआयूँषिपवसआसुवोर्जमिषंचनः। षि
आरेबाधस्वदुछुनांस्वाहा॥अग्नयेपवमानायेदंनममेतित्यागः॥एवमग्रेपि॥ॐअ
ग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः॥तमीमहेमहागयंस्वाहा॥अग्नेपवस्वस्व ११७

पांअस्मेवर्चःसुवीर्यं॥दधद्रयिंमयिपोषंस्वाहा॥प्रजापतेहिरण्यगर्भःप्रजापतिः
त्रिष्टुप्॥प्रधानाज्यहोमेवि॰ॐप्रजापतेनत्वदेतां॰स्वाहाप्रजापतयइ॰॥ततोब्रह्म
श्रीतोलेवारिणीपात्राभ्यांपृथगानीयबर्हिःपश्चिमदेशेस्थित्वानडुदंकमन्यस्मिन्पा
त्रे॥ॐउलूखलेनवायउदकेनेहीतिमंत्रेणायुगपन्निनीयतदेकदेशंगृहीत्वानवनीतेन
दध्नावामिश्रयित्वाबटोर्वामश्मश्रुप्रदेशमारभ्यप्रदक्षिणं॥ॐआदित्तिश्मश्रूणिम
पुत्वापउंदंनुवर्चसइतिमंत्रंप्रतिक्लेदनमावर्तयन्॥त्रिवारंश्मश्रूण्येवक्लेदयित्वा
स्वहस्तस्थितेनैकविंशतिकुशांकुरेषुत्रीनंकुरानादायदक्षिणश्मश्रुभागेब्रह्मचा
र्यभिमुखंपश्चिमाग्निंदध्यात्॥तदाब्रह्मचारी॥ॐओषधेत्रायस्वमामितिजपे
त्॥ततोब्रह्मानेपुकुशांकुरेषुताम्रमयंक्षुरंनिदध्यात्॥तदाब्रह्मचारीॐस्वधि

तेमर्माहिंसीः॥येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्॥तेनब्रह्माणोवपतेदमस्यायुष्माञ्जरदष्टियथासमिज्जयेत्॥ततोब्रह्मचारिणायेनावपदितिमंत्रेउच्चारितेब्रह्मासश्मश्रुकान्कुर्याकुरान्छित्वातानंकुरान्स्रुगग्रान्शराचस्थशमीपर्णेसहैकीकृत्यमातुःकरेदद्यात्॥साचतान्सश्मश्रुकूर्चमीषपर्णकुर्यांकुरानानडुहेगोमयेनिदध्यात्॥एवंद्वितीयादिछेदनेषुकुर्यांकुर त्रयनिधानादिसमंत्रकंकार्यं॥छेदनमंत्रेतुविशेषः॥ॐयेनधानाबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्॥तेनमआयुषेवपामिसुश्लोकायस्वस्तयेइतिद्वितीयछेदनेमंत्रः॥ॐयेनभूर्यश्विराज्योज्योक्पश्यासूर्यं॥तेनमआयुषेवपामिसुश्लोकायस्वस्तयेइतितृतीयछेदने॥चतुर्थेतुयेनावपत्॥येनधाता॥येनभूर्यश्वेतित्रयोमंत्राः॥एवंदक्षिणश्मश्रुभागेचत्वारिछेदनानि॥ ११८

कृत्वोत्तरश्मश्रुभागेप्यनयारीत्याचत्वारिछेदनानिप्रत्येकंमंत्रैःकुर्यात्॥ननुसर्वमंत्रैश्चतुर्थी॥ततःक्षुरधारांयत्क्षुरेणमुर्चयतासुपेशसावक्षावपसिश्मश्रूणि॥शुधिशिरोमुखंमामआयुःप्रमोषीरित्यनेनाग्रतआरभ्यमूलमवमृज्यनापितमाहूयश्मश्रूणिनोष्णाभिरद्भिरवर्थंकुर्वाणोक्षण्वन्कुर्वालोकेनाश्मश्रुलोमनखान्युदक्संस्थानिकुर्वितिप्रेषेणानुज्ञास्यप्रेषार्थंचावबोध्यनापितेनपूर्ववच्छोषितश्मोष्णाभिराद्रीकृत्यकेशश्मश्रुलोमनखान्युदक्संस्थानिवापयित्वानद्दीत्यादिनाराचनुदेयंनापितायदद्यात्॥ततःकरंजबीजपिष्टेनस्वशरीरमुद्वर्त्यशीतोष्णेरुदकैःस्नात्वाद्विराचम्यपुनर्वस्त्रंपरिधायान्यद्वस्त्रंधारयेत्॥ततोमंत्रः॥युवंवस्त्राणीत्यस्यदीर्घतमामित्रावरुणोत्रिष्टुप्॥ॐयुवंवस्त्राणि०॥सचेथे॥ततोद्विराचम्यपवित्रांज

पाणिभ्यां

नमादाय।ॐअश्मन्नूस्तेजोसिचक्षुर्मेपाहीतिमंत्रेणावृत्यासव्यदक्षिणेचक्षुषीक्रमे
णांङ्गुलतथैव।।ॐअश्मन्नूस्तेजोसिश्रोत्रंमेपाहीत्यनेनकुंडलाभ्यांदक्षिणसव्येश्रोत्रे उ
लंकृत्यकुंकुमाद्यनुलिप्ताभ्यांपूर्वंमुखमनुलिप्यपश्चादितरांगान्यनुलिप्यकरोप्रक्षा
ल्य।ॐअन्नाद्यस्यान्नाद्योहंभूयासमित्यनेनस्रिरसिस्रजंबध्वाॐदेवानांप्रतिष्ठेस्थः
सर्वतोमापातमित्यनेनचर्ममय्याुपानहौदक्षिणसव्याभ्यांपादाभ्यांमारुह्य।ॐहि
रण्यवक्ष्वाःसीतिमंत्रेणछत्रंधृत्वा।।ॐवेणुरसिवानस्पत्योसिसर्वतोमापाहीतिवेणुवं
दंडंगृहीत्वा।।आयुष्यमितिसूक्तेनसुवर्णमणिंकंठेबध्नीयात्।।आयुष्यमितिसूक्त
स्यसनकसनंदनसनातनादयऋषयः।।हिरण्यंदेवताआद्याश्चतस्रोनुष्टुभःपंचमी
त्रिष्टुप्षष्ठ्यनुष्टुप्सप्तम्यतिशक्वरीअष्टमीनवम्योत्रिष्टुभौदशम्यनुष्टुप्एकादशी ११९

जगती।।कंठेमणिधारणेविनियोगः।।आयुष्यंवर्चस्यंरायस्योषुमोऽहंदं।।इदंहि
रण्यंवर्चस्यंजैत्रायाविशतादिमां।।उच्चैर्वा जीवृतनाषाडसंभासाहंधनंजयं।।सर्वा
समग्राऋद्धयोहिरण्येस्मिन्त्समाहिताः।।शुनमहंहिरण्यस्यपितुर्नामेवजुग्रभं।।तेन
मांसूर्यत्वचमकरंपूरुषप्रियं।।संम्राजंचविराजंचाभिश्रियंचमेकुरु।।लक्ष्मीरा
स्यामुखेतयामामिंद्रसंसृज।।अग्नेःप्रजांतंपरियहिरण्यमृतमंजग्रेअधिमर्त्येषु।।
यएनद्वेदसइदेनमर्हतिजरामृत्युर्भवतियोबिभर्ति।।यद्देदराजावरुणोयद्देदेवीस
रस्वती।।इंद्रोयद्देत्रहावेदतन्मेवर्चसिआयुषि।।ननद्रक्ष्यसिनपिशाचाश्चरंतिदेवानां
ओजःप्रथमंजग्र्येतत्।।योबिभर्तिदाक्षायणाहिरण्यंसदेवेषुकृणुतेदीर्घमायुःस
मनुष्येषुकृणुतेदीर्घमायुः।।यदबध्नंदाक्षायणाहिरण्यंशतानीकायसुमनस्यमानाः।।

तन्नआवंधामिसुतसोमारदायायुष्माञ्जरदष्टिर्यथासत्॥घृताद्लौंसंमधुमत्सुवर्णंध
नंजुयंधरुणंधारयिष्णु॥रुणक्तुपत्नादधराश्चकृण्वदारोहमांमहतेसौभगाय॥घृ
यंमोकुरुदेवेषुघृयराजसुमाकुरु॥घृयंविश्वेषुगोत्रेषुमयिधेहिरुचारुचा॥अग्नि
र्यंनंविराजतिसूर्योयंनंविराजति॥विराज्येनंविराजतितेनास्मान्ब्रह्मणस्पतेविराज
सुमिधंकुरु॥अवंचुमिंद्रमुतोदवामहेयोगोजिद्धनंजिदश्वजिद्यः॥इमंनोयज्ञंवि
हवेजुषस्वास्यकेमोदरिवोमदिनंत्वेति॥अनंतरमुछीषेणाग्नाक्षिण्येनस्रिरःसंवेष्य
उपानहोसंत्यज्यउपरिनिहितांग्नासुक्कांसमिधंगृहीत्वातिष्ठन्नेवस्मरंचमइत्यादी
त्त्वाहांतान्मंत्रानुक्त्वाग्नावादध्यात्॥एषांमंत्राणांप्रजापतिर्ऋषिःअग्निर्देवताअष्टी
छंदः॥समिदाधानेवि०॥ॐस्मृतंचमेअस्मृतंचमेतन्मंउभयंवृतं॥ॐनिंदाचमेअनिंदा १२०

चमेत०॥ॐविद्याचमेअविद्याचमेत०॥प्रज्ञाचमेअप्रज्ञाचमेत०॥श्रद्धाचमेअश्रद्धा
चमेत०॥इष्टंचमेअनिष्टंचमेत०॥दत्तंचमेअदत्तंचमेत०॥अधीतंचमेअनधीतंचमेत०॥
कृतंचमेअकृतंचमेत०॥सत्यंचमेअसत्यंचमेत०॥स्कृतंचमेअस्कृतंचमेत०॥वृतंचमेअवृ
तंचमेत०॥यदग्नेसेंद्रस्यसप्रजापतिकस्यसऋषिकस्यसऋषिराजन्यस्यसपितृकस्यस
पितृराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाकाग्नास्यसातीकाग्नास्यसानूकाग्नास्य
सप्रतीकाग्नास्यसदेवमनुष्यस्यसगंधर्वाप्सरस्कस्यसहारण्येश्वपशुभिर्ग्राम्येश्चत
न्मेआत्मनआत्मनिवृतंतन्मेसर्ववृतमिदमहमेतेसर्ववृतोभवामिस्वाहेति॥अग्नय०
अथोपविश्यअन्याग्नादेग्नासमिताद्नासमिधोममाग्नेवर्चोविहवेषित्यनेनसूक्तेनघृ
त्यंचस्रुगंतेग्नावादध्यात्॥पश्चात्स्वाहाकारमुच्चारयेत्॥अस्यसूक्तस्यविहव्यऋषिः

विश्वेदेवादेवताआद्याजगतीअंत्यास्त्रिष्टुभः॥समिदाधानेवि०॥ओंमम॑ाग्नेवर्चोविद॑ेष
धस्तुवयंत्वेधानास॑न्वेषम॥मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षेणपृतनाजयेम॑स्वाहा॥
विश्वेभ्योदेवेभ्यइद॑ं॥एवमग्रेवि॥१॥ममदेवाविद॑वेसंतुसर्वइंद्रंवोमरुतोविष्णुरग्निः॥मम॑ां
तरिक्षमुरुलोकमस्तुमह्यंवातःपवतांकामेअस्मिन्स्वाहा॥२॥मयिदेवाद्रविण॑मायजंतां
मय्याशीरस्तुमयिदेवहूतिः॥दैव्याहोतारोवनुषंतपूर्वेरिष्टास्यामतन्वोसुवीरास्वाहा॥३॥
ॐमह्यंयजंतुममयानिद॑व्याकूतिःसत्यामनसोमेअस्तु॥एनोमानिगांकतमच्चनाहंविश्वेदे
वासोअधिवोचतानःस्वाहा॥४॥देवीःषळुर्वीरुरुनःकृणोतुविश्वेदेवासइहवीरयध्वं॥
माहोस्महिप्रजयामातनूभिर्मारेधामद्विषतेसोमराजन्स्वाहा॥५॥ॐअग्नेमन्युंप्रतिनुदन्
रेषामदर्धोगोपाःपरिपाहिनस्त्वं॥प्रत्यंचोयंतुनिगुतःपुनस्तेऽमेषांचित्तंप्रबुधांविनेशत्स्वा १२१
हा॥६॥धातादधातूणांभुवनस्यपतिंदेवंत्वष्टारमभिमातिषाहं॥इमंयज्ञमश्विनो
भाबृहस्पतिंदेवाःपांतुयजमानंन्यर्थात्स्वाहा॥७॥ॐउरुव्यचोनोमहिषःशर्मयंसद्
अस्मिन्हवेपुरुहूतःपुरुक्षुः॥सनःप्रजायैहर्यश्वमृळयेंद्रमानोरीरिषोमापरादाःस्वाहा॥८॥
ॐयेनःसपत्नाअपतेभवंत्विंद्राग्निभ्यामवबाधामहेतान्॥वसवोरुद्राआदित्यउपरिस्पृशं
मोयंचेन्नोरमधिराजमक्रुस्वाहा॥९॥ॐअर्वाचिमिंद्रमुतोहवामहेयोगोजि
द्धनजिद्यशुजिद्यः॥इमंनोयज्ञंविहवेजुषस्वास्यकुर्मेहरिवोमेदिनंत्वास्वाहा॥वि
श्वेभ्योदेवेभ्यइद॑ंनमम॥१०॥इतिदशमंत्राः॥ततःस्विष्टकृदादिहोमंकृत्वासमापयेत्॥ततः
स्नात्वाकेनेमिनिकंविनानक्तंनग्नश्चनस्नामि॥नग्नांस्त्रियंनेक्षे॥वर्षतिनधा
वामि॥वृक्षंनारोहामि॥कूपंनावरोहामि॥नबाहुभ्यांनदीन्तरे॥प्राणसंयायंनाभ्या

पद्येइत्येवंसंकल्पयेत्॥ततःकौथीनंमेखलांचविसृजेत्॥केशश्मश्रुलोमनखान्य
पराजितायांदिशिनिखनति॥ततोयत्रमधुपर्कादिपूजास्यसंभावितातत्रैतांरात्रींवसे
त्॥समावर्त्तनानंतरंत्रिरात्रमाशौचंकुर्यात्॥ ॥इतिश्रीरामेश्वरभट्टसुतनारायणभट्ट
कृतेप्रयोगरत्नेसमावर्त्तनप्रयोगः॥ ॥अथक्रमप्राप्तोविवाहः॥तत्रतावत्तदुपयोगित
याकिंचित्संक्षेपेणोच्यते॥अनाश्रमोनतिष्ठेत्तदिनमेकमपिद्विजः॥आश्रमेणाविनाति
ष्ठन्प्रायश्चित्तीयतेहिसद्भिरदक्षस्मृतेः॥गुरवेतुवरंदत्वाज्ञायीतत्तदनुज्ञया॥वेदंव्रतं
निवापारंनीत्वाश्रुत्यभयमेववा॥अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत्॥अनन्यपू
र्विकांतामसपिंडांयवीयसीं॥अरोगिणींभ्रातृमतीमसमानार्षगोत्रजामितिचयाज्ञव
ल्क्येन॥त्रिविधोपिवेदव्रतोभयस्नातकोऽविलंबेनलक्षणादिविशिष्टांस्त्रियंनपुंसक

निवृत्तयेस्त्रीत्वेनपरिक्षितांउद्वहेत्॥तत्रापिकुलमग्रेपरीक्षेतेतिगृह्यचचनादोस
दोषादिगुणवत्तयाहीनक्रियत्वादिदोषहीनतयाचपरीक्ष्यकुलंज्ञो ह्यात्॥तदनुलक्ष
णाद्यपिपरीक्ष्यं॥लक्षणानिचशुभाशुभसूचकानितत्तल्लोमकेशादिस्थानत्वादानिप्रत्य
क्षगम्यानिबाह्यान्यंतराणिचाष्टौपिंडान्कृत्वे त्यादिनागृह्योक्तानिहिविधान्यपिमहार्ण
वेभ्योज्ञेयानिविस्तरभयात्त्विहनोच्यंते॥त्यादानेनोपभोगेनवापुरुषांतरपूर्विकानभव
तिसानन्यपूर्विकाता॥अनेनवाग्दत्तामनोदत्ताअग्निंपरिगतासप्तमंपदंनीताभुक्तागृ
हीतगर्भाप्रसूताचेतिसप्तपुनर्भुवोव्याचक्षते॥कांतांवोदुर्मनोनयनयोराह्लादकारिणीं॥
समानएकःपिंडःपिंडदानक्रियामूलपुरुषस्तारतम्यंवायस्यानविद्यतेसाअसपिंडाता॥
कथंचिदेकपिंडक्रियानुप्रवेशोननिर्वाप्यसापिंड्यंकेचिदाहुः॥एकत्रारोपयवान्वयेस

वयवसापिंड्यंविज्ञानेश्वरादयोनिदोषंमेनिरे॥अत्रबहुनरंवन्कव्यंविचाररत्नतापत्या
प्रयोगरत्नताभंगभीत्यानोच्यते॥नन्वेवंविधान्नारीरावयवान्वयेनसापिंड्यानिप्रसं
गेननकाप्यसपिंडेत्यतआहयाज्ञवल्क्यः॥पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथेति॥
मातृपक्षेपंचमात्पितृपक्षेसप्तमादूर्ध्वंसापिंड्यंनिवर्त्ततइतिविज्ञेषः॥कूटस्थमा
रभ्यात्रगणना॥तदुक्तं॥वध्वावरस्यवातानःकूटस्थाद्यदिसप्तमः॥पंमीचेन्नयोर्मा च
नात्तत्सापिंड्यंनिवर्त्ततइति॥कूटस्थोमूलपुरुषःयतःसंतानभेदः॥एवंचमातृपितृ
द्वारकसापिंड्यवतीनांकन्यकानामियंसंख्यासंकलना॥उद्वोढुःपितरौपितुश्चपि
तरौतज्जन्मरुद्वंपतीद्वंद्वंतस्यचतुष्कमष्टकमतोप्यस्यक्रमात्षोडश॥वंशारंभकदंप
तीप्रमितिरित्यासप्तकक्ष्यंतदाएकैकान्वयकन्यकाःपितृकुलेत्यासप्तकक्ष्यंब्रुवे॥१॥ १२३

यद्यप्येकस्यबह्व्योपिसुतास्युस्तदपीहतु॥संबंधसाम्यादेकैवगणितेत्यवधार्यतां॥२॥
एकस्मान्मिथुनात्सुतोथदुहितातद्वद्वयंतद्वयात्तस्माद्वंद्वचतुष्कमष्टचततोतःषोडश
तोरदाः॥यावत्सप्तमकक्ष्यमन्निरूपनवःकन्याइहैकान्वयेतादृंतेर्गणिताश्चैकरवद्वंशे
वंशेसपिंडाःपितुः॥३॥मातुर्जन्मददंपतीचमिथुनद्वंद्वंतयोःसागरास्तस्याःपंचमकक्ष्य
मभ्वमितिरित्येकान्वयःपुंसुते॥द्वंद्वाद्वंद्वयुगंततोब्धयइतोह्यापंचकक्ष्यंत्रारक्षोण्यःस
प्तगुणाःत्रारान्त्रविधवोमातुःसपिंडाःकुले॥४॥कुलद्वयस्यकन्यकायुतामिथःसपिंड
काः॥हिमांशुदग्धराद्वंद्वे२१ २१ विवाहकर्मवर्जिताइति॥५॥यवीयसीस्वपेक्षयावय
सावपुषाचन्यूनां॥अरोगिणीअचिकित्स्यराजयक्ष्मादिरोगरहितां॥भ्रातृमतीमित्यु
त्पत्तिकाकरणाद्रांकानिवृत्त्यर्थं॥यत्रतुपुत्रिकाकरणाभावनिश्चयस्तामभ्रातृकामप्युद्व

हितृ॥असमानार्षगोत्रजांऋषेरिदमार्षं॥गोत्रप्रवर्तकस्यमुनेर्व्यावर्तकःप्रवरइत्यर्थः॥
गोत्रेवंशापरंपराप्रसिद्धं॥स्वसमानेआर्षगोत्रेयस्यत ज्ञायानभवतितां॥यस्कवाधो
लमौनमौकानांभिन्नगोत्राणामपिभार्गवत्वेतद्व्यसावेतसेतिप्रवरैक्यमस्तितत्रविवा
होमाभूदितिअसमानार्षजामित्युक्तं॥आंगिरसांबरीषयौवनाश्वेतिमांधात्रंबरीषयौ
वनाश्वेतिआंगिरसमांधातृप्रवरभेदेपियौवनाश्वगोत्रैक्यं॥तादृशेविवाहवारणाया
समानगोत्रजामित्युक्तं॥तथाचगोत्रप्रवरौपृथक्पर्युदासेनिमित्तभूतौ॥प्रवरैक्येविशे
षमाहबोधायनः॥पंचानांत्रिषुसामान्यादविवाहस्त्रिषुहयोः॥भृग्वंगिरोगणेष्वंत्रे
षेकोपिवार्येदिति॥विवाहमितिशेषः॥ ॥इतिगोत्रप्रवरानिर्णयः॥ ॥सपिंडसप्र
वरसगोत्र विवाहप्रायश्चित्तादिचमहाग्रंथतोवसेयंविस्तरभियानोच्यते॥सपत्नम १२४

तामहकुलेप्यानिदेशिकात्सापिंड्यादविवाहः॥तथाचसुमंतुः॥पितृपत्न्यःसर्वा
मातरस्तभ्रातरोमातुळास्तद्गिन्योमातृष्वसारस्तद्दुहितरश्चभगिन्यस्तदपत्यानिभा
गिनेयान्यथासंकरकारिण्यःस्युरिति॥अत्रयावद्वचनंवाचनिकमितिन्यायेनपरिगणि
तेष्वतिदेशिकेसापिंड्यंननुपंचमसप्तमपर्यंतं॥क्वचिन्नुवचनादेवविवाहनिषेधः॥य
थागृह्यपरिशिष्टेअथविवाहइत्युपक्रम्यमध्येअविरुद्धसंबंधामुपयच्छेतेत्युक्तेदंप
त्योर्मिथःपितृमातृसाम्येविरुद्धसंबंधोयथाभार्यास्वसुर्दुहितापितृव्यपत्नीस्वसाचेति
स्वयमेवविरुद्धसंबंधेविवृते॥तथानारदः॥प्रत्यक्षहोनेवकार्योनैकस्मैदुहितृद्वयं॥
नैवैकजन्ययोःपुंसोरेकजन्येचकन्यके॥नैवंकदाचिद्दुहाहोनेकदामुंडनद्वयं॥अन्य
त्रापि॥एकजन्येचकन्येद्वेपुत्रयोर्नैकजन्मनोः॥नपुत्रीद्वयमेकस्मैप्रदद्यानुकदाचनेति॥

न्यम

अथवरगुणः॥ ॥तत्रबुद्धिमतेकन्यांप्रयच्छेदितिगृह्यं॥यमः॥कुलंचशीलंचवयश्च
रूपंविद्यांचवित्तंचसनाथतांच॥एतान्गुणान्सप्तपरीक्ष्यदेयाकन्याबुधैस्त्वेषमचिंतनी प
यं॥अन्योपिगुणदोषविचारोग्रंथांतरादवसेयः॥अन्यच्च॥कुलेऋतुत्रयादर्वाग्नउना
नतुमुंडनं॥पुत्रोद्वाहान्नैवपुत्रीविवाहोपिऋतुत्रये॥अब्दांतरान्मुंडनंचनैकदामुंडनद्व
यं॥अब्दभेदेतुनदोषइतिसंहितासारावल्यां॥फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने॥
भेदादब्दस्यकुर्वीतनर्तुत्रयविलंबनमिति॥इत्यादि॥देयकन्याकालोमदाग्रंथतोज्ञेयः॥
वधूवरयोर्बृहस्पत्यादिशुद्धिर्विवाहकालशुद्धिर्वर्णवश्यादिघटनातेषुसाधकबाधक
व्यवस्थाचज्योतिषग्रंथेभ्योविवेचनीयेतिदिक्॥तथाज्येष्ठगर्भस्यजन्ममादौचसर्वेषांम
गलकार्येनिषिद्धंरत्नकोषे॥जन्मर्क्षेजन्मदिवसेजन्ममासेशुभंत्यजेत्॥ज्येष्ठमास्याद्य १२५

ज्येष्ठमासे२

गर्भस्यशुभंवर्ज्यंस्त्रियाअपीति॥ ॥अथकन्यादातारः॥ ॥तत्रयाज्ञवल्क्यः॥पितापि
तामहोभ्रातासकुल्योजननीतथा॥कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः॥अप्रय
च्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ॥गम्यंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरं॥सकुल्यः
प्रत्यासन्निकमेणादौपितृकुलस्थस्तदभावेमातामहकुलस्थःसर्वाभावेजननी॥
प्रकृतिस्थःउन्मादादिदोषहीनः॥गम्यंगमनार्हंसावर्ण्यादिगुणयुक्तं॥नारदोपि॥पि
तादद्यात्स्वयंकन्यांभ्रातावानुमतेपितुः॥मातामहोमातुलश्चसकुल्योबांधवस्तथा॥मा
तास्वभावेसर्वेषांप्रकृतोयदिवर्त्तते॥तस्यांप्रकृतिस्थायांकन्यांदद्युःस्वजातयः॥यश
तुनैवकश्चित्त्यात्कन्याराजानमाव्रजेत्॥ इतिचौलेव्रतबंधेचविवाहेयज्ञकर्मणि॥भा च
र्यारजस्वलायस्याप्रायस्तेनशोभनं॥वधूवरान्यतमयोर्जननीचेद्रजस्वला॥तस्यांशु

स्य

हेरिदंकार्यमांगल्यंमनुरब्रवीत्॥ वृद्धमनुः॥विवाहव्रतचूडासुमातायदिरजस्वला॥
तदानमं गलैर्भुद्वोकार्यंशुभेक्षुभिः॥गर्गः॥यस्योद्वाहा
दिमांगल्येमातायदिरजस्वला॥तदानतत्रकर्त्तव्यमायुःक्षयकरंयतः॥बृहस्पतिः॥
विधव्यंचविवाहेस्याज्जडत्वंव्रतबंधने॥चूडायांचक्षितेर्मृत्युर्विघ्नयात्रप्रवेशयोः॥
रजस्येतत्॥कपर्दिकारिकायां॥सूतिकोदक्ययोश्शुद्धौगांदद्याद्धोमपूर्वकं॥प्राप्तेक
र्मणिशुद्धिस्यादितरस्मिन्नशुद्धति॥अलाभेसुमुहूर्त्तस्यरजोदोषेचसंगते॥श्रियंसंपू
ज्यतत्कुर्यद्वत्रहस्याभयंकुरु॥हेमीमाषमितांपश्चाच्छ्रीसूक्तविधिनार्चयेत्॥प्रत्यूचं
यायसंकुल्वाअभिषेकंसमाचरेत्॥ ॥अथविवाहभेदाः॥ ॥मनुः॥ब्राह्मोदैवस्तथैवा
र्षःप्राजापत्यस्तथासुरः॥गंधर्वोराक्षसश्चैवपैशाचश्चाष्टमोमतः॥एतेषांलक्षणंफलं १२६

३ गांधर्वादिष्वपिभार्यापतिभावायपश्चाद्धोमादिसप्तपदीपर्यंतंकार्यं॥

न्यालंकृत्यकन्या मितिगृह्यरंडेवगंतव्यं॥एतेषांव्यवस्थास्मृतौ॥चत्वारोब्राह्मण व
स्याद्याराज्ञांगंधर्वराक्षसौ॥राक्षसश्चासुरोवैश्येशूद्रेचांत्यस्तुगर्हितः॥अंत्यःपैशाचः॥
गांधर्वासुरयेश्चाचविवाहोराक्षसश्चयः॥पूर्वेपरि ग्रहस्तेषुपश्चाद्धोमोवि धीयतइ
तिपरिशिष्टात्॥होमाद्यभावेवरांतरायदेयासतितुनेतिबौधायनआह॥बलादपहृ
ताकन्यामंत्रैर्यदिनसंस्कृता॥अन्यस्मैविधिवद्देयायथाकन्यातथैवसेति॥बलादि
दि तिछलादेरुपलक्षणं॥इत्यंसर्वंविचार्यपरिवित्तपरिवेत्तृदिधिषूपत्यादिच
यथानस्यात्तथाविचार्यविवाहःकार्यः॥अस्माभिस्तुविस्तरभीतेर्नलिख्यते॥अथ
मुख्यब्राह्म विवाहांगभूतंवाग्दान विधिर्गृह्यपरिशिष्टाचारसंमत्योच्यते॥ज्योति
र्विदादिष्टेविवाहनक्षत्रादियुतेशुभकालेद्वौचत्वारोवाप्त ऋत्विग्वेषावरेणनांदि

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC

त्रादिनावाअनृक्षराऋजवःसंतुपंथाइतिप्रहितास्तावतीभिःपुरंध्रीभिर्मंगलगीतनृ
थैश्चसहत्राकुनदनूनिपूर्वकमलंकृतवरयुतास्तदयुतावाकन्याग्रहमेत्यशुभेसवस्त्र
पीठासनेप्राङ्मुखींसालंकारांसुवेषांकन्यामुपवेश्यतद्धस्तेफलतांबूलादिदत्वातत्पि
त्रादिस्तुरतैःश्रीगणपत्यादिस्मरणपूर्वकंप्राङ्मुखासीनाःप्रत्यङ्मुखावाअमुकप्र
वरान्वितामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकनाम्नेवरायां
मुकप्रवरोपेतामुकगोत्रोत्पन्नाममुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नीक
न्यांभार्यात्वायवृणीमहेइतिब्रूयुः॥अथदातृभार्याज्ञातिबंधुमतिंकृत्वायथोक्तम
नूद्यानूद्यवावृणीध्वमितिवदेत्॥एवंपुनर्द्विःप्रयुज्यप्रदास्यामीतिचोच्चैस्त्रिर्वदेत्॥
२ ततोवैपित्रादिर्गंधाक्षतशुभवस्त्रयुग्मभूषणतांबूलपुष्पादिभिःकन्यांपूजयेत्सं १२७

प्रदायागतमंत्रैः॥ततःकन्यादातृप्राङ्मुखःकन्यावामतउपविश्यआचम्यदेश
कालौसंस्मृत्वाकरिष्यमाणविवाहांगभूतंवाग्दानमहंकरिष्ये॥तदंगंगणपति
पूजनंकरिष्यइतिसंकल्प्यगंधादिदक्षिणांतेगणपतिंपूजयित्वायथाचारंक
लशपूजनादिचकृत्वास्वस्थानेकन्यापूजयितारमुपवेश्यस्वयंतत्प्राच्यांप्रत्य
तं ङ्मुखउपविश्यगंधतांबूलदानादिनापूजयेत्॥सचदातारं॥ततोदाताआचार
तोहरिद्राखंडंपंचदृढपूगफलानिचगंधाक्षतालंकृतानिगृहीत्वामुकप्रवरा
न्वितामुकगोत्रोत्पन्नामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकनाम्नेवरा
रायामुकप्रवरान्वितामुकगोत्रोत्पन्नामुकप्रपौत्रीममुकपौत्रीममुकस्यपुत्री
ममुकनाम्नीमिमांकन्यांज्योतिर्विदाद्दिष्टेमुहूर्तेदास्येइतिवाचासंप्रददइतिचो

ब्रूयात्॥अव्यंगेपतिनेक्लीबेदत्तादोषविर्जिते॥इमांकन्यांप्रदास्यामिदेवाग्निद्विजसन्नि
धावितिवरपित्रादिवस्त्रप्रांतेतानिपूगफलानिधक्षिप्यप्रतिज्ञामंत्रेणतदस्त्वित्यादि
नावस्त्रेबध्वाग्रथिंचंदनेनचर्चयेदित्याचारप्राप्तं॥ततोहरिद्राखंडंपंचपूगफलानित
थैववरपित्रादिर्गृहीत्वाअमुकगोत्रामुकवरविषयेभवंतोनिश्चिंतुभवंत्विति दातृवस्त्र
प्रांतप्रक्षेपादिकुर्यात्॥ततोदाता ..॥वाचादत्तामयाकन्यापुत्रार्थंस्वीकृतात्वया॥कन्या
वलोकनविधोनिश्चितस्तंसुखीभवेतिवरपितरंप्रतिपठेत्॥सच॥वाचादत्तात्वयाक
न्यापुत्रार्थंस्वीकृतामया॥वरावलोकनविधोनिश्चितस्त्वंसुखीभवेतिदातारंप्रतिप
ठेत्॥भ्रात्रादौस्वीकर्त्तरिभ्रात्रर्थेमित्रार्थमित्यूह्यं॥ततोब्राह्मणाःस्त्रीवाआपःसंतु। १२८
सोमनस्यमस्तु॥अक्षतंचारिष्टंचास्तुदीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु॥एतद्

सत्यमस्त्वित्यस्तुसमानीवआकूतिःप्रसुमंनेतिमंत्रौपठेयुः॥ततोदातापात्रस्थमित
तंडुलपुंजेन्यायीमावाद्यषोडशोपचारैःपूजयेत्॥तांचकन्यैवंप्रार्थयेत्॥देवेंद्राणिनम
स्तुभ्यंदेवेंद्रप्रियभामिनि॥विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमइतिं॥ततःपुरंध्रीभि
र्नीराजनादिमांगलिकंकार्यं॥विप्राश्चगंधतांबूलादिनापूजिताआशीर्मंत्रान्पठेयुः॥
तेचमंत्राः॥ओंइंद्रःपुत्रेभ्योदुहितृभ्यःपरिदातेवसुनांवत्समिछंतीमनसाभ्यागान्॥दुहामुष्मिभ्यां
पयोअघ्न्येयंसावर्द्धतांमहतेसौभगाय॥१॥समिद्धस्यश्रयमाणःपुरस्ताद्ब्रह्मवन्तानो
अजरंसुवीरं॥आरेअस्मदमतिंबाधमानउछंयन्नःसहसावन्नुपाहि॥२॥वनस्पतेशतव
ल्शोविरोहसहस्रवल्शाविवयंरुहेम॥यंत्वामयंस्वधितिस्तेजमानःप्रणिनायमहते
सौभगाय॥३॥इंद्रेंद्रेवानामुपसख्यमायन्त्सहस्रधारःपवतेमदाय॥नभिस्तवोनोअ

नुधामुपूर्वमगन्निंद्रमहतेसौभगाय॥४॥अस्यपिबक्षुमतःप्रस्थितस्येंदुसोमस्यवरमा
सुतस्य॥सुस्तिदामनसोमादयस्वार्वाचीनोरवतेसोभगाय॥५॥घृताद्लुंलुंमधुमत्लुव
र्पधिनंजयंधुरुणंधारयिष्णु॥रुणक्तुपत्नादधरोश्चरुण्वदारोहमोमहतेसौभगाय॥६॥
इतिसौभगायपदानाः षट्॥तदेसुमित्रा वरुणातदग्नेरायोरस्मभ्यमिदमसुत्रासं॥
अस्मीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय॥गृहावैप्रतिष्ठासूक्तेनस्तिष्ठतं
मयावाचास्तव्यंतस्माद्यद्यपिदूरइवपशून्लभतेगृहानेवेनानाजिगमिषतिगृहादिय
श्नांप्रतिष्ठाप्रतिष्ठा॥इत्यादयश्च॥ ॥इतिप्रयोगरत्नेवाग्दानविधिः॥ ॥ततोवेवाहिकेशु
भेमुहूर्तेवधूवरयोस्तेलहरिद्रारोपणादिपथाचारंकार्यं॥वाग्दानोत्तरंदेशांतरंगतेवरे॥
नारदः॥प्रतिगृह्यतुयःकन्यांवरोदेशांतरंव्रजेत्॥त्रीन्पक्षान्समतिक्रम्यकन्यान्यंवरयेद्वरं॥
वरमरणेतुवसिष्ठः॥अक्षिभ्यवाचादत्तायोम्रियेतादोवरोयदि॥नचतोदंपतीस्यातांकुमा

रीपितुरेवसा॥यस्मैवाग्दत्तातस्यदोषयोगेप्रत्यवरांतरलाभेचतस्मैनदेयाइत्याहया
ज्ञवल्क्यः॥दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआव्रजेत्॥इति॥अत्रपूर्वस्यचदोषयोगइतिवि
ज्ञानेश्वरः॥प्रतिश्रुत्याप्यधर्मेणसंयुक्तायनदद्यादिति चस्मृतिः॥अन्यथाहरणेतुसएव
दंडमाहसलक्षप्रदीयतेकन्याहरंस्तोचोरदंडभागिनि॥ ॥विवाहेमंडपप्रकारमाहवसिष्ठः॥
षोडशारनिकंकुर्याच्चतुर्द्वारोपशोभितं॥मंडपंतोरणैर्युक्तंतत्रवेदिंप्रकल्पयेत्॥अष्टहस्तां
तुरचयेन्मंडपंवाद्विषट्करं॥द्विषट्करंद्वादशाकरं॥वेदिकानिर्माणप्रकारमाहनारदः॥
हस्तोच्छ्रितांचतुर्हस्तांचतुरस्रांसमंततः॥स्तंभैश्चतुर्भिःसुश्लक्ष्णांवामभागेतुसद्मनि॥समं
तांच चतुर्दिक्षुसोपानैरतिशोभितां॥प्रागुदक्प्रवणांरम्यांसहंसशुकादिभिः॥विचित्रां
कितांकुंभैर्विहितांतोरणांकुरैः॥शृंगारपुष्पनिकरैर्वर्णकैःसमलंकृतां॥विप्राशीर्वचनैः

पुण्यस्त्रीभिर्दरैर्यैर्मनोरमं॥वादित्रनृत्यगीतायैर्हृद्यानंदिनीशुभं॥एवंविधामहरूक्षे
न्मिथुनेसाग्निवेदिकामिति॥हस्तोत्रवध्वाः॥सोपानकरणंपश्चिमभागेउपरिचनुर्दिक्षु
वाऽथोयथाचारं॥सोपानातिरेकेणचतुर्हस्ताचतुरस्रा॥ ॥इतिविवाहवेदी॥ ॥अथवि
वाहपूर्वदिनकर्त्तव्यं॥वधूपितावरपिताचविवाहदिनात्पूर्वेद्युःपूर्वाह्णेसपत्नीकःकृताभ्यं
गोधनमांगलिकवेषकृतलेपनरंगमालिकेप्रांगणेशुभासनेप्राङ्मुखउपविश्यस्वदक्षिणतः
पत्नीतद्दक्षिणतःकन्यांवरंवोपवेश्याचम्यप्राणानायम्येष्टदेवतांगुर्वादिनमस्कारंकृत्वादे
शकालौसंकीर्त्यअस्यामुकशर्मणःपुत्रस्यश्वःकरिष्यमाणविवाहांगभूतंस्वस्तिवाचनमंकु
र्मणांनांदीश्राद्धंग्रहयज्ञंमंडपदेवतादिपतिष्ठांचकरिष्यइतिसंकल्प्यउक्तरीत्यास्वस्तिवा
चनादीनिकुर्यात्॥नांदीश्राद्धात्पूर्वंवंशपात्रोपरिवस्त्रेगणपत्यादीगौर्यादिषोडशमात्रा स्था १३०

दिसप्तमातृकास्तंडुलपुंजेषुउक्तरीत्याप्रतिष्ठापूर्वकंपू ज्याः॥प्रयोगपरिज्ञातेतुनांदीश्रा
द्धंमातृपित्रकर्त्तृकंस्वस्तिवाचनादितुवरकर्त्तृकमित्यत्रकेतद्विचारणीयं॥कन्यापितापिअस्या
अमुकनाम्न्याःकन्यायाःश्वइत्यादिविशेषेणसंकल्प्यसर्वंकुर्यात्॥ततोवरपिताआचार्येण
कौतुकबंधार्थंसूत्रहस्तंपूर्ववत्करीत्याकारयेत्॥तहस्तमाचार्यःकौतुकबंधोक्तमंत्रैस्तंत्रेणाभिषि
च्यजातवेदसइत्यृचामंत्राद्यत्यागंधेनलेपयित्वाशुद्धदेशेप्रज्ञातंनिदध्यात्॥मंडपदेवतादिप्र
तिष्ठातन्त्रेत्थंकार्या॥दूर्वाशमीपल्लवकुलवृक्षपल्लवानाम्रादिप्रशस्तवृक्षपत्रवेष्टितान्सूत्रेणा
वेष्टावेष्टयेत्॥तत्रैकत्रमुसलमेकत्रचक्षुरिकादिशस्त्रंमध्येप्रक्षिप्यवेष्टयेत्॥तानिषडूवंशपा
त्रेनिधायतन्मध्येउदकस्थेषुचतुर्षुक्रमेणनंदिनीलिनीमेत्रीमास्तदुत्तरस्थेमुसलगर्भेषभ्रु
वर्द्वीतदुत्तस्थेशस्त्रगर्भेभगवतीतंडुलपूर्णेहरिद्राखंडपूगीफलयुतेन्युब्जशरावविहितेन

हरिद्रादिमंडितेनूत्राद्वेणसहसूत्रवेष्टितेसूक्ष्मकलशेअविघ्नसंज्ञंगणपतिंचावाह्यत
दस्तुमित्रावरुणा गृह्णवेत्रतिष्ठेतिप्रतिष्ठाप्यनीराज्यआसनादिआचमनीयांतोपचारैःपू
जयित्वातेलोद्वर्तनोल्लोदकैरभ्यंगस्नानंषंणांवेष्टितानांकारयित्वागंधादिदक्षिणांतोप
चारैःपूजयेत्॥पुष्पांजलिंदत्वानीराज्योल्लायसपत्नीकआग्नेयकोणस्थमंडपस्तंभोपरि
नंदिनीनामवेष्टितंतदस्तुगृह्णावेइतिस्थापयित्वातत्रनंदिनीपूजयेत्॥तच्चैत्थं॥समुद्र
ज्येष्ठाःआपोहिष्ठाइतिमंत्राभ्यांप्रोक्ष्यगंधद्वारामितिगंधाक्षतैरधिकाण्वइतिदधिकां
डादितिदूर्वापुष्पाणिसमर्पयेत्॥ततोनैर्ऋत्यवायव्ये स्नानस्तंभेषुमंडपमध्योपरिभा
गेकाष्ठचक्रमेणानलिनीमेचोमापशुवर्धनीनामकंवेष्टितानिउक्तवत्स्थापयित्वापूजये १३१
त्॥याआपोदिव्याइतिनलिन्याःप्रोक्षणमंत्रः॥यासांराजेतिमैत्रायाः॥यासुराजेतिउमायाः॥

समुद्रज्येष्ठाइ त्यादिचत्वारोपिपशुवर्द्धन्याः॥अन्यत्सर्वंसमानं॥ततोवंशापात्रेणसहभ
गवतींगौर्यादिमातृकास्थापनवंशापात्रंचस्वयंगृहीत्वाअविघ्नकलशंचपत्याग्राह्यित्वा
सब्राह्मणःकनिक्रदज्ज्ञनुषंसुमंगलसूक्तंपठन्मंगलवाद्यघोषेणगृहांतर्गत्वाप्रशस्तालंकृ
तेस्नानदेशेनंडुलादिपुंजत्रयोपरित्रीण्यपिस्थापयित्वातदस्तुगृह्णावेइतिपठित्वाचंदनादि
नापूजयेत्॥अन्यदपियथाकुलधर्मंसर्वंकुर्यात्॥एवमेवमंडपोमंडपदेवकृतिष्ठाचोपन
यनेपिज्ञेया॥ततःकर्मांगदेवनाभ्रीत्यर्थंद्विजसुवासिन्यादिभोजनंकार्यं॥अगतोनुसर्वमेन
द्विवाहदिनएवपूर्वंकुर्यात्॥ ॥इतिमंडपदेवकादिप्रतिष्ठा॥ ॥अथवरस्यवधूगृहगमनं॥
वरःकृतनित्यक्रियोविधिवत्कृतस्वस्तिवाचनोब्राह्मणैःसहसात्विकाहारंभुक्त्वाअभुक्त्वावा
इष्टदेवतंसदक्षोपरेणाधृतंचस्त्रियुगलंधृत्वालंकृतः स्नग्वीष्टदेवतांपित्रादींश्चनमस्कृत्य

तैरनुमोदितोयथाविभवमश्वादियानमारुह्यध्रतसितछत्रःस्वर्चितैर्ज्ञातिबांधवैः
कनिक्रदज्जनुषमितिसुमंगल्यसूक्तपठनपरैर्ब्राह्मणैःपुरंध्रीभिःपूर्णकलशादर्पणक
न्यापुष्पाक्षतदीपमाल्यध्वजलाजैर्मंगलतूर्यैश्चसहवधूगृहंगत्वातद्वारदेशेप्राङ्मुखः
स्थितोनीराजनपूर्णकुंभयुतैःपुरंध्रीजनैःप्रत्युत्यातोनीराजितोंतर्गृहंप्रविश्यतदंगणेभं
डपाधःसोत्तच्छदेहरितदर्भास्तीर्णेचतुष्पादभद्रपीठेप्राङ्मुखउपविशेत्॥ ॥अथमधु
पर्कः॥ ॥तत्रकन्यादातावरस्यपुरतःसुस्नातामलंकृतामहतवाससंगंधाद्यनुलिप्तांस्व
स्त्रिणांभुक्तवतींकन्यांतथाविधासनेप्रत्यङ्मुखीमुपवेश्यतांपुरस्कृत्यसामात्यःसपत्नी
कउपविश्यागतायवरायतच्छरावेकविधिनामधुपर्कंकुर्यात्॥तत्रायंक्रमः॥पाद्यार्थम
र्घ्यार्थमंत्रवच्त्रिराचमनीयार्थंशुद्धाचमनीयार्थेचजलपात्रचतुष्टयंमधुयुक्तदध्याख्यम १३२

धुपर्ककांस्यपात्रंगांपंचविंशतिदर्भैर्वीगृह्यवामावर्तेनकृतंविष्टरंचसंपाद्यप्राणा
नायम्यदेशकालौस्मृत्वाकन्यार्थिनमित्यादिद्वितीयांतंकामधुपर्केणार्हयिष्यइति मु
वासंकल्यप्रागुक्तलक्षणंदर्भमयकूर्चंविष्टरोविष्टरोविष्टरइतित्रिर्निवेद्यासनार्थंव
रहस्तेदद्यात्॥वरस्तुअहंवर्चसित्यस्यवामदेवोविष्टरोनुष्टुप्॥विष्टरोपवेशनेविनि
योगः॥अहंवर्चसंजातानांविद्युतामिवसूर्यः॥इदंतमधितिष्ठामियोमाकश्चाभिदासति
तिमंत्रेणोदगग्रेविष्टरमुपविशेत्॥विष्टरंमंत्रेणपद्भ्यामाक्रम्यवासीत॥प्रयोगपा
रिजातकारादयस्तूसौत्रमंत्रेऋष्यादिस्मरणंनेच्छंति॥ततोर्घ्यकेनपाद्यंपाद्यंपाद्यमि
त्रिर्निवेदितंपाद्यंवरोगृह्णीयात्॥ततोर्घ्यकस्तेनोदकेनवरस्यदक्षिणसव्योपादौक्रमेण
क्षालयेत्॥ततोवरोलौकिकेनजलेनाचम्यगंधमाल्यफलादिसंयुक्तंपूर्ववत्त्रिर्निवेदि

तंअर्घ्यमंजलिनाप्रतिगृह्यपूर्ववच्चिर्नेवेदितमाचमनीयंप्रतिगृह्यतस्यैकदेशांगृहीत्वा
अमृतोपस्तरणमसीतिमंत्रेणापीत्वालौकिकजलेनाचम्यानीयमानंमधुपर्कंमित्रस्यत्वाच
क्षुषाप्रतीक्षइत्यवेक्ष्यमधुपर्कोमधुपर्कोमधुपर्कइतित्रिर्दात्वानिवेदितंमधुपर्कंदेवस्यत्वा
सवितुःप्रसुवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतिमंत्रेणांजलिनाप्रतिगृह्यांज
लिस्थमेवमधुवाताइतिऋचेनावेक्षेत॥मधुवाताइतिऋचस्यराहूगणोगोतमोविश्वेदेवा
गायत्री॥मधुपर्कावेक्षणेविनियोगः॥ॐमधुवातांऋतायतेत्रिऋचः।तत्यावंसव्यरुस्ते
धत्वांगुष्ठानामिकाभ्यांमधुपर्कंत्रिःप्रदक्षिणमालोड्यांगुलिगतंमधुपर्कंत्रेपंवसव
स्त्वागायत्रेणछंदसाभक्षयंतिनिपूर्वस्यांनिक्षिपेत्॥एवंरुद्रास्त्वात्रैष्टुभेनछंदसाभक्ष
यंत्तिनिदक्षिणतः॥आदित्यास्त्वाजागतेनछंदसाभक्षयंत्तिनिपश्चात्॥विश्वेत्वादेवाआ १३३

नुष्टुभेनछंदसाभक्षयंतिनिउत्तरतःक्षिप्त्वाभूतेभ्यस्त्वेतित्रिरावृतेनमंत्रेणमध्यांकिंचित्किं
चिद्गृहीत्वात्रिरूर्ध्वंक्षिप्त्वामधुपर्कपात्रंभूमौनिधायमधुपर्केकदेशांगृहीत्वाविराजोदोहोसी
तिप्राश्यलौकिकोदकेनाचम्यपुनर्गृहीत्वाविराजोदोहमश्रीयेतिप्राश्यपूर्ववदाचम्यपु
नर्गृहीत्वामयिदोहःपद्यायेविराजइतिप्राश्यपूर्ववदाचम्यमधुपर्कंत्रोषमुदस्रुखो
ब्राह्मणायलेलोकविहिरुत्वाहाप्सुनिक्षिप्यपूर्वंनिवेदिताचमनीयेकदेशमभृतापि
धानमसीतिपीत्वालौकिकोदकेनाचम्याचमनीयजलत्रोषंसर्वंगृहीत्वासत्यंयशश्रीर्म
यिश्रीःश्रयतामितिप्राश्यलौकिकोदकेनहिराचमेत्॥ततोदात्रेगौर्गौरितिनिवेदितांगां गो
आत्मसमारूढमग्निंउछ्वासरूपेणप्रत्यवरोहेतिमंत्रेणलौकिकाग्नौनिदध्यात्॥एवंयथाधि
कारमग्निंप्रतिष्ठाप्यकालेहुत्वैककालेवापूर्ववज्जुहुयात्॥इदंसमारोपणंद्वादशरात्रपर्यंत प
मेवकुर्यात्॥ ॥अथपुरुषस्येवप्रवासकालेकर्तव्यं॥ ॥प्रवासश्चसाग्निकेनद्रव्यार्जनादिदृ
ष्टकार्यार्थमेवकेवलेनपुरुषेणकार्यः॥ननुतीर्थयात्राद्यदृष्टार्थकार्यार्थं॥तत्रहोमांतेपूर्वोक्त

ना

मंत्रैरुपस्थायपुनःप्रवासार्थमभयंमेस्तितिमंत्रेणाग्निमुपस्थायहेमासमध्यवर्तिकालेघ
न्यतमेकालपर्यंतंप्रोष्यपुनःस्वगृहस्वामिसमीपमेत्यॐगृहामाबिभीतोपवःस्वस्त्येवोस्मासु
चप्रजायध्वंमाचवोगोपतीरिषदितिमंत्रेणगृहंनिरीक्ष्यॐगृहानूहंसुमनसुःप्रपद्ये वीरघ्नो
वीरवंतःसुवीरान्॥इरांवहंतोघृतमुक्षमाणास्तेघृहंसुमनाःसंविशानीतिमंत्रेणगृहंप्रविश्य
स्त्रिवंराग्मेस्तितिपुनरग्निमुपतिष्ठेत्॥ततोज्येष्ठपुत्रस्त्रीरजभाभ्यांपाणिभ्यांपरिगृह्यॐअंगाद
गात्संभवसिहृदयादधिजायसे॥आत्मावैपुत्रनामासिसजीवशरदःशतमितिमंत्रंजपित्वामू
र्धानंत्रिराजिघ्रेत्॥एवंइतरेषांपुत्राणांक्रमेणकृत्वाअप्रत्तदुहितॄणांतूष्णीमेवशिरोजिघ्रेत्॥
एतत्पुत्रेपिप्रोष्यागतेभवति॥अवगतमप्यब्रियंप्रवासादागतंप्रतिनदहर्निवेदयेयुः॥ ॥
अथाग्निदूयसंसर्गदोषप्रायश्चित्तं॥ ॥स्वगृह्याग्निनासंसृष्टेग्नौविभज्योमोसमित्समा १६६

रोपणंकुर्यात्॥ततःपूर्वहोताग्निमवरोप्यदेशकालौसंकीर्त्यसमिद्धयमादायाग्नि
मन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाविविचिमग्निंप्रधानदेवतांचरुद्रव्येण
रोषेणस्विष्टकृतमित्यादिसंद्योयक्ष्येइत्यंतमुक्त्वासमिद्धयमग्नावाधायपरिसमूहनादिपूर्व
पात्रनिधानांतंकृत्वाअग्नयेविविचयेत्वाजुष्टंनिर्वपामीतिचतुरोमुष्टीन्निरूप्यप्रोक्षणाद्याज्य
भागांतंकृत्वाअग्नयेविविचयेस्वाहेतिहुत्वास्विष्टकृदादिहोमशेषंसमापयेत्॥अनुपक्रांत
दर्शपूर्णमासयोस्तूर्ववदाज्यंसंस्कृत्यस्रुवेणहौत्रावारंशुचिगृहीत्वाअग्नयेविविचयेस्वाहे
तिस्रुचापूर्णाहुतिंहुत्वाकालहोमंचरेत्॥पश्चाद्धोतानुअग्नयेपथिकृतेजुहुयात्॥वायग्नि
नासंसृष्टेग्नयेभुचयेस्वाहेतिजुहुयात्॥पचनाग्निनासंसृष्टेग्नयेसंवर्गायजुहुया
त्॥वैद्युतेनसंसृष्टेग्नयेऽक्षमतेजुहुयात्॥ ॥अथनष्टाग्निपुनःसंधानप्रयोगः॥ ॥तत्र

अमादादग्निनाशेयजमानःपत्यासहस्नानादिनाशुचिर्भूत्वादेशकालौसंकीर्त्यममअमादा द
ग्नित्यागदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रायश्चित्तंकरिष्यइतिसंकल्पयेत्॥तत्रत्रिरात्र
मग्नित्यागेप्राणायामशतंविप्रानिरात्रेएकदिनोपवासः॥मासद्वयेत्रिरात्रोपवासः॥अब्दे प्राजाप
त्यकृच्छ्रः॥एवंत्यागकालानुसारेणप्रायश्चित्तंकृत्वा॥आयतनंगोमयेनोपलिप्योल्लिख्यथाल्ला
भंसिकतादिसंभारंनिदध्यात्॥तेयथा॥सिकताःपद्मपत्रंवराहनिर्दृतामृत्॥सूदमाखूत्क
रंचोषवल्मीकवपाशर्कराः॥इदंवराहनिर्दृतंपर्णाश्वत्थविकंकताः॥राम्यंकुराश्वविज्ञेयाआधानद्र
व्यसंज्ञिताः॥ततःश्रोत्रियागाराद्दृतमग्निंविधिवत्प्रतिष्ठाप्यसमिध्यप्राणानायम्यदेशकालौसं
कीर्त्यममअमादाद्विछिन्नस्यगृह्याग्नेःपुनःसंधानंकरिष्यइसंकल्प्यआज्यंपूर्ववत्संस्कृत्यस्रुवंचसं ति
मृज्य॥ॐअयाश्राग्नेस्यनभिरास्याश्वसूत्यमित्वमुयाअसि॥अयासावर्यसाकृतोयासंन्यूह्यमूद्वि
षूयानोधेहिभेषजंस्वाहेतिस्रुवेणआज्यंहुत्वासायंकालपर्यंतंपत्न्युपवसेत्तदनुक्तोयजमानोवास १६७

यंकालेचपूर्ववन्नित्यहोमंकुर्यात्॥द्वादशाहपर्यंतमयमग्न्युत्पत्तिविधिः॥तदूर्ध्वंतुवक्ष्यमा
णोविवाहहोमविधिः॥आलस्यादिनाबुद्धिपूर्वकमग्नित्यागेतत्तत्कालानुसारेणोदंप्रायश्चि
त्तं॥द्वादशाहपर्यंतंत्रिरात्रमुपवासः॥मासपर्यंतंद्वादशरात्रमुपवासःअब्दपर्यंतंमासंपयो
व्रतं॥द्विवर्षपर्यंतंचांद्रायणं॥त्र्यब्दपर्यंतंचांद्रायणंसोमायनंच॥तदूर्ध्वंअब्दकृच्छ्रंधनिनोगो
दानंचेतिप्रयोगपारिजाते॥स्मृत्यर्थसारेतु॥द्वादशाहानिक्रमेत्र्यहमुपवासः॥मासातिक्रमे
द्वादशाहमुपवासः॥संवत्सरातिक्रमेमासमुपवासः॥पयोभक्षणंवाइतिविशेषः॥एवंका
लविलंबेसंकल्पपूर्वकंप्रायश्चित्तंकृत्वापुनःसंधानं॥यत्रतुअग्निविछेदनिमित्तेनकेन
चिदग्निविछेदःकालविलंबश्चनास्तितत्राकृत्वैवप्रायश्चित्तंपुनःसंधानंकार्यं॥॥अथवि
छिन्नस्यगृह्याग्नेःपुनःसंधानविधिः॥॥पत्न्यासहकृतस्नानादिनित्यक्रियोदेशकालौसं
कीर्त्यैतावंतंकालंगृह्याग्निविछेदजनितप्रत्यवायपरिहारार्थंएतावत्प्रायश्चित्तममुकप

त्याम्नायेनकरिष्ये॥इतिसंक त्याग्निविछेदकालगणनयास्मृत्युक्तं प्रा
यश्चित्तंदंपतीसहकुर्वीतांनपृथक्॥समानेनास्मिन्अग्निविछेदेनलुप्तानांसायंप्रातर्हो
मानांतथादर्शपूर्णमासस्थालीपाकानांचसंपत्तिपर्यं समिदंध्रीह्यादिद्रव्यमाज्यंचत्रा
ह्मणायसंप्रददइतिलुप्तसायंप्रातर्होमस्थालीपाकगणनयातत्पर्यंतंव्रीह्याद्याज्यंच
ब्राह्मणायदद्यात्॥ततःशुभेकालेशुचिराचांतःप्राणानायम्यदेशकालौस्मृत्वाविछि
न्नस्यगृह्याग्नेःपुनःसंधानंकरिष्ये॥इतिसंकल्प्यस्थंडिलोपलेपना भ्युक्षणाग्नि
तिष्ठापनानिकृत्वाऽन्वाधानंकुर्यात्॥तद्यथा॥इंधसमिधोगृहीत्वादेवतापरिग्रहार्थमग्नि
मन्वाहितेऽग्नौजातवेदसमग्निमिध्मेनप्रजापतिंप्रजापतिंचाघारावाज्येनअत्रप्रधानंत्रि
रग्निंपवमानंसकृदग्निंप्रजापतिंचाज्येन॥अर्यमाग्निंवरुणाग्निंपूषाग्निंचलाज द्रव्येण १६८

चतुर्वारंसूर्यासावित्रीमाज्यद्रव्येणान्नेषणास्विष्टकृतमित्यादिसद्योयक्ष्ये॥परिस्तरणादि
प्राकृतपात्रासादनेतिविन्नेषः॥प्रोक्षणीस्रुवंप्रणीतापात्रमाज्यमावंलाजश्चूर्पमिध्मबर्हिष
श्च॥दधिप्राग्नानपक्षेदधिचासादयेत्॥आज्यसंस्कारादिप्राकृतं॥तत्रआज्येनसहलाजा
नामपिपर्यग्निकरणं॥आज्योत्पवनासादनयोःकृतयोःलाजानांत्रिःप्रोक्षणंस्रुवमार्जनादि
कृत्वा॥पत्न्यन्वारब्धइध्माधानाद्याघारांतंप्राकृतंकुर्यात्॥नचक्षुषी॥अथप्रधानं॥अग्नअ
यूंषीतिसूक्तंवैरूपानसाऋषयःअग्निःपवमानोदेवता।गायत्रीछंदः॥पुनःसंधा
नप्रधानाज्यहोमेविनियोगः॥ॐअग्नआयूंषिपवस॰स्वाहा।अग्नयेपवमानायेदं॰॥१॥
ओंअग्निर्ऋषिःप॰स्वाहा॥२॥ॐअग्नेपवस॰स्वाहा॥३॥त्वमर्यमाभवसियत्कनीनांनामंस्वधावन्नृतंबिभर्षि॥अंजंतिमित्रंसुधि

तेंनगोभिर्यद्दंपतीसमंनसाकृणोषिस्वाहा॥अग्नयइदं०॥४॥प्रजापतेहिरण्यगर्भःप्रजा
पतिस्त्रिष्टुप्॥पुनःसं० योगः॥ॐप्रजापते०स्वाहा।प्रजापतयइदं०॥५॥अथपत्न्याक्षालि
तंजलौपतिराज्येनोपस्तीर्यद्विर्लाजानोप्यपंचावनीतुत्रिरोप्यश्रूर्पस्थानभिघार्यांजलिस्थो
नप्यभिघार्यतिष्ठन्तिघेत्याअंजलिंस्वकराभ्यांधत्वा।अर्यमणंवरुणंपूषणमितितिस्रो
णांवामदेवोअर्यमाग्निर्वरुणाग्निःपूषाग्निरनुष्टुप्॥गृह्याग्निःपुनःसंधानप्रधानलाज
होमेविनियोगः॥ॐअर्यमणंनुदेवंकन्याअग्निमयक्षत॥सइमांदेवोअर्यमाप्रेतोमुंचा
तुनामुतःस्वाहेतिपठित्वामंत्रान्तेअंजलिमविछिंदन्नंगुल्यग्रैरंगुलिवामपार्श्वेनवा
पत्नीजुहुयात्॥एवमग्रेपि॥अर्यमाग्नयेदंनममेतिपतिः॥१॥ॐवरुणंनुदेवंकन्याअग्नि
मयक्षत॥सइमांदेवोवरुणःप्रेतोमुंचातुनामुतःस्वाहा॥वरुणायइदं॥२॥पूषणंनुदेवंकु

णा

न्याअग्निमयक्षत॥सइमांदेवःपूषाप्रेतोमुंचातुनामुतःस्वाहा॥पूषाग्नयइदं०॥३॥ततःसूर्यको
णेनस्थिष्टानूसर्वान्लाजान्पतिःपत्नीवाःभ्यांप्रजापतिध्यायन्जुहुयात्॥प्रजापतयइदं०॥ला
जानांस्विष्टकृत्नास्ति॥ततउपविश्यआज्यंपतिर्जुहुयात्॥आनःप्रजामितिचतसृणांसूर्यासावि
त्रीऋषिःसूर्यासावित्रीदेवताआद्याजगतीद्वितीयात्रिष्टुप्॥अंत्येद्वेअनुष्टुभौ॥अग्निपुनःसंधा
नप्रधानाज्यहोमेवि०ॐआनःप्रजांजनयतु०स्वाहा॥सूर्यासावित्र्यैइदं०॥१॥एवमग्रेपि॥ॐअ
घोरचक्षु०स्वाहा॥सूर्या०॥२॥ॐइमांत्वमिंद्रमीढ्वः०स्वाहा॥३॥ॐसुम्नाञ्ज्ञीष्वशुरेभव०स्वाहा॥४॥
ततःसमंजंत्वित्यस्यसूर्यासावित्रीसूर्यासावित्रीअनुष्टुप्॥दधिप्राश्नेवि०॥आज्यशेषेणवाहृद
यांजनेविनि०॥ॐसमंजंतुविश्वेदेवाः०दधातुनौ॥एतेनस्वयंदधिप्राश्नीयात्॥हृदयांजनपक्षेप
त्न्याअपिहृदयांजनंनूर्ध्वंकुर्यात्॥अथाज्येनयदस्यकर्मणइतिस्विष्टकृतंहुत्वाइध्मसन्नहनादि
कर्मशेषंसमापयेत्॥ अवकारिका ॥उपलेपादिकंकुर्यादाधारांतंविवाहवत्॥विवाहा

ज्याहुतीर्हुत्वा लाजाहोमोभवेदिह ॥ गृह्यप्रवेशनीयाभ्रकुत्वास्याद्धृदयांजनं॥ परिणी
यादिकंनास्तिलाजानावपतिस्वयं॥ ॥इतिप्रयोगरत्नेगृह्याग्निपुनःसंधानं ॥ ॥अ
थनास्तिक्याद्विसृष्टाग्नेरग्निपुनःसंधानं॥तत्रकर्त्तासंकल्पपूर्वकंस्त्रियासहउपोष्यपरे
द्युःकृतनित्यक्रियःसंकल्पपूर्वकंप्रायश्चित्तंकुर्यात्॥तद्यथा॥द्वादशाहपर्यंतंयथाशक्ति
सुवर्णदानं॥मासद्वयपर्यंतंकृछ्रं॥मासचतुष्टयपर्यंतंअतिकृछ्रं॥षण्मासपर्यंतंपराक॥
ततोअब्दपर्यंतंमासंपयोव्रतं॥पूर्णेअब्देत्रैमासिकव्रतं॥ततःप्रतिवर्षंत्रैमासिकावृत्तिरिति॥
ततःकालगणनयासायंप्रातर्होमदर्शपूर्णमासस्थालीपाकहोमद्रव्यदानं॥ततःशुभ
दिनेअपराह्णेसभार्योदेशकालौसंकीर्त्यनास्तिक्याद्विसृष्टस्याग्नेःपुनःसंधानंकरिष्य
इतिसंकल्प्यआयतनोपलेपादियथामीलितसंभारनिधानांतंकुर्यात्॥संभाराश्चापल

रोडुंबरश्चछमीवैकंकतांबुजं॥वल्मीकोखरवाराहमुखकोत्तानमृत्तिकाः॥त्रार्करा
सिकताःस्रुदाःसंपाद्यस्तनरुत्वचः॥यथालाभंसमाकीर्यपावमानाग्नि मुद्धरेत् इति।
ततः॥इदंतुएकंपुरुतुएकंतृतीयेनज्योतिषासंविशस्व॥सुवेशनेतन्वेश्चारुरेधिप्रियो
देवानांपरमेजुनित्रे॥इतिमंत्रेणओंभूर्भुवःस्वरितिचअग्निंप्रतिष्ठाप्यसमिद्वयमादायपुन
र्देशकालौसंकीर्त्यनास्तिक्याद्विसृष्टस्याग्नेःपुनःसंधानांगभूतमन्वाधानंकरिष्ये॥अस्मिन्न
ग्नाहितेग्नौइत्यादिआघारावाज्यभागौचाज्येनेत्यंतमुक्त्वाअत्रप्रधानंअग्निमुद्वासंअग्निपव
मानंअग्निंपावकमग्निंशुचिमग्निंपथिकृतंअग्निंतनुमंतंचाज्येनैवेषणस्विष्टकृतमित्यादिस
द्योयक्ष्यइत्यंतमुक्त्वासमिद्वयमग्नावाधायपरिसमूहनाद्याज्यभागांतंकृत्वास्रुवेणस्रुच्या
ज्यंचतुर्गृहीत्वा॥तमग्नेसप्रथाअसीत्यस्यत्रेयःसुनंभरोग्निर्गायत्री॥नास्तिक्याद्विसृष्टाग्नेःपुन

संधानहोमेविनियोगः॥एवमुत्तरत्र॥ॐत्वमग्नेसुप्रथाअसिजुष्टोहोतावरेण्यः॥त्वया यज्ञंवितन्वतेस्वाहा॥अग्नयइदंनममेति॥एवंसर्वत्र॥१॥योअग्निमित्यस्यकाण्वोमेधातिथिरग्निर्गायत्री॥विनियोगः॥ॐयोअग्निंदेववीतयेहविष्माँआविवासति॥तस्मैपावकमृळयुस्वाहा॥त्यागःपूर्ववत्॥२॥तंतुतन्वन्नित्यस्यवादिवोग्निर्जगती॥नास्तिक्याद्विरक्षाम गः॥ॐतंतुतन्वन्रजसोभानुमन्विहिज्योतिष्मतःपथोरक्षधियाकृतान्॥अनुल्बणंवयतजोगुवामपोमनुर्भवजनयादैव्यंजनंस्वाहा॥त्यागःपूर्ववत्॥३॥त्वन्नोअग्नइत्यस्यअंगिरसोहिरण्यस्तूपोग्निर्जगती॥ॐत्वंनोअग्नेतवदेवपायुभिर्मघोनोरक्षतन्व्श्चवंद्य॥ धातातोकस्यतनयेगवामत्यनिमेषंरक्षमाणस्तवव्रतेस्वाहा॥त्यागः॥४॥त्वन्नोअग्नइत्यस्यगोतमोवामदेवोग्नीवरुणोविष्टुप्॥ॐत्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेळोवयासिसीष्ठाः॥यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा॥५॥सत्वंनोअग्नइत्यस्यपूर्वमंत्रोक्तमेवऋष्यादि॥विनियोगः॥उक्तः॥ॐसत्वंनोअग्नेवमोभवोतानेदिष्ठोअस्याउषसोव्युष्टौ॥अवयक्ष्वनोवरुणंरराणोवीहिमृळीकंसुहवोनएधि स्वाहा॥६॥मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंसमिमंदधातु॥याइष्टानुषसोनिम्रुचश्चतास्संदधामिहविषाघृतेनस्वाहा॥अग्नयइदं॥७॥पुनस्त्वादित्यारुद्रावसवःसमिधतांपुनर्ब्रह्माणोवसुनीथयज्ञैः॥घृतेनत्वंतनुवोवर्धयस्वसत्याःसंतुयजमानस्यकामाःस्वाहा॥अग्नयइदं॥८॥एतैर्मंत्रैस्रुचाप्रत्याकृतिंचतुर्गृहीतेनाज्येनाष्टावाकृतीर्जुहोत्यस्रुवेणास्थाल्याआज्यमादाय॥ॐअग्नयेपवमानायस्वाहा॥१॥ॐअग्नयेपावकायस्वाहा॥२॥ॐअग्नयेशुचयेस्वाहा॥३॥ॐअग्नयेपथिकृतेस्वाहा॥४॥ॐअग्नयेतंतुमतेस्वाहा॥५॥ॐअग्नयेनरिष्टायस्वाहा॥६॥ॐअग्नयेयविष्ठायस्वाहा॥७॥ॐअग्नयेस्विष्टकृतेस्वाहा॥८॥

ये

स्वाहा॥ इतिपंचाकुतीर्हुत्वाननदेवताभ्यस्त्यक्त्वास्विष्टकृदादिहोमत्रोषंसमाप्यआहि
ताग्नेअनड्वहंदक्षिणांदद्यात् इति॥ ॥अथापत्नीकोयासनप्रयोगः॥ ॥स्वतःपूर्वे
मृतायेपत्न्यैदाहायार्धाग्निंदत्वाग्निष्टार्धाग्नौपूर्ववत्सायंप्रातर्होमौकुर्यात्॥ इष्टिसुका
र्यनवा॥अथविवाहोनरंदंपत्योर्गृहप्रवेशः॥ गृहप्रवेशहोमदिनादारभ्यदर्शसंक्रा
न्त्यतीपातविष्यादिरहितेचतुर्थ्यादौमोडूर्निकोक्तेशुभदिनेगृहप्रवेशंकरिष्यमाणः
श्वशुरगृहेभ्यस्नात्वारात्रौस्वदेशाचारानुसारेणागबल्यादिकृत्वाश्वशुरदत्तदा
सीदासपर्यंकादियुतःसुवासिनीकृतनीराजनःश्वशुरादिभ्योगृहीतब्रह्मवर्चसः
स्वलंकृतःस्वलंकृत यावध्वासहविवाहाग्निंरथकटेवस्थाप्याजस्रंनयन्॥ पूषात्वेत
इत्यस्यसूर्यासावित्रीसूर्यासूवित्रीत्रिष्टुप्॥वध्वारोहणेविनियोगः॥अनेनयथावि

भवंगजाश्वादियानमारोहयेत्॥यानेनप्रयाणएवासौनियमः॥यानादन्येनशिबिका
दिनाप्रयाणेनमंत्रः॥स्वग्रामविवाहपक्षेस्वगृहगमनेनायंमंत्रः॥गमनेनयद्यंतरानद्या
नदीस्यात्तदाश्मन्वतीरयतेइतिऋचोधेनवधूंनवमारोहयेत्॥अत्राजह्यामेत्यन्तरा
धेनउदकादुत्तारयेत्॥ नीयमानावधूर्यदिबंधुवियोगादिनारोदतीतदाजीवंरुदंतीतिऋ
चंजपेत्॥अयंविधिःस्वग्रामेपिभवत्यविशेषात्॥शोभनेषुदेशवृक्षचतुष्पथेषुमावि
दन्परिपंथिनइतिऋचंजपेत्॥वसतोवसतावीक्षकाःसंतिचेन्नान्सुमंगलीरियंवधू
रित्यृचाईक्षते॥इहप्रियमित्यनयागृहंप्रवेशयेद्वधूं॥अयंविधिःस्वग्रामविवाहे
पिभवति॥अत्रायमनुष्ठानक्रमः॥वरोवधूंउक्तमंत्रेणयथार्हंयानमारोप्यविवाहाग्निं
श्वकटारोपितमजस्रमयतोनयन्सुमंगलीसूक्तंपठद्भिर्विप्रैर्बंधुभिःसुवासिनीभि

रष्टमंगलसंज्ञद्दर्पणपूर्णकलशकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगलतूर्यनादै
श्चसद्दसितछत्रयुतःस्वगृहद्वारेसुवासिनीभिर्नीराजितवि ग्रहोबंधुपाणीगृहीत्वाशुभ
सूत्रेइहप्रियंप्रजयानइतिस्वगृहंप्रवेश्यस्वयंचप्रविश्यनंदुलचतुष्केकुलदेवतांलक्ष्मीच
संपूज्यविप्रैःपुण्याहंवाचयेत्॥ततःगृहप्रवेशानीयहोमःकार्यः॥अस्माभिस्तुआचारानुस
रणपूर्वकर्तव्यतयोक्तः॥ततःशुभदिनेस्वस्त्यादिवाचयित्वास्वलंकृतःस्वलंकृतांवधूंरात्रा
वगछेदि ति॥नागबलिस्तंभबलिप्रयोगस्तुसर्वदेशेघतुघानाभावान्नोक्तः॥ ॥इतिश्री
विद्वन्मुकुटमाणिक्यश्रीरामेश्वरभट्टसूरिसुनुनारायणभट्टकृतेप्रयोगरत्नेवधूसहितवर
स्यगृहप्रवेशविधिः॥ ॥आश्वलायनमाचार्यंप्रणम्यपितरंगुरुं॥भट्टरामेश्वरस्तु १७३
तोवक्ष्मिशिष्टतुष्टये॥अतःपरंद्विजातीनांसंस्कृतिर्नियतोच्यते॥संस्काररहितायै

तुतेषां जन्मनिरर्थकं॥पंचविंशतिसंस्कारैःसंस्कृतायेद्विजातयः॥तेषांवि
प्राश्चयोग्याःस्युःप्राङ्नाभिषुसमंत्रिताः॥४॥गर्भाधानंपुंसवनंसीमंतोबलिरेवच॥जा
तकर्मनामकर्मनिष्क्रमोन्नानंपरं॥चौल कर्मोपनयनंव्रतानांचचतुष्टयं॥स्नानो प
द्वाहौचायणमष्टकाचयथाक्रमं॥श्रावण्याग्रहायण्यांचमार्गशीर्ष्यांचपार्वणं॥
उत्सर्गश्चाप्युपाकर्ममहायज्ञाश्चनित्यशः॥७॥श्रावण्यादिषुतिसृषुपौर्णमासीषुक्र
मेणश्रवणाकर्माश्वयुजीकर्मप्रत्यवरोहणानिश्रौणिकुर्यात्॥पर्वण्यमावास्यायांक्रिय
मांपर्वणिनित्यर्थः॥संस्कारनियतायेतेब्राह्मणस्यविशोषतइत्याश्वलायनाचार्येण
पक्रमोपसंहारयोर्नित्यत्वोक्त्याजन्मनैरर्थक्यरूपाकरणनिंदयाचपंचविंशतिसं
स्काराणांनित्यतोक्ता॥पुनश्चैषांनैमित्तिकवार्षिकमासिकनित्यभेदेनचतुर्विधत्वंस

एवाहनैमित्तिकाःषोडशोक्ताःसमुद्वाहावसानकाः॥सप्तैवाग्रयणाद्याश्चसंस्काराः
वार्षिकामताः॥मासिकंपार्वणंप्रोक्तंप्रसक्तानांतुवार्षिकं॥महायज्ञास्तुनित्याःस्युःसंधा
वदग्निहोत्रवदितिनित्याःप्रत्यहिका इत्यर्थः॥एवंपंचविंशतिसंस्कारेषुगर्भाधानाद्या
अष्टादशोक्ताः॥इदानींश्रवणाकर्माद्याःसप्तावश्यिष्टाउच्यंते॥तत्रतावच्छ्रवणाकर्मोच्य
ते॥श्रवणाकर्मसर्पबलिंचभुक्त्वापिकेचित्कुर्वंति॥युक्तंतुउपवासिनैवकार्यइति॥श्रा
वण्यांपौर्णमास्यांपूर्वेद्युर्वृद्धिश्राद्धंकृत्वादिवैवयवानांव्रीहीणांवालौकिकाग्नौभर्जने
नप्रस्थमितानाधानाःकृत्वाऽखंडितयवव्रीह्यन्यतरस्यलौकिकाग्नौभर्जनंकृत्वातत्पिष्टरू
पैःसक्तुभिर्नवंकलशंप्रपूर्यबलिनिक्षेपसाधनभूतांवेकंकतदर्वीमपिसंपाद्यतदुभयंगृ
हकाष्ठादिलंबितेनवेन्नीकेनिधायबल्यर्थंगृहाभ्यांशुचिदेशेपरिगृह्यादिहकरिष्या १७४

मीति॥व्रीहीश्चरुपात्रंपुरोडाशकपालंचसंपाद्यधानाःसमाधीकृत्यअर्धलौकिकाग्ने
नाक्ताःकृत्वाएकपात्रेनिधायअपराअनक्ताःअर्धाधानाःपात्रांतरेनिदध्यात्॥तत
स्तमितेसूर्येशुचिःसपवित्रपाणिःप्राणानायम्यदेशकालौसंकीर्त्यममपुत्रपौत्रादी
नांचरोगनिवारणसमस्तपापक्षयादिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनित्यविधिरूपंश्रव
णाकर्मकरिष्येइतिसंकल्प्यसमिद्वयंघृताक्तंवादायपुनर्देशकालौसंकीर्त्यअस्मिन्श्रवणा
कर्महोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्येअस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्ये
नित्यंतमुक्त्वाप्रधानदेवतामग्निंचतुर्वारंचरुद्रव्येणाच्युतभोमाग्निंपुरोडाशेनअग्निमारु
त्याज्येनवाजिनदेवताधानाद्रव्येण॥शेषमस्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वा॥अं
भूर्भुवःस्वरित्यग्नावाधायपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वापुरोडाशदेवतानांपंचानांच

चरु

तुरश्वतुरोमुष्टीन्नि रूप्यतत्संख्ययातूष्णीम्प्रोक्ष्यावघाताद्दिरुत्वाप्रक्षाल्यचरुपुरोडाशानं
डुलान्यथाभागंपृथक्कृत्यपुरोडाशार्थंस्वयंकिंचित्पिष्टीकृत्यरुछाजिनेप्रस्कंद्यपत्न्यादास्या
वापेषेणचूर्णयि त्वातत्तश्चर्वर्थमग्नेदक्षिणभागेस्थालींनिधायाग्नेःपश्चात्परिस्तरणम
ध्येउपवेश्याग्न्याधेयाग्निनयज्ञियकाष्ठेनह्वंगारौपृथक्कृत्यतयोरेकंवायव्येनिरस्यप
उपस्पृश्याग्निष्टमंगारमवस्थाप्यतस्मिन्कपालमुपधायतदुपर्यपरमंगारंनिक्षिप्यकृचि
त्यात्रेपिष्टसेकार्थमपःप्रताप्यन्नारावखंडंप्रक्षाल्याग्नौप्रताप्यशोषयित्वास्वाग्रेनिधायशीते
तस्मिन्यवित्रवतिपुरोडाशार्थंपिष्टंनिक्षिप्यपूर्णपात्रोदकंस्रुवेणापिष्टंप्रक्षिप्यपूर्वंप्रतप्तो
दकेनपिष्टंसंमिश्र्यपिंडीकृत्यपूर्वमुपहितंकपालादंगारंतृणेनापोह्यचरुस्थाल्यांतंडुला
नोप्याश्वत्थफलमात्रंकूर्मरूपंत्रिपुरोडाशंकृत्वाकपालेनिधायाङ्गुष्ठप्रक्षीकृत्याज्यंसंस्कृ

त्याज्यादीनिचत्वारिहवींषित्रिःपर्यग्निकृत्वापुरोडाशमुल्मुकैःप्रताप्यदर्भैःप्रज्वा
ल्यतत्रैवस्रुश्चतंश्चपयित्वातदुपरिसांगारंभस्मनिक्षिप्यहस्तंप्रक्षाल्यसंवापपात्रंप्र
क्षालयेत्॥ततआज्यमुद्वास्यबर्हिष्यासाद्यस्रुवंस्रुचंचसंमृज्यपुरोडाशोपरिस्थभस्मा
दितृणेनापोह्यचरुपुरोडाशावभिघार्योद्गुह्यास्यचरुंबर्हिष्यासाद्यनदुत्तरतःपात्रां
तर स्थितलौकिकाज्येनपुरोडाशंमज्जयेत्प्रकटपृषंवाकुर्यात्॥नदुत्तरतअक्ताअन
क्ताश्चधानाआसाद्येध्माधानाद्याज्यभागांतेकृतेस्युष्टताच्चरोर्हव्यंयथागोत्रंचतुर्वी
पंचवारं वावदानधर्मेणावदायाग्नेनयेत्यादिमंत्रैर्जुहोतिस्वाहाकारंपठन्नाकृतिचतुष्ट
यंजुहुयात्॥अग्नयइदंनममेतिआकृतिचतुष्टयेपित्यागः॥अग्नेनयेत्यादिकृकवतुष्टय
स्यअगस्त्यऋषिरग्निर्देवतात्रिष्टुप्छंदः॥श्रवणाकर्मप्रधानचरुहोमेविनियोगः॥ॐ

अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान्॥युयोध्य ज्जुहुराणमेनो भूयिष्ठांतेनमउक्तिंविधेमस्वाहा॥१॥अग्नेत्वंपारयानव्योअस्मा न्त्स्वस्तिभिरतिदुर्गाणिविश्वा॥पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनेयायजांयोःस्वाहा॥२॥ॐअग्ने त्वमस्मद्युयोध्यमीवाःअनग्नित्राअभ्यमंतकृधीः॥पुनरस्मभ्यंसुविताय देवक्षांविश्वेभिरमृतैर्यजत्रस्वाहा॥३॥ॐपाहिनोअग्नेपायुभिरजस्रैरुतप्रियेसदनेआशुशुक्वान्॥मातेभ्र यैजरितारंयविष्ठनूनंविदन्मापरंसहस्वःस्वाहा॥४॥ततःसव्यपाणिनादक्षिणपाणिं श्रोक्ष्योपस्तीर्यकृत्वंपुरोडाशमादायद्विर्भिघार्यपंचावत्तीस्त्रिरभिघार्य॥ॐअच्युताय भोमायस्वाहेतिअपर्यावर्तयन्जुहुत्वाअच्युतायभोमायाग्नयइदंनममेतित्यजेत्॥ततो यस्मिन्नाज्येपुरोडाशःस्थापितस्तदाज्यैकदेशंमानोअग्नेइत्यस्यअगस्त्याग्निस्त्रिष्टुप्॥ १७६

आज्याज्यहोमेविनियोगः॥ॐमानोअग्ने वंसजोअघायाविष्यवेरुपवेदुछुनायै॥मा दृत्वतेदशतेमादतेनोमारीषतेसहसावन्परादाःस्वाहा॥इतिस्रुवेणजुहुत्वाग्नयइदंनममेति त्यजेत्॥ततःस्वाजलावन्येनोपस्तृतेप्रागग्नाधान्नाद्विस्त्रिर्वाबाधयित्वाभिघार्य॥शन्नो भवंतित्यस्यवसिष्ठोवाजिनस्त्रिष्टुप्॥श्रवणाकर्मप्रधानलाज होमेविनियोगः॥ॐशंनो भवंतुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः॥जंभयंतोहिवृत्रंरक्षांसिसनेम्यस्मद्युयवन्न मीवाःस्वाहा॥अंजलिनाजुहुत्वावाजिभ्यइदंनममेतित्यजेत्॥ततोनभ्यग्नाधानाःपुत्राद्यमात्येभ्यो दत्वाचरुधानैकदेशान्तःस्विष्टकृतंजुहुत्वाहोमशेषंसमाप्यधृतपवित्रग्रंथिंविस्रस्यशुद्धदेशेनि धेत्॥ ॥इतिश्रीरामेश्वरभट्टात्मजनारायणभट्टविरचितेप्रयोगरत्नेश्रवणाकर्मप्रयोगः॥ ॥ अथसर्पबलिप्रयोगः॥आचम्यपवित्रेधृत्वाप्राणानायम्यदेशंकालंस्मृत्वाममभार्यापुत्रपौ

त्रदुहितृसमेतस्यभौमांतरिक्ष्यदिव्यसर्वेभ्यःसंभावितबाधापरिहारद्वाराश्रीपरमेश्व
रप्रीत्यर्थंनित्यविधिरूपंसर्पबल्याख्यंकर्मकरिष्ये॥इतिसंकल्प्यपूर्ववन्निष्क्यस्थापित
दर्वीमादायनिष्क्यस्थापितकलशाद्धितसक्तुभिस्तामापूर्यगृहीत्वागृहान्निर्गत्यप्राच्यां
दिशिपूर्ववत्परिगृहीतंदेशमासाद्यप्रोक्ष्य॥ॐसर्पदेवजनेभ्यःस्वाहेतिमंत्रेणादर्वीस्थ
सक्तूंस्तत्रप्राङ्मुखोनिक्षिप्यसर्पदेवजनेभ्यइतित्यजेत्॥बलेर्बलिदानुष्ठांतरालकेनापि
व्यवधानेनकार्यमापरिदानात्॥ततःकृतांजलिः॥ॐयेसर्पाःपार्थिवायआंतरिक्ष्यायेदि
व्यायेदिश्यास्तेभ्यइमंबलिमाहार्षुतेभ्यइमंबलिमुपाकरोमीतिमंत्रेणासर्पानुद्दिश्यसं
हृताभ्योपाणिभ्यांनमस्कृत्यबलिंप्रदक्षिणीकृत्यपश्चाद्बलेरुपविश्य॥ॐसर्पोसिस १७७
र्पांसर्पाणामधिपतिरस्यन्नेनमनुष्यांस्त्रायसेपूपेनसर्पान्यज्ञेनदेवांस्त्वयिमासंतं

त्वयिसंतःसर्पामाहिंसिषुर्ॐयांतेपरिददामीतिमंत्रमुपांशुसकृज्जपित्वाज्येषत्रमेणना
मत्राहंपुत्रादीन्परिदद्यादेवं॥ॐवामुकंतेपरिददामीतिपुत्रं॥ॐवामुकांतेपरिददामीत्यत्र
त्तांदुहितरं॥ॐवामुकांतेपरिददामीतिभार्यां॥ॐवमांतेपरिदामीत्यात्मानमंते॥अन्यःक
र्त्ताचेन्मांपदस्थानेयजमाननामद्वितीयांतमुक्त्वापरिददामीतिवदेत्॥ततःप्रतिपदमार
भ्यप्रत्यवरोहणपर्यंतंसायंप्रातःकालेषुनयेवदर्व्यातैरेवसक्तुभिःशुचिदेशेबलिंहरेत्॥
तत्रनमस्कारादिपरिदानांतंनकार्यं॥अथवाश्रावणप्रतिपदमारभ्ययस्मिन्नहनिप्रत्य
वरोहणंमार्गशीर्षशुक्लचतुर्दश्यांपौर्णमास्यांवाक्रियतेतस्मादर्वाचीनदिनानिष्क्रासच
तुर्दिभ्यांपरिगण्यतेषुयावंतःसायंप्रातःकालास्तावतोबलींस्तदेवदद्यात्॥तदाचप्रथ
मबलिदानांतेनमस्कारादिपरिदानांतंसकृदेवनप्रत्येकं॥ततःपवित्रग्रंथिंविस्रस्यशुच

देशेक्षिपेत्॥अत्रनदहरेवाखिलबलिदानंमुख्यःपक्षः॥श्रवणाकर्मसर्वबलीप्रतिवर्षं
कार्यअविशेषश्रवणात्॥वृद्धिश्राद्धमुभयार्थंनंत्रेणैवकार्यं॥ ॥इतिश्रीनारायणभट्ट्कृ
तेप्रयोगरत्नेसर्वबलिप्रयोगः॥ ॥अथाश्वयुजीकर्मप्रयोगः॥आश्वयुजमासेपौर्णमा
स्यामाश्वयुजीकर्मकार्यंपूर्वेद्युःकर्त्तोपलेपनादिनाप्रत्यवरोहणैमार्गेणनिवेशनमलंकृ वक्ष्यमाण
त्यभूमिंचसमीकृत्यपरेद्युःस्त्रीपुत्रादिसमेतोऽभ्यंगादिविशेषस्नानंविधायशुक्लशुचि
वासाःप्रातरौपासनंकृत्वाभ्युदयिकश्राद्धंविधायधृतपवित्रःप्राणानायम्यदेशकालौस्म
र्त्वाममस्त्रीपुत्रादिसहितस्यन्यूनातिरिक्तविषयसंपूर्णापूर्णानवसानसिद्धिद्वाराश्रीपर
मेश्वरप्रीत्यर्थंनित्यविधिरूपमाश्वयुजीकर्मकरिष्ये॥इतिसंकल्प्याग्निमुपसमाधाया
स्मिन्नाश्वयुजीकर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्येइ त्यादिचक्षुषीआज्येनेत्यं १७८

तमुक्त्वात्रप्रधानंपशुपतिंचरुद्रव्येणपृषातकंपृषातकद्रव्येणशेषेणास्विष्टकृ
तमित्यादिसंघोयस्यइत्यंतमुक्त्वासमिद्वयंत्रयंवाग्नावाधायपरिसमूहनादिपू
र्वंपोनिधानांतंकृत्वाअग्नेःप्रत्यक्शूर्पंपवित्रंवतिपशुपतयेत्वाजुष्टंनिर्वपामीति ब
च तुरोमुष्टीश्चर्वर्थंनिरूप्यतत्संख्ययातथैवप्रोक्ष्यावघातादिचरुश्रपणांतंकृत्वा
ज्यमिश्रंपयःपृषातकारव्यंहविरंतरंकृत्वाज्यंसंस्कृत्यपृषातकचरुभ्यांसहैयग्निं कृ प
त्वाज्योद्वासनादिआज्यभागांतंकृत्वासुतादिभिरन्वारब्धःसन्निधौवानानुपवे
श्यावदानधर्मेणचरुमवदाय॥ॐपशुपतयेत्रिवायवेकरायपृषातकायस्वाहे
तिकृत्वापशुपतयेत्रिवायवेकरायपृषातकायेदंनममेतिन्यजेत्॥ततोयजमा
नोजलाद्युपस्तीर्यस्रुवेणैवपृषातकंहिरवदायाभिघारयेत्॥ततोयजमानः॥ॐ

पृषातकायेदंनममेतित्यजेत्॥चरुपृषातकयोषास्विष्टकृतं हुत्वा+१

ऊनंमेपूर्यतांपूर्णंमेमोपसदंस्तृषातुकायुस्वाहेत्यंजलिनेवऊत्वाऽइध्मसन्नहनहे
मादिकर्मस्रोवंसमाप्यपवित्रग्रंथिंविस्रस्यशुचिन्नोक्षिपेत्॥ ॥इतिनारायणभट्ट
तिप्रयोगरत्नेआश्वयुजीकर्मप्रयोगः॥ ॥अथाग्रयणप्रयोगः॥आरदिपौर्णमास्याममा
वास्यायांपर्वणितदलाभेकृत्तिकादिविशाखांतेषुदेवनक्षत्रेषन्यतमेचंद्रानुकूल्येआग्रय
णंकार्यं॥ आनरोपासन होमंकृत्वासंकल्पपूर्वकमाभ्युदयिकश्राद्धंविधायपवित्रे
धृत्वाप्राणानायम्यदेशकालौसंकीर्त्तयित्वामरोगजरानिवृत्तिश्रीयशोन्नप्राप्तिद्वाराश्री
परमेश्वरप्रीत्यर्थंनित्यविधिरूपमाग्रयणंकरिष्येइतिसंकल्प्यास्मिन्नाग्रयणाख्येकर्म
णिदेवतापरियहार्थमन्वाधानंकरिष्येइत्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाअत्रप्रधानंइंद्रा
ग्नीविश्वान्देवान्द्यावापृथिवीचरुद्रव्येणस्रोषेणस्विष्टकृतमित्यादिसद्योयक्ष्यइत्यंत

मुक्त्वासमिद्वयंत्रयंवाधायपरिसमूहनादिपूर्णपात्रनिधानांतंप्राक्तनंतंत्रंकृ
त्वाग्रत्यग्नेःशूर्पेपवित्रवतितृणेत्रिश्चतुरोमुष्टीनिरूप्यतत्संख्यातथैवस्रोक्ष्य
वधानादिचरुश्रपणांतंकृत्वाज्यसंस्कारादिआज्यभागांतंकृत्वावदानधर्मेणा
चरुमवदाय॥ॐसुज्रूर्देवेभिःसुज्रूर्विधाभिःसुज्रूरिंद्राग्निभ्यांस्वाहेतिकृत्वाइंद्राग्नि
भ्यामिदंनममेतित्यक्त्वापुनरवदाय॥ॐसुज्रूर्देवेभिःसुज्रूर्विधाभिःसुज्रूर्विश्वेभ्यो
देवेभ्यःस्वाहाविश्वेभ्योदेवेभ्यइदंनमम॥पुनरवदाय॥ॐसुज्रूर्देवेभिःसुज्रू
र्विधाभिःसुज्रूर्द्यावापृथिवीभ्यांस्वाहा॥द्यावापृथिवीभ्यामिदंनममेतिनिरूप्यआ
ज्यंगृहीत्वास्विष्टकृतंकृत्वाऽवशिष्टंपात्रांतरेकृत्वातत्पात्रंसव्येपाणौधृ
त्वाॐप्रजापतयेत्वायहंगृह्णामिमह्यंश्रियैमह्यंयशसेमह्यंमुन्नाद्यायेतिमंत्रेणदक्षि

णेनपाणिनाभिमृज्य॥ॐभद्रान्नःश्रेयःसमनेष्टदेवास्त्वयावसेनसमशीमहित्वा॥सनो मयोभूःपितवाविशोहवंनोभवद्विपदेशंचचतुष्पदे॥इतिमंत्रेणाश्यद्विराचम्यनत्वैव उपविष्टः॥ॐअमोसिप्राणतदृतंब्रवीम्यमासिसर्वानसित्रविष्टः॥समेजुरांरोगमपनुद्यन्नारीरादमामंएधिमामृथामंइंद्रेतिमंत्रेणात्मनोनाभिमालभेत॥ततःपत्नीमध्यहविःशेषममंत्रकंप्राश्नीयात्॥ततोयजमानइध्मसन्नहनहोमादिपरिषेचनांतंकर्मशेषंसमाप्यधृतपवित्रग्रंथिंविस्रस्यशुचिदेशेक्षिपेत्॥इदमाग्रयणंयदाश्वयुजीपौर्णमास्यांक्रियतेतदेककालत्वादाश्वयुजीकर्मणासमानतंत्रताभवति॥तत्राश्वयुजीकर्मप्रधानहोमंकृत्वाग्रयणप्रधानहोमः॥हयोश्चवैरिकंस्विष्टकृदित्यादिज्ञेयं॥यवाग्रयणंनकार्यं॥श्यामाकेस्तुप्रस्तरंकुर्यान्नाग्रयणंनास्त्यंतरेदृष्टत्वात्॥इदंचाग्रय १८०

अ णमकृत्वानवान्नभक्षणस्यनिषिद्धत्वात्दुर्भिक्षेपुरातनधान्यालाभेनवधान्यभक्षणाधिकारार्थंमलमासेपिकार्यं॥अनापदितुभुंजएव॥आग्रयणाकरणेप्रायश्चित्तंकारिकायां॥कृत्वाग्रयणोश्नीयान्नवान्नंयदिवेतत्तः॥वैश्वानरायकर्त्तव्यश्चरुःपूर्णाहुतिस्तुवाइति॥इतिश्रीरामेश्वरभट्टात्मजनारायणभट्टकृतेप्रयोगरत्नेस्मार्त्ताग्रयणप्रयोगः॥॥अथप्रत्यवरोहणं॥॥तच्चमार्गशीर्ष्यांपौर्णमास्यांतत्पूर्वेद्युश्चतुर्दश्यांवाकार्यं॥दिवेवयद्दकुंभलेपनंतदाछादननिम्नोन्नतभूमिसमीकरणप्ररूढापामार्गादिन्मूलनरूपंनिवेशनालंकारंविधायफलरहितधान्यतृणाद्यपलालनिर्मितंचाग्रयनार्थंकिटंसंपाद्यसंकल्पपूर्वंकंपत्यवरोहणांगंनांदीश्राद्धंविधायसूर्येस्तमितेसायंसंध्योपासनंकृत्वाशुचिःपवित्रेधृत्वादेशकालौसंकीर्त्यममस्त्रीपुत्रादिसहितस्यजलस्थलचरसर्पबाधानिरसभयदेमंतसी

मनस्यद्वाराश्रीपरमेश्वरप्रीत्यर्थंनित्यविधिरूपंप्रत्यवरोहणाख्यंकर्मकरिष्येइतिसंक
ल्यअग्निमुपसमाधायसमिद्भूयंत्रयंवादायपुनर्देशकालौसंकीर्त्यक्रियमाणेप्रत्यवरोह
णहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्येअस्मिन्नन्वाहितेनाग्नावित्यादिचक्षुषीआज्येनेत्यं
तमुक्त्वाप्रधानंहिःश्वेतंपायसेनेध्मसन्नहनेनरुद्रमित्यादिसद्योयक्ष्येइत्यंतमुक्त्वासमि
धावग्नावादध्यात्॥अत्रस्विष्टकृन्नास्तितेननतत्कीर्त्तनं॥परिसमूहनादिपूर्णपात्रनिधा
नांतंकृत्वाप्रधानदेवतायेश्वेतायहिश्रतुरोव्रीहिमुष्टीस्तूष्णीनिरूप्यतथैवप्रोक्ष्यपयसि
चरुश्रपणाज्यसंस्काराद्याज्यभागांतंकृत्वासुतादिभिरन्वारब्धोवृदानधर्मेणावदाय॥
ॐअपश्वेतपदाजहिपूर्वेणचापुरेणचासुप्रचुवारुणीरिमाःसर्वाश्चराजुबांधवीःस्वाहा॥ १८१
ॐनवेश्वेतस्याभ्यागारेहिर्जघानकिंचन॥श्वेतायवेदार्वायनमःस्वाहेतिहुत्वायसाहुतीहुत्वो

भयत्रश्वेतायेदंनमेतित्यजेत्॥ततःॐअभयन्नःप्राजापत्येभ्योभूयादित्यग्निभी
क्षमाणोजपित्वा॥ॐत्रिवोनःसुमनाभवेत्युक्त्वाहेमंतेतिसंबुध्यंतंमनसास्मरेत्॥ततो
मेःपश्चाद्देशेपूर्वंपलालेनिर्मितंकरंकर्त्तुंशायनार्थंस्वयमास्तीर्यस्त्रीपुत्रादिसहितस्तस्मि
न्नुपविश्यस्योनामेधातिथिर्भूमिर्गायत्रीजपेविनियोगः॥ॐस्योनापृथिविभवानृक्षरानि
वेशनी॥यच्छानःशर्मसप्रथः॥इतिरुचंजपेत्॥एतदारभ्यमंत्रोच्चारणाद्दीस्त्रीबालव्य
तिरिक्तास्योनापृथिवीत्यादीन्स्वस्त्ययनपर्यंतान्मंत्रान्पठेयुः॥ततस्तत्रप्राक्शिराउदग्
ग्रीवोदक्षिणपार्श्वेनशयीतगृहिणोनंतरंयथाज्येष्ठंसर्वेपुत्रपौत्रास्तथैवशयीरन्॥ततउ
त्थायोपविश्यप्राङ्मुखः॥अतोदेवामेधातिथिर्विष्णुर्गायत्रीजपेविनियोगः॥ॐअतोदेवा
अवंतुनोयतोविष्णुर्विचक्रमे॥पृथिव्याःसप्तधामभिरित्यृचंजपित्वापुनरपितथैवशयि

त्वोत्थायोपविश्य दक्षिणमुखाः॥अतोदिवाअवंतुनइतिप्रथमंपादंसकृज्जपित्वा
तथैवशुचित्वोत्थायोपविश्यपश्चिमाभिमुखाः॥यतोविष्णुर्विचक्रमइतिद्वितीयंपा
दंसकृज्जपित्वापुनस्तथैवन्यायित्वोत्थायोदङ्मुखाः॥उपविश्यपृथिव्याःसप्तधामभि
रितितृतीयंपादंसकृज्जपेयुः॥ततःकर्त्तास्त्रिष्टकृद्दूर्जइध्मरज्जुप्रहरणादिकर्मणो
वंसमाप्यपवित्रग्रंथिंविस्रस्यशुचिदेशेक्षिपेत्॥ततःसर्वेयथान्याय्यंन्यायित्वोत्थायो
दितेसूर्येकृतनित्यक्रियाःसंगम्यसौर्याणिस्वस्ययनानिचजपेयुः॥तानिच॥उदुत्य
मितित्रयोदशर्चस्यसूक्तस्यकण्वःपुत्रःप्रस्कण्वऋषिःसूर्योदेवतानवाद्यागायत्र्य
अंत्याश्चतस्रोनुष्टुभःजपेविनियोगः॥नवर्चमेवैतज्जप्यमितिकारिकायां॥चित्रंदेवा
नामितिषड्र्चस्यसूक्तस्यआंगिरसःकुत्सःसूर्यस्त्रिष्टुप्॥नमोमित्रस्येतिद्वादशर्च १८२

स्यसूक्तस्यसौर्योभितयाःसूर्योजगतीदशमीत्रिष्टुप्॥सूर्योनोदिवस्पात्वितिपंचर्च
स्यसूक्तस्यसूर्यपुत्रश्चक्षुःसूर्योगायत्री॥आनोभद्राइतिदशर्चस्यसूक्तस्यराङ्गणो
गोतमोविश्वेदेवाःपंचाद्याःसप्तमीचजगत्यःषष्ठीविराट्त्रिष्टुप्शिष्टास्त्रिष्टुभः॥स्वस्तिनोमि
मीतामितिपंचर्चस्यात्रिर्विश्वेदेवाआद्यास्त्रिष्टुभोंत्येनुष्टुभौ॥परावतइतिसप्तदशर्च
स्यमानवोनामानेदिष्टोविश्वेदेवाजगती॥अंत्येत्रिष्टुभौ॥सर्वेषांजपेविनियोगः॥ए
तानिसर्वाणिजपेयुः॥इतिबह्वृचादत्रनलिख्यंते॥ततोयजमानःसंस्कृतान्नेनस्वादु
व्यंजनयुक्तेनत्रीनधिकान्वाब्राह्मणान्भोजयित्वातैःस्वस्ययनंवाचयेदिति॥इ
दमपिकर्मकेचिदुक्त्वाकुर्वंति॥युक्तंतुपवित्रक्षेपणांतमुपवासीकृत्वाभुक्त्वाश्रा
तिति॥ ॥इतिश्रीरामेश्वरभट्टसूनुनारायणभट्टकृतेप्रयोगरत्नेप्रत्यवरोहणप्रयोगः॥

अथपिंडपितृयज्ञप्रयोगः॥ ॥सचानाहिताग्निनापिकार्यः॥एवमनाहिताग्निर्नित्ये
श्रपयित्वातिप्रणीयजुहुयादितिसूत्रात्॥नित्येऽौपासनाग्नावित्यर्थः॥तस्यायमाहि
ताग्नेरविशेषः॥हविःश्रपणंकृत्वातिप्रणयनंकर्त्तव्यं॥ततोतिप्रणीतस्योपसमाधान
परिस्तरणंचकृत्वा॥ततोवाग्नितिप्रणीतादित्यादिसमानं॥यस्मिन्नहोरात्रेपर्वप्रतिप
दोःसंधिस्तत्रापराह्णेयागदिनेतत्पूर्वदिनेवापिंडपितृयज्ञःकार्यः॥अहोरात्रसंधौतिथि
संधौतुयागःपूर्वदिनएवेतिवृद्धिकेतु॥उक्तापराह्णऔपासनाग्निंप्रज्वाल्यशुचिःप्रा
णानायम्यधृतपवित्रोदेशकालौस्मृत्वापितृतृप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंपिंडपितृ
यज्ञंकरिष्येइतिसंकल्प्याग्नेर्व्यभिमुखोग्निंध्यात्वापरिसृत्याग्नेर्याग्नेकैर्दर्भैःपरिस्तीर्य
ग्नेरुत्तान्यांवायव्यांवाग्नेर्याग्यकान्दर्भानास्तीर्यपर्युक्ष्यतेषुचरुस्थालीसृर्पस्रुचः मुत्पू १८३

मुसलं खलंचोलूखलंवंशवोरुक्षाजिनंसकुलूनबर्हिरिध्मंक्षणंजलपूर्णकमंडलुंचेतियथा
-योग्यंन्यस्यखिलान्येकैकशआग्नेयसंस्थान्यासादयेत्॥काष्ठखड्गः स्रुचः॥आज्य
धारणार्थंतुकुक्कुवान्रोषंप्रसिद्धंपात्राण्युत्तानानिकृत्वाकमंडलुजलेनप्रोक्ष्यस्थाली
सृर्पंचादायाग्नेर्दक्षिणतोवस्थितंव्रीहिमछकटंदक्षिणतआरुह्यस्थालीसृर्पनि
धायव्रीहिभिःपूरयित्वायथास्थालीमुखोपरिस्थाःसृर्पेपतंतिनथाभिमृश्यस्था
न ल्यास्यदेशाःपतितान्व्रीहीन्शकटेनास्याग्नेःपश्चिमतोवायव्यग्रीवेआस्तीर्ण
रुक्षाजिनेनखलंनिधायतत्रस्थालीस्थान्व्रीहीन्निधायाग्नेयाभिमुख्यातिष्ठंस्त
पत्न्याचहतान्सकृत्फलीकृतानविविच्यसकृत्प्रक्षालितान्जीवनंडुलान्श्रपयेत्॥
चरुमनुह्यास्येवाग्नेरंगारदीप्तमुल्मुकंगृहीत्वाग्नेराग्नेय्यादिनिरूपितेशुचिस्थंडिले

येरुपाणिप्रतिमुंचमानाअसुराःसंतःस्वधयाचरंति॥पुरापुरोनिपुरोयेभर्त्युष्णाल्लो
कात्प्रणुदात्वस्मादितिमंत्रेणनीत्वातमतिप्रणीतारव्यमग्निमाग्नेयायकैःकुत्रोःप
रिस्तीर्यदक्षिणाभिमुखोपहृताअसुररक्षांसिवेदिषदइतिमंत्रेणोपासनातिप्रणी
तयोरंतराले स्फ्येनसव्योत्तरपाणिद्वयगृहीतेनवुत्राम्लेनचाग्नेय्यभिमुखंले खा
मुल्लिख्यतामद्भिरभ्युक्ष्यसकृदाछिन्नबर्हिषाछायानुत्पूतमाज्यंविलापितमुत्पूतंनव
नीतंवाध्रुवायामासिच्याग्नेर्दक्षिणतःकुत्रोघासाद्यस्रुवंसंमृज्यतेनध्रुवास्थमाज्यमा
दायचरुमभिघार्यादगुहूस्यातिप्रणीताग्नेःपश्चिमतउपविश्यार्चयित्वाप्राचीनावी
त्यभिघारितमरत्निमितंपंचदर्भादारुकमिध्मंपित्र्यतीर्थेनत्रुस्रीमक्षणावभ्याधायस्रु
वेणाज्यमादायमेक्षणेउपस्तीर्यउद्धृतचरुंद्विधाविभज्योत्तरभागमध्यादंगुष्ठपर्वमा
त्रमेक्षणेनावदायपुनःपूर्वभागादवदायपात्रस्थमवनंचाभिघार्य॥सोमायपितृमते
स्वधानमइत्यतिप्रणीताग्नेर्दक्षिणभागेपराचीनपाणिर्जुहुयात्॥सोमायपितृमतइदंनमम
तित्यग्नेत्॥पुनःपूर्ववद्दक्षिणभागस्थचरोरवदायाग्नयेकव्यवाहनायस्वधानमइत्यग्नेरु
त्तरभागेपूर्ववत्कृत्वाअग्नयेकव्यवाहनायेदंनममेतित्यक्तोपवीतीत्रुस्रीमक्षणमग्ना
वनुप्रहरेत्॥स्वधानमःशब्दस्थानेस्वाहाकारेणवाहोमः॥तदाआकृत्योर्व्यत्ययउपवी
तिताचमेक्षणानुप्रहरणपर्यंतं॥यथाअग्नयेकव्यवाहनायस्वाहेतिप्रथमाकृतिःसोमा
यपितृमतेस्वाहेतिद्वितीयात्यागश्चाकृतिवत्॥ततःप्राचीनावीतीपूर्वरुत्तलेखायांस्था
पितकमंडलुजलंदक्षिणहस्तेनपित्र्यतीर्थेनाग्नेयापवर्गंशुंधंतांपितरःशुंधंतांपितामहाः
शुंधंतांप्रपितामहाइतिमंत्रैस्त्रिर्निनयेत्॥ततोकुत्रोषेणसाज्येनत्रीन्पिंडान्कृत्वा

तस्यांलेखायांप्राचीनावीतीपराङ्मुखःपितृतीर्थेनत्रीन्पिंडाग्नेयापवर्गपि
त्रादिभ्योदद्यात्॥तद्यथाएतन्नेमुकन्तेमन्येचत्वामन्वानुनेभ्यश्चेतिपित्रे॥एवंपितामह
प्रपितामहयोरपि॥ततःअत्रपितरोमादयध्वंयथाभागमादयाध्वमितिसकृत्पिंडान
नुमंत्र्यसव्येनपार्श्वेनव्यावृत्योदङ्मुखोभूत्वायथान्नक्षिप्राणान्नियम्याभ्यावृत्यअमीमद
तपितरोयथाभागमावृषायीषतेतिपुनस्नानंनुमंत्र्यउपवीतीचरुंशेषमवघ्रायाचम्यप्रा
चीनावीतीपूर्ववल्लुंधतांपितरइत्याद्यैस्त्रिभिःकमंडलुजलंपिंडान्निनीयामुकन्तेमन्न
भ्यंक्षेतेतित्रिभ्योपिपिंडेष्वभ्यंजनंतैलंघृतंवादर्भेणदत्वामुकन्तेमन्नंक्षेतेतितथैवांजनंदद्या
त्॥अथएनद्दःपितरोवासोमानोतोन्यत्पितरोयुञ्जध्वमितिप्रतिपिंडंमंत्रावृत्यानववारा
दन्नांपंचान्नाद्यधिकवयाश्चेत्स्वप्नकोष्ठहृदयान्यंतरलोमवादत्वाकृष्णिपूर्वदक्षिणेनिवेद्य

सव्येनराभ्यांपाणिभ्यांकृतांजलिराग्नेय्यभिमुखःपिंडानुपतिष्ठेतमंत्रैः॥यथा॥
नमोवःपितरइषेनमोवःपितरऊर्जेनमोवःपितरःशुष्मायनमोवःपितरोघोरायन
मोवःपितरोजीवायनमोवःपितरोरसाय स्वधावःपितरोनमोवःपितरोन
मएतायुष्माकंपितरइमाअस्माकंजीवावाजीवंतंदृहंसंतंस्याम॥मनोन्वाह्वामहेना
राशंसेनसोमेन॥पितॄणांचमन्मभिः॥आतएनुमनुःपुनःक्रत्वेदक्षायजीवसे॥ज्यो
क्सूर्यंदृशे॥पुनर्नःपितरोमनोददातुदैव्योजनः॥जीवंव्रातंसचेमहि॥अथपरेत
नपितरःसोम्यासोगंभीरेभिःपथिभिःपूर्विणेभिः॥दत्तायास्मभ्यंद्रविणेहभद्रंरयिंच
नुःसर्ववीरंनियच्छतेतिमंत्रेणपिंडान्नाग्नेयाभिमुखंसकृदुत्तानेनहस्तेनचालयेत्॥
ततअग्नेनमन्वाभ्यंनस्तोमैःक्रतुंनभद्रंहृदिस्पृशंरयिं॥ऋध्यामात्वऊतीहरित्योपासन्नि

समीपंगत्वायद्दंतरिक्षंपृथिवीमुतद्यांयन्मातरंवाजिहिंसिम॥अग्निर्मातस्माद्देनं पितरं
सोगार्हपत्यःप्रमुंचतुकरोतुमामनेनसमितिमंत्रंगार्हपत्यपदरहितंजपेत्॥केचित्तु
द्वाभ्यामप्युपस्थानमाहुः॥अथवीरमेदत्तपितरंदूतिमंत्रेणमध्यमंपिंडमादायसपु
त्रपत्न्यैपत्न्याधारयेत्॥आधत्तपितरोगर्भंकुमारंपुष्करस्रजं॥यथायमरपाअस
दितिमंत्रेण॥अयंमंत्रःपत्न्याःइतरौपिंडावप्लुतिप्रणीतेवाक्षिपेत्॥आसादितानां
द्वादशपात्राणांमध्येसकृदाछिन्नबर्हिरिध्मस्रुक्स्रुवाननियुक्तत्वात्॥अवशिष्टानि
यानिनवतेषांदूरेउत्सर्गः॥अवशिष्टमेकंतृणेनसहोत्सृजेत्॥अत्रपित्रादिनाम
ज्ञानेनत्तनोस्थानेएतत्तइत्यस्यानंतरंततपितामहप्रपितामहेतिश्राद्धवत्क्रमेणपिंड
दानमंत्रप्रयोज्याः॥एकस्यद्वयोर्वानामाज्ञानेपियथास्थानंततादिश्राद्धप्रयोगोन्यत्र

नामप्रयोगः॥अत्रपित्रादीनांमध्येएकस्यद्वयोर्वाजीवनेतत्पिंडदानकालेपूर्वोक्त
पिंडदानमंत्रेणस्वाहाकारांतेनजीवद्देवानाग्नौसव्यपाणिनापिंडहोमःकार्यः॥त्रया
णामपिजीवनेहोमांतएवपिंडपितृयज्ञः॥आनारंभोवापिंडपितृयज्ञस्य॥अन्येतुन
जीवंतमतिदद्यादितिश्रुतेः॥पितरितदादित्रिकेवाजीवतित्रिभ्योपिहोमएवनपिं
डदानं॥जीवत्पितामहप्रपितामहेपित्रेपिंडंदत्वाहुयोर्होमः॥जीवत्प्रपितामहस्या
द्ययोःपिंडःप्रपितामहायहोमःहोमेचयज्ञोपवीतिनासर्वत्रइत्याद्याकारतोज्ञेयं॥
अत्रचश्रपणहोमयोरधिकरणविकल्पमाहापस्तंबः॥सोयमेवंविहितस्यानाहि
ताग्नेरौपासनेश्रपणंहोमश्रातिप्रणीतेवाजुहुयादिति॥एतद्व्याख्यातंभवति॥अना
हिताग्नेर्दक्षिणाग्निस्थानीयेऔपासनेश्रपणहोमौ भवतः॥अथवाऔपासनएव

श्रपयित्वातत्तोग्निंप्रणीयतस्मिन्जुह्वादित्यर्थः॥इत्येवंचौपासनएवहोमअतिप्रणी
तस्यदृष्टार्थःइतिकेचित्॥अन्येतुनित्येश्रपयित्वातिप्रणीयजुह्वादित्याश्वलायनीया
ह्वाक्यसमभिव्याहारादसन्निधानादतिप्रणीतेदृष्टार्थत्वाच्चातिप्रणीतएवहोमइति॥ह
रदत्तभाष्यमथेवं॥अत्रबह्वृचैरयमपिपठतित्वान्नलिखितं॥सयुक्तिकत्वात्तुअतिप्र
णीतेहोमइत्यलं॥यद्वायथासंप्रदायंविचार्यवाकार्यं॥सकृदाछिन्नकुशाग्र्यपिंडब
र्हिरभावेकाम्यादिश्राद्धं॥तदुक्तंविष्णुधर्मोत्तरे॥पिंडनिर्वपणंकार्यंकुत्राभावेद्विजोत्त
मैः॥काम्येषुराजदूर्वासुपवित्रेपरमेस्मृतेइति॥राजदूर्वाअतिदीर्घदूर्वाः॥योनाहिताग्नि
रौपासनाग्निमान्स्मृतपितृकःसवक्ष्यमाणंपार्वणश्राद्धंपिंडपितृयज्ञंचव्यतिषंगेण
कुर्यात्॥व्यतिषंगोनामद्वयोर्विच्छेदसहानुष्ठानात्मकस्तंत्रविशेषः॥तत्रपार्वणश्राद्धं

पिंडपितृयज्ञंचव्यतिषंगेणकरिष्येइतिसंकल्प्येध्माधानात्प्राक्पंपितृयज्ञंकृत्वा
ब्राह्मणपश्चाच्चाच्छादनांतं श्राद्धंपुनरिध्माधानादिपितृयज्ञआमेक्षणानुप्रह
रणमथपार्वणमन्त्रानुज्ञानादथोभयत्रोषंक्रमेणसमापयेदितिक्रमः॥आहिताग्निस्तस
र्वधान्यर्धधानीवादक्षिणाग्नावेवपिंडपितृयज्ञंकृत्वापार्वणश्राद्धंपृथगेवकुर्यात्॥
तत्प्रकारंतुश्राद्धप्रयोगेवक्ष्यामः॥ ॥इतिपंचदशेप्रयोगरत्नेपिंडपितृयज्ञप्रयोगः॥
अथाल्पवक्तव्यत्वात्पार्वणश्राद्धात्पूर्वमष्टकाप्रयोगउच्यतेहेमंतशिशिरयोर्मार्ग
शीर्षादिचतुर्षुमासेषुकृष्णपक्षेसप्तम्यादिन्यूनसाध्यमष्टकाश्राद्धंकुर्यात्॥अशक्तौमा
घमासएवकुर्यात्॥तत्रायंक्रमः॥षड्यासायंहोमानंतरंसप्तम्यामेववाप्रातर्होमानंत
रंदेशकालौसंकीर्त्यदर्शवत्पित्रादीन्मातामहादींश्चसपत्नीकाननूद्यनित्यविधि

रूपमष्टकाश्राद्धंकर्तुकामःपूर्वेद्युः श्राद्धंकरिष्येइतिसंकल्प्यब्राह्मणानिमंत्रणा
दिदैवतीयसंकल्पांतंकृत्वाविप्रानुसन्निधाप्याग्निसमिंधनादिपरिषेचनांतंकृत्वास्था
लीत्रयंभूपर्यादायनिचपिंडपितृयज्ञवत्सान्नाप्यासाद्यस्थालीषुव्रीहिपूरणादितंडुलप्रक्षा
लनांतंकृत्वातंडुलांस्तिस्रःस्थालीषुविभज्यशुद्धोदनंतिलमिश्रोदनंपायसंचश्रपयित्वा
तिप्रणयनादिकृत्वायामाज्यनिषेचनांतंकृत्वाचरुत्रयंक्रमेणाभिघार्योदगुद्वास्यतिप्रणी
ताग्नेःपश्चिमतोदक्षिणसंस्थंक्रमेणासाद्यतद्दक्षिणोभ्यंजनांजनकृष्णपूपवर्हणानिधा
नादिभस्मपर्यंतंकरणोत्तरकर्तव्यंपाणित्रोधनांतंकृत्वाचरुत्रयंपात्रांतरेषुपृथगुद्धृत्य
घृतानंकृत्वाप्राचीनावीत्यमेकस्मिन्ब्राह्मणाननुज्ञाप्यातिप्रणीताम्नावि
ध्यमुपसमाधायघृतेवाज्येनमेक्षणमुपस्तीर्यशुद्धोदनमध्यादंगुष्ठपर्वमात्रंमेक्षणेनावदा १८८

यपूर्वार्द्धाच्चतथैवावदायकुसरान्नात्सायसाच्चतथैवावदायस्थालीत्रयस्थितंपृथक्
पृथक्अभिघार्यअंवत्तंचैकवारमभिघार्यउदीरतामित्यृर्चस्यत्रांरवःपितरस्त्रिष्टुप्पूर्ववै
श्वदेविनियोगः॥ॐउदीरतामवरउत्परासऽउन्मध्यमाःपितरःसोम्यासः॥असुंयईयुर
वृकाऋतज्ञास्तेनोवंतुपितरोहवेषुस्वधानमःइतिमेक्षणेनकृत्वापुनश्चरुत्रयात्पूर्ववद्व
दा यॐइदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयऽउपरासईयुः॥येपार्थिवेरजस्यानिषत्ताये
वानूनंसुवृजनासुविक्षु २ॐआहंपितॄंस्त्सुविदत्राँअवित्सिनपांतंचविक्रमणंचविष्णोः॥
बर्हिषदोयेस्वधयासुतस्यभजंतपित्वस्तइहागमिष्ठाः॥३॥बर्हिषदःपितरऊत्यर्वागिमा
वोहव्याचकृमाजुषध्वं॥तआगतावसासांतमेनाथानःशंयोररपोदधात ४ उपहूताःपि
तरःसोम्यासोबर्हिष्येषुनिधिषु प्रियेषु॥तआगमंतुनइहश्रुवंत्वधिब्रुवंतुते

वंत्वस्मान् ५ आच्याजानुदक्षिणतोनिषद्येमंयज्ञमभिगृणीतविश्वे॥माहिंसिष्टपि
तरःकेनचिन्नोयद्वआगःपुरुषतांकरोम द आसीनासोअरुणीनामुपस्थेरयिंधे
त्तदाभुषेमर्त्याय॥पुत्रेभ्यःपितरस्तस्यवस्वःप्रयच्छतत्तइहोर्जंदधात ७ येनःपूर्वेपि
तरःसोम्यासोनूहिरेसोमपीथंवसिष्ठाः॥तेभिर्यमःसंरराणोहवींष्युशन्नुशद्भिःप्रति रा
क्कामंमंतु ८ एतैरपिस्वधानमोंतैःसमाक्रुतीःपूर्ववदुक्त्वापित्रभ्यइदंनममेत्युदे
क्त्यागोत्रत्याक्रुतिंकुर्यात्॥एवमष्टावाक्रुतीर्कृत्वायज्ञोपवीतीमेक्षणमनुग्रहृत्योप
स्पृश्यप्राचीनावीतीक्रुतत्रिष्टरुत्रयपरिवेषणादिसंपन्नवचनांतंसर्वंकृत्वाचरुत्रे
यत्रोषंपिंडार्थमुद्धृतेघंनेषुनिक्षिप्यत्रोषनिवेदनादिविप्रविसर्जनांतंपार्वणश्राद्ध
वत्कृत्वातदहरेवपितृमातामहवर्गद्वयस्य सपत्नीकस्यश्राद्धांगतिलतर्पणंकृत्वा १८९

पार्वणवन्नियमेनदिवसत्रोषंनयेत्॥आहिताग्निस्तुनिमंत्रणाद्याछादनदानांतंकृत्वा
दक्षिणाग्नाविधनादिहविंसादनांतंकृत्वापूर्ववद्ब्राह्मणाननुज्ञाप्यदक्षिणाग्नाविध्मुपस रा
माधायोदीरतामित्यादिभिरष्टाक्रुतीर्कृत्वामेक्षणानुग्रहरणहोमत्रोषपरिवेषणादिब्राह्म
णविसर्जनांतमनाहिताग्निवत्कुर्यात्॥यन्मतेपिंडपितृयज्ञेऔपासनेत्रोहोमस्तेषामत्रापि
त्रैवहोमः॥ ॥इतिश्रीरामेश्वरभट्टात्मजनारायणभट्टकृतेप्रयोगरत्नेसप्तमीश्राद्धप्रयोगः॥ ॥
अथाष्टमीश्राद्धप्रयोगः॥सप्तम्यांसायंमोपासनहोमानंतरमष्टम्यांवाप्रातर्हैमानंतरंदेशकालौ
संकीर्त्यप्राचीनावीतीदर्शवत्प्रेत्यंतानूषट्सपत्नीकानूपित्रूननूद्यनित्यविधिरूपमष्ट काश्रा
द्धंकरिष्येइतिसंकल्यब्राह्मण निमंत्रणादिद्वितीयसंकल्पांतंकृत्वोपासनाग्निंप्रज्वाल्यप्राणा
नायम्यतिथ्यादिसंकीर्त्यैकाश्राद्धांगहोमंकरिष्ये॥तत्रदेवतापरिग्रहार्थमन्वाधानंकरि
ष्यइत्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाविश्वेदेवानूसप्तवारंचरुद्रव्येणत्रोषेणस्विष्टकृतमित्यादि

सद्योयक्ष्येइत्यंतमुक्त्वासमिद्वयंत्रयंवाग्नावाधायपरिसमूहनादिपूर्णपात्रप्रणयनांतंकृत्वास
पवित्रंस्रूपमग्नेःपश्चिमतोनिधायतस्मिंश्चतुरश्चरीमुष्टीनाकृतिसंख्ययाविश्वान्देवान्ध्याय
न्नूर्ध्वानिरूप्यतथैवप्रोक्ष्यावहननाद्याज्यभागांतंकृत्वाग्नौहोमंकरिष्येइति पित्र्यर्थब्राह्मणा
ननुज्ञाप्यकुरुघ्वेतितैरुक्तश्चरोरग्युद्वारमंत्रैर्होमंकुर्यात्॥तत्रमंत्राः॥अग्नेनयेतिमंत्रद्वयस्यअ
गस्त्योग्निस्त्रिष्टुप्॥अष्टकाहोमेवि०॥ॐअग्नेनयसुप०विधेमस्वाहा॥ॐनेत्वंपारयानद्यो०
र्योःस्वाहा॥२॥शीष्मोहेमंतऋतवःशिवानोवर्षाःशिवाअभयाःशरन्नः॥संवत्सरोधिपतिः
प्राणदोनोहोरात्रेकृणुतांदीर्घमायुःस्वाहा॥३॥शंतोद्यौःपृथिवीशिवमंतरिक्षंशिवोनोदिव्यभयं नो
अस्तु॥शिवादिशःप्रदिशऊद्दिशोनआपोविद्युतःपरिपांतुसर्वतःस्वाहा॥४॥आपोमरीचीः
प्रवहंतुनोधियोधातःसमुद्रावहंतुपापं॥भूतंभविष्यदभयंविश्वंमेसुमेब्रह्माधिगुप्तःस्वाक्षरा
णिस्वाहा॥५॥विश्वेआदित्यावसवश्चदेवारुद्रागणामारोमरुतःसदंतु॥ऊर्जंप्रजामृतंपिन्व

मानःप्रजांपतिर्मयिपरमेष्ठीदधातुस्वाहा॥६॥एतैर्मंत्रैरेकऋत्वापठितैःषडाहुतीर्हु
त्वाप्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥अष्टकाहोमेवि०॥ॐप्रजापतेनत्व०रयाणा
स्वाहा॥७॥एवंसप्ताहुतीर्हुत्वासर्वत्रविश्वेभ्योदेभ्यइदंनममेत्युदित्यागोरुत्वास्वि
ष्टकृदादिहोमत्रोषंसमाप्यस्वागतोक्त्वाअर्घ्यशेषसमावपनांतंकृत्वाब्राह्मणसन्निधा
वाग्नेय्यांदिशिभुवंप्रोक्ष्यदर्भाश्चाङ्गुष्ठवत्त्रथमपात्रंन्युब्जीकृत्यगंधदानादिपाणिशे
धनांतंकृत्वाभोजनार्थादन्नाद्दुहित्यघृताक्तंकृत्वापित्र्यर्थब्राह्मणसमीपेउपविश्यतत्पा
णिंपर्युक्ष्यतत्रप्राचीनावीतादक्षिणाग्रान्दर्भानास्तीर्यमेक्षणेउपस्तीर्यमेक्षणेनेवद्वि
वारमवदायपात्रस्थमवत्तंचाभिघार्यसोमायपितृमतेस्वधानमइतिपाणौकृत्वापुनः पू
र्ववदग्नयेकव्यवाहनायस्वधानमइतितथैवजुहुयात्॥एवंसर्वत्रजुहुयात्॥ततोद्विज

कृत्तमन्नं भाजनेषु निक्षिप्य चम्यपूर्ववदुपवित्रोयुः ॥ ततः कर्त्ता नं परिवेष्य शुद्धभि
राद्भिः प्रोक्ष्य पित्रादिभ्योदर्भानवनृत्य क्रा पिंडदानकाले पूर्वपश्चिमतोद्वेले खेद्विजसमी
पेकृत्वाक्रमेणसकृदाछिन्नद्वयेनास्तीर्य प्राचीनावीतीशुंधंतांपितरःसपत्नीकाइत्याद्य
न्युपस्थानवर्जंद्विजविसर्जनांतंसर्वंदर्शश्राद्धवत्कृत्वानदद्यरेववर्गद्वयस्यतिलतर्पणं
कुर्यात् ॥ अत्रकामकालोविश्वेदेवौ ॥ इतिश्राद्धैकनुदक्षावष्टम्यांकामकालकोइतिश्रं
खस्मृतेः ॥ अत्रपक्षोक्तश्चोभूतेष्टकापशुनास्थालीपाकेनवेतिविक ल्पाभिधानेपिलो
कविद्विष्टत्वात्पत्नीसंयाजानांजघन्येनपशुनानुष्ठानाभावात्पशुपक्षेप्रयोगोनोक्तः ॥
इत्यष्टमीश्राद्धप्रयोगः ॥ ॥ अथान्वष्टक्याख्यनवमीश्राद्धप्रयोगः ॥ कर्त्तापूर्वेद्युः प
रेद्युर्वोक्तकालेश्राणानाथम्यदेशकालौसंकीर्त्य प्राचीनावीतीदक्षिणाभिमुखःसव्यं १९१

गत्वाच्यपितृवर्गमातृवर्गमातामहवर्गसपत्नीकंषड्यंतंनिर्दिश्यनित्यविधिरूपं
अन्वष्टक्यश्राद्धंपिंडपितृयज्ञव्यतिषक्तपार्वणविधानेनअन्नेनहविषाश्वोद्यवाकरिष्ये
इतिसंकल्प्यनिमंत्रणादिद्वितीयसंकल्पांतंदर्शश्राद्धवत्कृत्वाब्राह्मणान्संनिधाय्यदक्षि
णाग्रवणेदेशेओपासनाग्निंविधिवत्प्रतिष्ठाप्यपरिमूह्याग्दक्षिणाग्रैःसमूलैर्दर्भैरा स
कंपयंस्त्रिवारमग्रदक्षिणंपरिस्तीर्यपात्रासादनार्थंदर्भानास्तीर्यचरुस्थालीत्रयंस्फ्यो
लूखलमुसल स्रुवभ्रुवकृष्णाजिनसकृदाछिन्नत्रयेध्ममेक्षणकमंडलूनेकैक
राआग्नेयसंस्थानासाद्यस्थाल्यांव्रीहिपूरणादितंडुलप्रक्षालनांतंकृत्वास्थालीषुत
ंडुलान्विभज्यशुद्धौदनंतिलमिश्रौदनंपायसंचश्रपयित्वाकिंचिदोदनाग्रइवंमंडा
रव्यंपात्रांतरेणादायसंभृत्याग्निमतिप्रणीयनंपूर्ववत्परिस्तीर्यस्फ्येनपित्रादिवर्ग

त्रयार्थंपश्चिमापवर्गंरित्वात्रयमुल्लिख्यप्रत्येकमङ्गिरभ्युक्ष्यसकृदाच्छिन्नैनैकैकेनैकैकांलेखांस्तत्वाऽग्नावाज्यंसंस्कृत्योपासनाग्नेर्दक्षिणतःकुशेध्मंसाद्यस्रुवेणाज्यमादाय चरुत्रयंप्रत्येकमभिघार्याग्नेरुदगुद्वास्यानिप्रणीताग्नेःपश्चिमतोदर्भेषुक्रमेणदक्षिणस्थमासाद्यदधिमिश्रयवपिष्टरूपसक्तूनूर्धमंथाख्यान्मधुमिश्रयवपिष्टरूपसक्तून् मधुमंथाख्यान्पात्रद्वयेसंभृत्यदधिमंथसक्तूनोपासनेधिश्रित्याभिघार्योदगुद्वास्यपाय सादक्षिणतआसाद्यअभ्यंजनौजनकन्निपूपबर्हणानांप्रत्येकंत्रयंओपासनाग्नेर्दक्षिणत आसाद्यपित्र्यब्राह्मणानांस्वागतवचनादितृतीयनिमंत्रणांतंकृत्वाअर्घ्यासादनकालेतेज सादीनिनवसंख्याकानिपात्राण्यासादयेत्॥मातृद्वित्वेबहुत्वेवापितामहीद्वित्वेबहुत्वेवा तत्तत्संख्याकानितद्वर्गपात्राण्यासादयेत्॥देवतासंख्याकानिपात्राण्यासाद्यप्रोक्ष्यउत्ता

१९२

नानिकृत्वाप्रतिपात्रंदर्भत्रयंनिधायजलंसंपूर्यवांनोदेवीरितिमंत्रेणैकैकवर्गपात्रस्थं जलंसकृदनुमंत्र्यनिलोसीतिमंत्रेणमातृमातामहादिरूपान्हिनयथापठितंपितृपात्रेवद्व तात्प्रतिपात्रंमंत्रावृत्यानिलान्निक्षिप्यगंधपुष्पाणिचनिक्षिप्यपितृपात्रंसंपन्नमित्यादिय थालिंगमभिमृश्यदर्भवत्पित्रादिनामगोत्ररूपपूर्वकमुच्चआवाह्यार्चयित्वाउपवीतीसर्वेषां नामगोत्ररूपाण्युच्चार्यसंपादितंवःस्वधार्घ्यइतितत्तत्पात्रंतत्तत्सुरतःक्रमेणसंस्थाप्यदर्भवत्पितृणामर्घ्यंदत्वामातरिदंतेऽर्घ्यंस्वधानमोनममेत्यादिनामातृवर्गस्यमातामहवर्गस्यचदर्भवद्दत्वासर्वत्रोत्तरपात्रस्थंजलंपित्रादिपात्रेक्षिप्यतज्जलेनमुखमङ्क्त्वान्यच्चिलपात्रकरणादि पाणिशोधनांतंकृत्वाचरुत्रयान्दधिमंथाच्चपात्रचतुष्टयेक्रमेणाहविःपृथगुल्लुत्यघृताक्तं कृत्वाश्रोकरिष्यइतिपित्र्यब्राह्मणाननुज्ञाप्यक्रियतामितितैरुक्तोनिप्रणीताग्नाविध्मसमुपस

अवत्तंचाभिघार्यर्
माधायमेक्षणमुपस्तीर्यतेनांगुष्ठपर्वमात्रंक्रमेणहविश्चतुष्टयस्यमध्यात्पूर्वार्द्धाच्चष
थक्पृथक्अवदायपात्रस्थंहविश्चतुष्टयंपृथक्पृथगभिघार्यसोमायपित्रमतेस्वधा
नमइत्यग्नौदक्षिणदेशेऽक्त्वाउद्वास्यागौकृत्वापुनःपूर्ववद्दक्षिणभागहविश्चतुष्टयाद
वदायाग्नयेकव्यवाहनायस्वधानमइतिचाग्नेरुत्तरभागेऽक्त्वोद्वास्यागौकृत्वायज्ञोपव
तीतूष्णीमेक्षणमनुप्रहृत्यउपस्पृश्योभाभ्यांहस्ताभ्यांपरिविष्यकृतावशिष्टपात्रचतुष्टय
स्थंहविःसर्ववर्गत्रयद्विजभोजनभाजनेषुपरिविष्यान्नत्यागादिसंपन्नवचनांतंकृत्वा
पिंडार्थमुद्धृत श्राद्धीयसर्वान्नेषुस्थालीचतुष्टयस्थितंहविश्चतुष्टयंसर्वंमधुमंथांश्च
प्रक्षिप्यपुनःप्रकिरणार्थंसर्वस्मादन्नमुद्धृत्यदर्भोपनिवेद्यद्विजैरुत्तरापोशानेहस्तप्रक्षा १९३
लनेचकृतेस्वयमाचम्यपूर्वास्तीर्णेषुबर्हिष्युशंधंतांपितरःशुंधंतांपितामहाःशुंधंतांप्र

पितामहाःशुंधंतांमातरःशुंधंतांपितामह्यःशुंधंतांप्रपितामह्यः॥शुंधंतांसपत्नीक
मातामहाःशुंधंतांसपत्नीका प्रपितामहाःशुंधंतांसपत्नीकावृद्धप्रपितामहाः॥
इतिमंत्रैःसकृत्कमंडलुजलनिनयनंकृत्वाशुक्लांबराद्यादिदर्भाश्राद्धवक्ष्यमाणंवस्तादि
दवनाध्यानंकृत्वाआर्द्रमिलकप्रमाणान्मधुसर्पिस्तिलयुतनवपिंडान्कृत्वाक्रवाज्येना
भिघार्यएतन्नेइत्यादिनायथालिंगंवर्गत्रयस्यपिंडरूपमन्नमित्युक्तिपूर्वकंपिंडनिर्वपण
कृत्वास्त्रीपिंडेषुपूर्वसंभृतमोदनाग्रद्वंनिषिच्यकरावघर्षणाद्यभ्युपस्थानांतंकृत्वावि
रंमेदनपितरइतित्रिरावृत्यापित्र्याद्यानूद्देनवर्गत्रयपितृप्रत्येकंषाण्मध्यमपिंडत्रयंपत्नी
प्राश्यित्वापिंडोद्वासनादिविप्रविसर्जनांतंदर्भवत्कृत्वातद्दद्देववर्गत्रयस्यसतिलतर्पण
कुर्यात्॥मातृद्वित्वेपिंडदानकालेएतद्धामस्मन्मातरोयज्ञदेत्रीदेअमुकगोत्रेवसुरूपेये

वामन्त्रान्वितपिंडदानंकृत्वास्मन्मातृभ्यांयज्ञदाश्रीदाभ्यांअमुकगोत्राभ्यांवसुरूपाभ्योऽयं
पिंडःस्वधानममतेभ्यश्चगयायां विष्णुपदेरुद्रपदेवादत्तमस्तितिथौवासनसुच्चा
रयेत्॥अभ्यंजनदानेयज्ञदेश्रीदेइत्युच्चार्याभ्यंजाथामितितैलंक्षिपेत्॥अंजनदानेंजाथामि
तिप्रत्येकंद्विवारमंजनंक्षिपेत्॥वासोदानेएतद्गोत्रःपितरोवासइत्यादिनापितृन्प्रेतान्नूहेनमं
त्रावृत्यासर्वांसांवासोदद्यात्॥एवंपितामहीप्रपितामहीद्वित्वेपि॥मातृबहुत्वेपिंडदानेयज्ञदे
श्रीदेरुद्रदेअमुकगोत्रावसुरूपायेचयुष्मानन्वान्वितिपिंडंदत्तास्म मातृभ्योयज्ञदाश्रीदारुद्र
दाभ्योयंपिंडःस्वधानमोनमम॥गयामित्यादिपूर्ववत्॥अभ्यंजनदानेपूर्ववन्नामानुक्त्वा अभ्यं
ङ्ध्वंइतिनैलंक्षिपेत्॥अंजनदानेअङ्ध्वमित्यंजनंमंत्रावृत्याप्रत्येकंद्विवारंक्षिपेत्॥वासोदा
ने एतद्गोत्रःपितरेत्यादिनानूहेनसर्वांसांवास्तेदद्यात्॥पितामहीप्रपितामहीबहुत्वेप्येवंकु

र्यात्॥सर्वेषुपिंडदानादिषुमात्रादीनांद्वित्वेएकनामत्वेचद्विवचनांतंनत्तन्नामनिर्देशंबहुत्वेए
कनामत्वेचबहुवचनांतं॥अत्रयद्यपिसप्तम्यादितिथित्रयेश्राद्धकर्त्तव्यतोक्तातथापिगृह्यसूत्रेअ
ष्टमीह्यष्टकाइत्युपक्रम्यपूर्वेद्युःपितृभ्योदद्यात्॥अपरेद्युरन्वष्टक्यमितिसप्तमीनवमीश्राद्धयो
रष्टमीमुपजीव्यउक्तत्वात्तस्याएवसांवत्सरिकवदपराह्णाधिक्यादिकंविचार्यतदनुरोधेनस
प्तमीनवमीश्राद्धंपूर्वेद्युरपरेद्युश्चकार्यंनतुनयोरपराह्णाधिक्यादिकंस्वातंत्र्येणविचार्यमि
ति॥यदिमार्गशीर्षादिचतुर्षुमासेष्वधिमासःस्यात्तदाशुद्धमासएकाष्टकाःकार्यानतुमलमा
से॥हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामितिचतुर्ग्रहणादित्याद्याकारतोज्ञेयं॥अष्टका
श्राद्धाकरणेप्रत्यवायउक्तः॥कूर्मपुराणे॥यस्यतेप्रतिगच्छेयुरष्टकाभिरपूजिताः॥मोघास्त
स्यभवंत्याशापरत्रैवचसर्वशइति॥एतदकरणप्रायश्चित्तमृष्यादिधाने॥एभिर्युग्मिर्जपेन्मंत्रंश्च

१९५

तवारंचतद्दिने॥अन्वष्टक्यंयथाश्रून्यंयंतिसर्वदेति॥ ॥इत्यन्वष्टक्यप्रयोगः॥॥
अथान्वष्टकादिविकृतिभूतमाघ्यावर्षश्राद्धप्रयोगः॥ त्रयोदश्यां तेभाद्रप
दापरपक्षेमहालयाख्येसप्तम्यादिषुत्रिषुदिवसेषुअष्टकावत्सर्वंकुर्यात्॥इतिवृ
त्तिकृत्॥हरदत्तस्तु॥तत्रैवपक्षेमघायुक्तायांत्रयोदश्यांसंकल्पविधानेनमघा
वर्षश्राद्धमित्याह॥ ॥इतिमाघ्यावर्षश्राद्धप्रयोगः॥ ॥अथप्रतिमासमप
रपक्षश्राद्धं॥प्रतिकृष्णपक्षंप्रतिपदाद्ययुग्माष्टतिथिषुपृथक्मातृश्राद्धवर्जं
सपत्नीकपितृमातामहवर्गद्वयस्यान्वष्टक्यवत्सुराचामवर्जंसर्वंकार्यं॥इत्य
परपक्षश्राद्धप्रयोगः॥ ॥कृत्तिकादिषुकाम्यश्राद्धंवृत्तिकारमतेनअष्टमी १९५

१९६

श्राद्धवत्सर्वंकार्यंतथाचशौनकोक्तरीत्यावृद्धिश्राद्धवदिति॥ ॥इतिश्रीभट्ट
रामेश्वरसूनुभट्टनारायणविरचितेप्रयोगरत्नेअष्टकाविकृतिश्राद्धप्रयोगः
समाप्तश्चप्रयोगरत्नाख्योग्रंथः॥ ॥संवत्१८३९प्रमादिनामसंवत्सरे॥शाके
१७०४शुभकृन्नामसंवत्सरेमाघशुक्लप्रतिपदि भानुवासरेइदंपुस्तकंथालीइत्युप
नामकशेषभट्टस्येदंपडवळेइत्युपनामकचिंतामणिभट्टेनलिखितं॥स्वार्थपरार्थं॥
शुभंभवतु॥ ॥श्रीसांबसदाशिवार्पणमस्तु॥ ॥शुभमस्तु॥ ॥ १९६

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥इतिनारायणभट्टकृतप्रयोगरत्नःसमाप्तः॥

॥पत्र१९६॥